Malliṣeṇa then deals with the three kinds of बन्ध mentioned in Sâṁkhya works: (1) प्राकृतिक, (2) वैकारिक and (3) दाक्षिण—that is, (1) that which consists in regarding प्रकृति as the highest ideal of worship like पुरुष, (2) that which consists in regarding the विकारs of प्रकृति such as भूतs, इन्द्रियs, अहङ्कार and बुद्धि as the objects of worship just like पुरुष, and (3) that which consists in practising the religion of ritualism. Malliṣeṇa points out they are all different kinds of causes which create what the Jaina calls 'कर्मबन्ध'. Unless बन्ध is real and not imaginary as the Sâṁkhya wants us to believe, there is no sense in speaking of मोक्ष.

(7) As regards the Sâṁkhya idea of मोक्ष that it consists of the cessation of the activity of प्रकृति, Malliṣeṇa points out that the activity of प्रकृति can never cease, inasmuch as activity is her very nature. If प्रकृति can choose to retire from the stage like an actress she may also choose to return there some day and so cause बन्ध once more! मोक्ष really consists of the real exhaustion of all Karman. The Jaina conception of the nature of आत्मन् and his मोक्ष is essentially the same as that of the Sâṁkhya with this important difference, however, that while the Sâṁkhya regards ज्ञान, क्रिया, बन्ध and मोक्ष as erroneously connected with आत्मन्, the Jaina regards them as its real states.

Stanzas XVI—XVIII: *Criticism of Buddhism.*

The authors next criticise Buddhism, particularly Buddhist Idealism.

St. XVI.

I. The identity of प्रमाण and फल (प्रमिति), according to the Buddhist, does not bring an external object into touch with consciousness, as is generally supposed, or to be more accurate, it does not make (external) reality an object of (internal) knowledge; what it does is, it defines consciousness, that is to say, it produces *conditioned* consciousness; thus, nothing enters into consciousness from without, the act of knowing being nothing but consciousness in every part.

This position is criticised on the following grounds:

The relation between प्रमाण and फल is a *causal* relation—which implies that the two cannot be simultaneous, nor can the two be successive, each enduring for a single kṣaṇa only and leaving no trace behind, for causality is not possible under such conditions. Besides, the causal relation is a relation and as such it implies two correlates, consciousness and something other than consciousness. Malliṣeṇa takes a passage from Dharmakîrti's Nyâyabindu and its ṭîkâ by Dharmottara, as a representative text of this school of thought and criticises it on the ground that no such make-shift as the substitution of व्यवस्थाप्यव्यवस्थापकभाव for जन्यजनकभाव as between संवेदन and सारूप्य can succeed in doing away with the necessity of recognising *two* instead of *one* factor in the act of knowledge (व्यवस्थाप्यव्यवस्थापकभावस्यापि च संबन्धत्वेन द्विष्ठत्वादेकस्मिन्नसंभवात्) The Jaina rejects at the same time the extreme dualism of the Nyâya Vaiśeṣika School—for the simple reason that प्रमाण and फल (प्रमिति) both belong to one and the same person, so that their unity in आत्मन् *somehow* cannot be denied altogether. Note that this hardly differs from the Buddhist's "किंचिद्रूपं प्रमाणं किंचित् प्रमाणफलम्" except in that it would substitute कथंचित् for किंचित् and reject absolute dualism even of the aspects which the Buddhist formula cannot wholly exclude.

II. Another favourite doctrine of the Buddhists is their 'क्षणभङ्गवाद'—the doctrine of Momentariness. The main ground on which it rests is that nothing can perish unless it is *in its*

nature to perish, which means that perishability is its nature, and since the nature of a thing does not depend upon anything other than the thing itself, perishability amounts to actual perishing. As regards the apparent persistence of a thing (e. g. घट) in time, the Buddhists' explanation is that here *similarity is mistaken for identity*, nothing (घट) being existent for more than a single क्षण, the seemingly persistent thing (घट) being nothing more than a series of perishing things (घटs).

The doctrine of क्षणभङ्ग is rejected by the Jaina on the ground that it is one-sided, the aspect of *permanence* (ध्रौव्य) being as necessary as that of *change*, that is, production (उत्पाद) and destruction (नाश). The former (permanence) belongs to द्रव्य and the latter (change) to its पर्यायs which are aspects of the same द्रव्य. This doctrine of *Permanence-cum—Evanescence* (i. e. persistence and change) has been criticised by the Buddhist as involving a contradiction, being as absurd as the statement that Devadatta is at once living and dying). But the Jaina sees no absurdity in such a proposition. According to him, while we are living we are also dying, for the 'petals of life' are falling away from us all the while we are living.

The argument advanced by the Buddhist philosopher Mokṣâkaragupta against the doctrine of Permanence in order to establish that of Momentariness falls flat on the Jaina, for it is welcome to him in so far as it proves one half of the whole truth in which he believes.

III. Next is criticised Buddhist *Realism*, according to which the विषय of ज्ञान is also a tenet of the Nyâya-Vaiśeṣika school, but the special trouble of the Buddhist is due to his क्षणभङ्गवाद which makes the realistic position as difficult to maintain as the idealistic position which was discussed above. Moreover, says the Jaina, it is not true that the अर्थ has to be real in order to be a कारण of ज्ञान, for there can be जलज्ञान even when there is no real जल but only मृगतृष्णिका. The Buddhist Realist may perhaps argue that the प्रकाशक (the revealer, ज्ञान)

implies the प्रकाश्य (the revealed, अर्थ)—प्रकाश्य (अर्थ) which is also the *cause* of its प्रकाशक (ज्ञान). This argument is answered by citing the example of प्रदीप and घट between which no causal relation exists although one is प्रकाशक and the other प्रकाश्य. Further, it is pointed out that the cause need not be real, it may be only ideal. For example, स्मृति is not caused by अर्थ but by ज्ञान (अनुभव) and yet it is the very breath of अनुमानप्रमाण.

Buddhist Realism is divided into two schools, that of 'Presentationists' and 'Representationists' (वैभाषिक and सौत्रान्तिक respectively), the latter being midway between Realism and Idealism. The former holds that ज्ञान is produced by अर्थ ('तदुत्पत्ति'), the latter that it bears the form ('तदाकारता') of अर्थ. The point of the realistic argument consists in this that unless the reality of अर्थ were recognised as a cause of ज्ञान, anything would be the object of that ज्ञान, and that all distinction between right and wrong knowledge would vanish. The critic dispenses with the *causality* in the अर्थ and substitutes *capacity* in the ज्ञान, by way of a rejoinder to the Realist. Moreover, he sees no likeness (तदाकारता) between ज्ञान and अर्थ (e. g. the feeling of heat is not *like* heat in the fire). Likeness, again, cannot account for epistemological relation: thus the reflection of the moon in the water does not apprehend the moon in the sky.

Taking up the Second Half of the Stanza, Malliṣeṇa attacks the school of Buddhist Idealism (विज्ञानवाद of the योगाचार) which asserts that ideas (ज्ञानs) are the only reals, there being no causal (यत्कारणकं ज्ञानं) or corresponding (यदाकारकं ज्ञानं) world of external reality. It attacks the reality of the external world, discarding the problem of epistemology, i. e. of the theory of knowledge, as an imaginary bugbear, by subjecting it to a number of dilemmas, such as, are the wholes identical with parts, that is, are the bodies nothing more than the constituting atoms, or are they something over and above them; are they permanent or transitory;

is the object in consciousness or outside it etc. None of the positions survives critical scrutiny, with the result that the belief in external world cannot be regarded as due to its external reality, but must be accounted for by the hypothesis of वासना due to अविद्या (nescience).

This is criticised as follows :

This idealistic position which makes our belief in external reality a huge mis-take involves the reality of something that is mis-taken, that is taken amiss, which strikes at the root of this extreme Idealism.

All knowledge is of something which is other than the knowledge itself and is the विषय of that knowledge; it is a क्रिया which is directed towards something which is other than the क्रिया itself.

(3) Atoms are real. That body is not separable from them is no reason why their reality should be questioned.

Moreover, it possesses objective reality which is the same for all subjects.

(4) The object is not the subject. The fact of self-consciousness implies that there is a reality other than the self from the consciousness of which the consciousness of the self is distinguished.

Moreover, an object possesses objective reality, which is the same for all subjects.

(5) The अनुमान by which the non-existence of external reality is sought to be proved can have no value against the evidence of प्रत्यक्ष which decides the question in favour of its existence.

(6) That ज्ञान and its विषय are found *together* is an unwarranted assumption.

(7) The two have distinct natures, e.g. one is experienced as in us, the other outside us; one is already there, which the other notes afterwards.

The last stanza and its commentary having dealt with the क्षणभङ्गवाद which was held by the Vaibhâṣika in common with all the other schools of Buddhism, and also the half-hearted and the extreme forms of Idealism (विज्ञानवाद) which were propounded by the Sautrântika and the Yogâcâra schools, the critics next proceed to attack the शून्यवाद of the Mâdhyamikas, generally understood to mean the doctrine of absolute and universal emptiness or void. It may be noted here that the doctrine attributed to the Mâdhyamika in the stanza quoted by Malliṣeṇa towards the close of his commentary on St. XVII makes शून्यता a synonym of the Para-Brahman of the S'âmkara Vedântins, and many a Mahâyana hymn may be cited in which शून्यता is glorified in language which the Vedântin employs with respect to his Para-Brahman. But this is really a confusion between शून्यता and पूर्णता.*

Malliṣeṇa, like all other critics of the 'शून्यवाद', has under·stood it as the doctrine of the Universal Void or Emptiness.

An obvious objection which is taken to this doctrine is that it leaves no ground even for itself to stand upon, its only logical position being dead *silence* ("ततश्चास्य मूकतैव युक्ता, न पुनः शून्यवादोपन्यासाय तुण्डताण्डवाडम्बरम्"). Yet it may be interesting to examine the argument which is advanced in its favour. The argument is a sophistical demonstration of the logical impossibility of the supposed reals, viz., प्रमातृ, प्रमेय, प्रमाण and प्रमिति. This, says Malliṣeṇa, the Buddhist tries to prove in extenso in "तत्त्वोपप्लवसिंह," a work which is not now available, but which was, according to its author, as the title implies, 'a lion that confounds the animals of Reality'.

This postion is met by showing that प्रमातृ etc. are by no means impossible; on the contrary they can be shown to be undeniably real. In fact, शून्यवाद, if it is to be worthy of

* ॐ पूर्णमिदं पूर्णमदः पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥—Upaniṣad.

14

credence, must be supported by प्रमाण, which, however, will mean negation of शून्यवाद.

St. XVIII.

Next, we have a criticism of the Buddhist's क्षणभङ्गवाद in its application to the problem of आत्मन्. In the absence of an abiding आत्मन्, says the critic,—

(1) There can be no moral retribution in our life (भव). The Buddhist no doubt substitutes for the single आत्मन् a *series* of विज्ञानs of which each preceding one is supposed to be connected with each succeeding one, and vice versa. But who connects them ? What is the synthesizing principle ?

(2) Similarly, there is no room for Liberation (मोक्ष). For, if there is no आत्मन्, who is to be liberated from the bondage of life (संसार) ? The heap of वासनाs which has to be destroyed must belong to some one, to that very person who has been in bondage (बद्ध).

(3) Even such an ordinary psychological fact as स्मृति—memory—becomes impossible.

St. XIX.

The doctrine next criticised is that of वासना—a kind of makeshift which is intended to do duty for the principle of permanence which the Buddhist denies.

All Indian philosophers are firm believers in transmigration of the soul, and the Buddhist who denies the existence of the soul and yet believes in transmigration has somehow to make it possible. This he does by adopting the theory of वासना. It is intended to account for the apparent continuity of our psychic experience not only in our present life but also of the past and the future. But the problem which he has to face is that of reconciliation of वासना with क्षणभङ्ग. Hemacandra and with him Mallişeņa point out how the task is hopeless. They put forward this trilemma: Are वासना and क्षणसंतति (lit, a series of moments, that is, things conditioned

by moments) one (अभेद) or separate (भेद) or neither one nor the other (अनुभय) ?—and they show how the Buddhist doctrine breaks on the spearheads of this triśûla. In the first case, nothing is gained by the addition of वासना. In the second case, it must either conform to the principle of क्षणभङ्ग or not—if it does, no gain; if it does not, the universality of the principle of क्षणभङ्ग is so far violated. In the third case, the position becomes impossible; for it must be either the one (अभेद) or the other (भेद). There is only one escape from all these troubles and that is by taking shelter underneath the shady tree of the Jaina doctrine of अनेकान्त i. e. भेद-cum-अभेद. As Hemacandra graphically puts it, the birds that have flown away far across the wide sea without any hope of finding a resting place must return to their home (स्याद्वाद) on the mast of the ship.

In connection with this hypothesis—भेदाभेद—Malliṣeṇa generously points out how in this case the difference is merely verbal. He says : " स्याद्वादवादिनामपि हि प्रतिक्षणं नवनवपर्याय-परंपरोत्पत्तिरभिमतैव । तथा च क्षणिकत्वम् । अतीतानागतवर्तमानपर्याय-परंपरानुसंधायकं चान्वयिद्रव्यम् तच्च वासनेति संज्ञान्तरभावेऽप्यभिमतमेव । न खलु नामभेदाद् वादः कोऽपि कोविदानाम् ". Malliṣeṇa further shows how वासना is not possible without a permanent something on which it should rest (" स्थिरस्य संबद्धस्य च वस्त्रादेर्मृगमदादिना वास्यत्वं दृष्टम् ").

Stanza XX: *Criticism of the Cârvâka.*

St. XX.

The two principles of the Cârvâka which are criticised are:

(1) That प्रत्यक्ष is the only प्रमाण; not even अनुमान.

(2) That there is no soul, beyond the physical body, and consequently, there is no moral responsibility and no life after death (भूतचिद्वाद).

1. The first is impugned on the following grounds: As a result of your doctrine, we cannot be aware of the mind

of other persons, as we have evidently no प्रत्यक्ष or direct experience of it. We cannot classify our cognitions as प्रमाण and अप्रमाण (न च संनिहितार्थबलेनोत्पद्यमानं पूर्वापरपरामर्शशून्यं प्रत्यक्षं पूर्वापरकालभाविनीनां ज्ञानव्यक्तीनां प्रामाण्याप्रामाण्यव्यवस्थापकं निमित्तमुपलक्षयितुं क्षमते ।) Moreover, we should not forget that we call even प्रत्यक्ष a प्रमाण on the strength of our experience and generalisation from observed cases—that is to say, our belief in the credibility of our senses rests on Inference.

2. The materialistic view of the soul is condemned by M. with the help of a long passage quoted from " Dravyâlaṁkâra ", where it is shown that consciousness is not the product of भूतs (न भूतकार्यमुपयोगः), and even an ugly and a diseased body may hold a beautiful and healthy soul.

Stanzas XXI-XXX: *The Jaina Doctrine.*

St. XXI: *Nature of Reality: Permanence and Change.*

The authors assert here the Jaina doctrine of Reality as possessed of उत्पाद, व्यय and ध्रौव्य as against those who obsessed by the phenomena of the first two overlook the third, viz. the Buddhists, and also those who contrariwise, notice only the third and forget the first two, for example, the S'âṁkara Vedântins. Recall here the pre-Buddhistic schools noted in the Brahmajâlasutta, the Eternalists (सस्सतिका=शाश्वतिकाः) and the non-eternalists (असस्सतिका=अशाश्वतिकाः).

St. XXII: *Reality, manysided.*

The Jaina insistence upon the entirety or wholeness of truth has found expression in various forms. In the preceding stanza it was expressed as " उत्पादव्ययध्रौव्ययुक्तं सत्. " Now, another proposition in which it is set forth is " अनन्तधर्मात्मकमेव तत्त्वम् "—Truth has numberless aspects.

St. XXIII: *"Saptabhaṁgî".*

Next the author points out how one and the same thing may be viewed synthetically or analytically as *one* or as *many* —as one substance or as many attributes or modes. This fact

has been expressed in the famous 'set of Seven Forms'—the "सप्तभङ्गी". For a full statement of the seven forms see the text of the Syâdvâdamañjarî under St. XXII and the Notes thereon.

St. XXIV : *No contradiction of the so called opposites.*

The authors now explain how the synthesis of opposites recommended in the previous Stanza does not involve any contradiction, inasmuch as the opposites are conditioned by 'upâdhis' and are relative to them.

St. XXV : *No contradiction—continued: application of the principle to certain problems of philosophy.*

The सप्तभङ्गी, be it remembered, gives only the *forms* of the propositions. The principle has to be applied to actual problems of philosophy on which various schoolmen stand divided owing to their viewpoints being partial. The problems are: (1) Permanence versus Change; (2) Universal versus Particular; (3) Expressible versus Inexpressible i.e. Positivism versus Transcendentalism; (4) Being versus Non-being, or Real versus Unreal.

St. XXVI : *Criticism of the absolutely eternal and the absolutely transitory.*

Of these the author takes up the first, viz., Permanence versus Change or the Eternal versus the Transitory, and shows how the arguments of the two sides destroy each other, with the result that the doctrine of Syâdvâda emerges from their mutual conflict. Compare here Kant's philosophy of antinomies.

St. XXVII : *Criticism of Absolutism continued.*

Absolutists cannot solve the problems of सुख-दुख (भोग), पुण्य-पाप, and बन्ध-मोक्ष.

St. XXVIII : *Durnaya, Naya, and Pramâṇa.*

The author next refers to the Jaina philosophy of दुर्नय, नय and प्रमाण. (1) दुर्नय is the mis-take of *partial* truth for the

whole truth, to the exclusion of the latter; (2) नयs are the statements of partial truths, without the recognition that they are only partial; and (3) प्रमाण is the *whole* truth. The commentator here sets forth the famous doctrine of the नयs.

The doctrine of नय or Relativity of Knowledge is the most remarkable contribution of Jainism to Philosophy. It means that Reality is conveyed (from √नी) to the mind differently from different points of view, or to take it from the other end, the mind approaches Reality differently from different points of view. A very useful and fundamental division of नयs which is made is that into (1) द्रव्यास्ति(र्थि)क नय and (2) पर्यायास्ति(र्थि)क नय, i. e. (1) that which regards द्रव्य or substance and (2) that which regards पर्याय or modes. The नयs are also divided into five, six or seven kinds. Of these seven the first four are अर्थनयs and the last three शब्दनयs, or to adopt the fundamental divisions of द्रव्य and पर्याय, the first three are द्रव्यार्थिक and the last four पर्यायार्थिक. These are:

(1) नैगम—(variously derived) which notes both the universal and the particular;

(2) संग्रह—which notes the universal only;

(3) व्यवहार—the point of view of daily life, which does not penetrate below the surface of things;

(4) ऋजुसूत्र—It confines itself to the present, and takes note of actual phenomena—the attributes or changes occurring in a substance and not the substance itself.

(5) शब्द—which pays attention to the character of the world. This, while it distinguishes between the different connotations of words, does not do so in regard to their denotation.

(6) समभिरूढ—This नय goes further in the direction of attaching much importance to the form of the word. It makes distinctions of things corresponding to the etymologies of the words. Thus no two synonyms denote the same thing.

(7) एवंभूत—This नय takes the word as signifying an object while it possesses the क्रिया connoted by the etymology.

The Jaina observes that the Naiyâyika and the Vaiśeṣika systems are cases of नैगमनय, so far as they recognise both the universal (सामान्य) and the particular (विशेष). The Vedânta and the Sâṁkhya are cases of संग्रहनय, the former because it merges all particulars in the universal सत्, and the latter in so far as it represents an attempt at marshalling particulars under certain general concepts, and regarding the former as forms of the latter, the effect being contained in the cause. The Cârvâka's way of looking at things is that of व्यवहारनय. The Buddhists follow ऋजुसूत्रनय, inasmuch as they accept phenomena and deny the noumenon; and the grammarians are by the very nature of their profession inclined towards शब्द etc.

It is obvious that the whole set of seven Nayas could not have come into existence all at once. As a matter of fact, they represent a gradual growth as is a apparent from the number of नयs recognised at different times (see Notes) and also from their varying importance.

See the text of the Syâdvâdamañjarî on this Stanza and Notes for fuller account.

St. XXIX : *The number of Souls.*

The souls are divisible into six kinds but their number is endless.

St. XXX : *The doctrine of the Syâdvâda, all comprehensive and impartial.*

The teaching of the Master is important and all-comprehensive. He has hardly to attack any of the other systems, as those systems quarrel inter se and destroy each other. In other words, the Jaina philosophy emerges as the whole truth from the mutual conflicts of the several schools. For details see the Text, Notes and Supplementary Notes with Appendices.

This note presupposes the existence of the schools. If so, it only points to a late date of the Jaina point of view

as compared with that of the other schools between which it mediates.

Stanzas XXXI-XXXII: *Conclusion.*

St. XXXI-XXXII: *Praise of the Lord Mahâvîra.*

The Dvâtriṁśikâ closes as it began with the panegyric of the Tîrthaṁkara.

V. AN ESTIMATE OF THE WORK.

From this short summary of the contents the reader will see what a wide range of philosophical topics has been covered in this work. None of the rival sytems has been examined in its entirety, but only those tenets have been selected for criticism from each of the schools in which the Jaina is really interested, and these are some of the greatest problems of religion and philosophy, such as the problems of the universal and the particular, the permanent and the changing, God, the one, omnipresent, omnipotent and omniscient maker of the world, the sanctity of all life, the state of the liberated souls, the theory of knowledge, the nature of Reality etc. The examination, moreover, is not in the nature of irresponsible criticism (vitaṇḍâ), but care has been taken to present the Jaina view on each of the points that has been considered; and, in conclusion, a clear statement has been made of the Jaina doctrine of Naya and Syâdvâda—in one phrase, of the Relativity of Knowledge which is determined by the point of view from which Reality is approached. For this great achievement it is difficult to apportion credit between Hemacandra, the author of the Anyayogavyavaccheda-Dvâtriṃśikâ, and Malliṣeṇa, the writer of the Syâdvâdamañjarî. The former is a genuine devotional lyric, pulsating with reverence for the Master, and is at the same time a review of some of the tenets of the rival schools on which the Jaina sees reason to differ. Devotion and thought are here haphily blended together in one whole, and are expressed in such noble and dignified language that it deserves to rank as a piece of literature no less than that

of philosophy. To Malliṣeṇa belongs the credit of constructing a systematic work out of the brief critical remarks which Hemacandra throws out at random. His knowledge of the different systems, however, is not equally deep. In some of the systems such as the Nyâya–Vaiśeṣika he is evidently well read, while of others such as the Vedânta he has touched only the fringe. But on the whole, he has conducted the examination of the different systems with knowledge and mastery of detail, and that too, in a wonderfully lucid style, which lifts his work from the position of a mere parasitical commentary to that of an original work of independent value.

॥ ॐ नमः श्रीसर्वज्ञाय ॥

श्रीमल्लिषेणसूरिप्रणीता

स्याद्वादमञ्जरी

श्रीहेमचन्द्रसूरिनिर्मितान्ययोगव्यवच्छेद-
द्वात्रिंशिकास्तवनटीकारूपा

यस्य ज्ञानमनन्तवस्तुविषयं यः पूज्यते दैवतै-
र्नित्यं यस्य वचो न दुर्नयकृतैः कोलाहलैर्लुप्यते ।
रागद्वेषमुखा द्विषां च परिषत् क्षिप्ता क्षणाद्येन सा
स श्रीवीरविभुर्विधूतकलुषां बुद्धिं विधत्तां मम ॥ १ ॥

निःसीमप्रतिभैकजीवितधरौ निःशेषभूमिस्पृशौ
पुण्यौघेन सरस्वतीसुरगुरू स्वाङ्गैकरूपौ दधत् ।
यः स्याद्वादमसाधयन्निजवपुर्दृष्टान्ततः सोस्तु मे
सद्बुद्ध्यम्बुनिधिप्रबोधविधये श्रीहेमचन्द्रः प्रभुः ॥ २ ॥

ये हेमचन्द्रं मुनिमेतदुक्त-
ग्रन्थार्थसेवामिषतः श्रयन्ते ।
संप्राप्य ते गौरवमुज्ज्वलानां
पदं कलानामुचितं भवन्ति ॥ ३ ॥

मातर्भारति संनिधेहि हृदि मे येनेयमाप्तस्तुते-
र्निर्मातुं विवृतिं प्रसिद्ध्यति जवादारम्भसंभावना ।
यद्वा विस्मृतमोष्ठयोः स्फुरति यत्सारस्वतः शाश्वतो
मन्त्रः श्रीउदयप्रभेतिरचनारम्यो ममाहर्निशम् ॥ ४ ॥

इह हि विषमदुःषमाररजनितिमिरतिरस्कारभास्करानुकारिणा वसुधातलावतीर्णसुधासारिणीदेश्यदेशनावितानपरमार्हतीकृतश्री-कुमारपालक्ष्मापालप्रवर्तिताभयदानाभिधानजीवातुसंजीवितनाना-जीवप्रदत्ताशीर्वादमाहात्म्यकल्पावधिस्थायिविशदयशःशरीरेण निरवद्यचातुर्विद्यनिर्माणैकब्रह्मणा श्रीहेमचन्द्रसूरिणा जगत्प्रसिद्धश्री-सिद्धसेनदिवाकरविरचितद्वात्रिंशद्द्वात्रिंशिकानुसारिश्रीवर्धमानजि-नस्तुतिरूपमयोगव्यवच्छेदान्ययोगव्यवच्छेदाभिधानं द्वात्रिंशि-काद्वितयं विद्वज्जनमनस्तत्त्वावबोधनिबन्धनं विदधे। तत्र च प्रथम-द्वात्रिंशिकायाः सुखोन्नेयत्वाद्व्याख्यानमुपेक्ष्य द्वितीयस्यास्तस्या निःशेषदुर्वादिपरिषदधिक्षेपदक्षायाः कतिपयपदार्थविवरणकरणेन स्वस्मृतिवीजप्रबोधविधिर्विधीयते। तस्याश्चेदमादिकाव्यम्—

अनन्तविज्ञानमतीतदोष—
मबाध्यसिद्धान्तममर्त्यपूज्यम्।
श्रीवर्धमानं जिनमाप्तमुख्यं
स्वयंभुवं स्तोतुमहं यतिष्ये॥ १॥

श्रीवर्धमानं जिनमहं स्तोतुं यतिष्य इति क्रियासंबन्धः। किं-विशिष्टम्। अनन्तमप्रतिपाति विशिष्टं सर्वद्रव्यपर्यायविषयत्वे-नोत्कृष्टं ज्ञानं केवलाख्यं विज्ञानं ततोनन्तं विज्ञानं यस्य सोनन्त-विज्ञानस्तम्। तथातीता निःसत्ताकीभूतत्वेनातिक्रान्ता दोषा रा-गादयो यस्मात्स तथा तम्। तथाबाध्यः परैर्बाधितुमशक्यः सिद्धान्तः स्याद्वादश्रुतलक्षणो यस्य स तथा तम्। तथामर्त्या देवास्तेषामपि पूज्यमाराध्यम्॥

अत्र च श्रीवर्धमानस्वामिनो विशेषणद्वारेण चत्वारो मूलातिशयाः प्रतिपादिताः । तत्रानन्तविज्ञानमित्यनेन भगवतः केवलज्ञानलक्षणविशिष्टज्ञानानन्त्यप्रतिपादनाज्ज्ञानातिशयः । अतीतदोषमित्यनेनाष्टादशदोषसंक्षयाभिधानादपायापगमातिशयः । अबाध्यसिद्धान्तमित्यनेन कुतीर्थिकोपन्यस्तकुहेतुसमूहाशक्यबाधस्याद्वादरूपसिद्धान्तप्रणयनभणनाद्वचनातिशयः । अमर्त्यपूज्यमित्यनेनाकृत्रिमभक्तिभरनिर्भरसुरासुरनिकायनायकनिर्मितमहाप्रातिहार्यसपर्यापरिज्ञापनात्पूजातिशयः ॥

अत्राह परः । अनन्तविज्ञानमित्येतावदेवास्तु नातीतदोषमिति । गतार्थत्वात् । दोषात्ययं विनात्यन्तविज्ञानत्वस्यानुपपत्तेः ॥ अत्रोच्यते । कुनयमतानुसारिपरिकल्पिताप्तव्यवच्छेदार्थमिदम् । तथा चाहुराजीविकनयानुसारिणः—

ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वागच्छन्ति भूयोपि भवं तीर्थनिकारतः ॥

इति । तन्नूनं न तेतीतदोषाः । कथमन्यथा तेषां तीर्थनिकारदर्शनेपि भवावतारः ॥

आह । यद्येवमतीतदोषमित्येवास्त्वनन्तविज्ञानमित्यतिरिच्यते । दोषात्ययेवश्यंभावित्वादनन्तविज्ञानत्वस्य ॥ न । कैश्चिद्दोषाभावेपि तदनभ्युपगमात् । तथा च तद्वचनम्—

सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥

तथा—तस्मादनुष्ठानगतं ज्ञानमस्य विचार्यताम् ।
प्रमाणं दूरदर्शी चेदेते गृध्रानुपास्महे ॥

तन्मतव्यपोहार्थमनन्तविज्ञानमित्यदुष्टमेव । विज्ञानानन्त्यं विना एकस्याप्यर्थस्य यथावत्परिज्ञानाभावात् । तथा चार्षम्—

जे एगं जाणइ से सव्वं जाणइ ।
जे सव्वं जाणइ से एगं जाणइ ॥

तथा— एको भावः सर्वथा येन दृष्टः
सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा
एको भावः सर्वथा तेन दृष्टः ॥

इति ॥

ननु तर्ह्यबाध्यसिद्धान्तमित्यपार्थकम् । यथोक्तगुणयुक्तस्याव्यभिचारिवचनत्वेन तदुक्तसिद्धान्तस्य बाधायोगात् ॥ न । अभिप्रायापरिज्ञानात् । निर्दोषपुरुषप्रणीत एवाबाध्यसिद्धान्तो नापरेऽपौरुषेयाद्या असंभवादिदोषाघ्रातत्वात् इति ज्ञापनार्थम् । आत्ममात्रतारकमूकान्तकृत्केवल्यादिरूपमुण्डकेवलिनो यथोक्तसिद्धान्तप्रणयनासमर्थस्य व्यवच्छेदार्थं वा विशेषणमेतत् ॥

अन्यस्त्वाह । अमर्त्यपूज्यमिति न वाच्यम् । यावता यथोद्दिष्टगुणगरिष्ठस्य त्रिभुवनविभोरमर्त्यपूज्यत्वं न कथंचन व्यभिचरतीति ॥ सत्यम् । लौकिकानां ह्यमर्त्या एव पूज्यतया प्रसिद्धास्तेषामपि भगवानेव पूज्य इति विशेषणेनानेन ज्ञापयन्नाचार्यः परमेश्वरस्य देवाधिदेवत्वमावेदयति ॥

एवं पूर्वार्धे चत्वारोतिशया उक्ताः ॥

अनन्तविज्ञानत्वं च सामान्यकेवलिनामप्यवश्यं भावीत्यतस्तद्व्यवच्छेदाय श्रीवर्धमानमिति विशेष्यपदमपि विशेषणरूपतया

व्याख्यायते ॥ श्रिया चतुस्त्रिंशदतिशयसमृद्ध्यनुभवात्मकभावार्हन्त्यरूपया वर्धमानं वर्धिष्णुम् ॥ नन्वतिशयानां परिमिततयैव सिद्धान्ते प्रसिद्धत्वात्कथं वर्धमानतोपपत्तिः ॥ इति चेन्न । यथा निशीथचूर्णौ भगवतां श्रीमदर्हतामष्टोत्तरसहस्रसंख्यबाह्यलक्षणसंख्याया उपलक्षणत्वेनान्तरङ्गलक्षणानां सत्त्वादीनामानन्त्यमुक्तम् । एवमतिशयानामधिकृतपरिगणनायोगेप्यपरिमितत्वमविरुद्धम् । ततो नातिशयश्रिया वर्धमानत्वं दोषाश्रय इति ॥

अतीतदोषता चोपशान्तमोहगुणस्थानवर्तिनामपि संभवतीत्यतः क्षीणमोहाख्याप्रतिपातिगुणस्थानप्राप्तिप्रतिपत्त्यर्थं जिनमिति विशेषणम् । रागादिजेतृत्वाज्जिनः । समूलकाषंकषितरागादिदोष इति । अबाध्यसिद्धान्तता च श्रुतकेवल्यादिष्वपि दृश्यतेतस्तदपोहायाप्तमुख्यमिति विशेषणम् । आप्तिर्हि रागद्वेषमोहानामैकान्तिक आत्यन्तिकश्च क्षयः । सा येषामस्ति ते खल्वाप्ताः । अर्शादित्वान्मत्वर्थीयोऽच्प्रत्ययः । तेषु मध्ये मुखमिव सर्वाङ्गानां प्रधानत्वेन मुख्यम् । शाखादेर्यः इति तुल्ये यः । अमर्त्यपूज्यता च तथाविधगुरूपदेशपरिचर्यापर्याप्तविद्याचरणसंपन्नानां सामान्यमुनीनामपि न दुर्घटा । अतस्तन्निराकरणाय स्वयंभुवमिति विशेषणम् । स्वयमात्मनैव परोपदेशनिरपेक्षतयावगततत्त्वो भवतीति स्वयंभूः स्वयं संबुद्धः । तमेवंविधं चरमजिनेन्द्रं स्तोतुं स्तुतिविषयीकर्तुमहं यतिष्ये यत्नं करिष्यामि ॥ अत्र चाचार्यो भविष्यत्कालप्रयोगेण योगिनामप्यशक्यानुष्ठानं भगवद्गुणस्तवनं मन्यमानः श्रद्धामेव स्तुतिकरणेऽसाधारणं कारणं ज्ञापयन्यत्नकरणमेव मदधीनं न पुनर्यथावस्थितभगवद्गुणस्तवनसिद्धिरिति सूचितवान् । अहमिति च गतार्थत्वेपि परोपदेशान्यानुवृत्त्यादिनिरपेक्षतया निजश्रद्धयैव स्तुतिप्रारम्भ इति ज्ञापनार्थम् ॥

अथवा । श्रीवर्धमानादिविशेषणचतुष्टयमनन्तविज्ञानादिपदचतुष्टयेन सह हेतुहेतुमद्भावेन व्याख्यायते । यत एव श्रीवर्धमानमत एवानन्तविज्ञानम् । श्रिया कृत्स्नकर्मक्षयाविर्भूतानन्तचतुष्कसंपद्रूपया वर्धमानम् । यद्यपि श्रीवर्धमानस्य परमेश्वरस्यानन्तचतुष्कसंपत्तेरुत्पत्त्यनन्तरं सर्वकालं तुल्यत्वाच्चयापचयौ न स्तस्तथापि निरपचयत्वेन शाश्वतिकावस्थानयोगाद्वर्धमानत्वमुपचर्यते । यद्यपि च श्रीवर्धमानविशेषणेनानन्तचतुष्कान्तर्भावित्वेनानन्तविज्ञानत्वमपि सिद्धं तथाप्यनन्तविज्ञानस्यैव परोपकारसाधकतमत्वाद्भगवत्प्रवृत्तेश्च परोपकारैकनिबन्धनत्वादनन्तविज्ञानत्वं शेषानन्तत्रयात्पृथङ्निर्धार्याचार्येणोक्तम् ॥

ननु यथा जगन्नाथस्यानन्तविज्ञानं परार्थं तथानन्तदर्शनस्य केवलज्ञानपरपर्यायस्य पारार्थ्यमव्याहतमेव । केवलज्ञानकेवलदर्शनाभ्यामेव हि स्वामी क्रमप्रवृत्तिभ्यामुपलब्धं सामान्यविशेषात्मकं पदार्थसार्थं परेभ्यः प्ररूपयति । तत्किमर्थं तन्नोपात्तम् ॥ इति चेदुच्यते । विज्ञानशब्देन तस्यापि संग्रहाददोषः । ज्ञानमात्राया उभयत्रापि समानत्वात् । य एव ह्यभ्यन्तरीकृतसमताख्यधर्मा विषमताधर्मविशिष्टा ज्ञानेन गम्यन्तेर्थास्त एव ह्यभ्यन्तरीकृतविषमताधर्माः समताधर्मविशिष्टा दर्शनेन गम्यन्ते । जीवस्वाभाव्यात् । सामान्यप्रधानमुपसर्जनीकृतविशेषमर्थग्रहणं दर्शनमुच्यते । तथा प्रधानविशेषमुपसर्जनीकृतसामान्यं च ज्ञानमिति ॥

तथा यत एव जिनमत एवातीतदोषम् । रागादिजेतृत्वाद्धि जिनः । न चाजिनस्यातीतदोषता ॥ तथा यत एवाप्तमुख्यमत एवाबाध्यसिद्धान्तम् । आप्तो हि प्रत्ययित उच्यते । तत आप्तेषु मुख्यं श्रेष्ठमाप्तमुख्यम् । आप्तमुख्यत्वं च प्रभोरविसंवादिवचनतया

विश्वविश्वासभूमित्वात् । अत एवाबाध्यसिद्धान्तम् । नहि यथावज्ज्ञानावलोकितवस्तुवादी सिद्धान्तः कुनयैर्बाधितुं शक्यते ॥ यत एव स्वयंभुवमत एवामर्त्यपूज्यम् । पूज्यते हि देवदेवो जगत्त्रयविलक्षणलक्षणेन स्वयंसंबुद्धत्वगुणेन सौधर्मेन्द्रादिभिरमर्त्यैरिति ॥

अत्र च श्रीवर्धमानमिति विशेषणतया यद्व्याख्यातं तदयोगव्यवच्छेदाभिधानप्रथमद्वात्रिंशिकाप्रथमकाव्यतृतीयपादवर्तमानं श्रीवर्धमानाभिधमात्मरूपम् इति विशेष्यमनुवर्तमानं बुद्धौ संप्रधार्य विज्ञेयम् । तत्र ह्यात्मरूपमिति विशेष्यपदम् । आवृत्त्या वा विशेषणमपि विशेष्यतया व्याख्येयम् ॥

इति प्रथमवृत्तार्थः ॥ १ ॥

अस्यां च स्तुतावन्ययोगव्यवच्छेदाधिकृतः तस्य च तीर्थान्तरीयपरिकल्पिततत्त्वाभासनिरासेन तेषामाप्तत्वव्यवच्छेदः स्वरूपम् । तच्च भगवतो यथावस्थितवस्तुतत्त्ववादित्वख्यापनेनैव प्रामाण्यमश्नुते । अतः स्तुतिकारस्त्रिजगद्गुरोर्निःशेषगुणस्तुतिश्रद्धालुरपि सद्भूतवस्तुवादित्वाख्यं गुणविशेषमेव वर्णयितुमात्मनोऽभिप्रायमाविष्कुर्वन्नाह—

> अयं जनो नाथ तव स्तवाय
> गुणान्तरेभ्यः स्पृहयालुरेव ।
> विगाहतां किंतु यथार्थवाद-
> मेकं परीक्षाविधिदुर्विदग्धः ॥ २ ॥

हे नाथ अयं मल्लक्षणो जनः तव गुणान्तरेभ्यो यथार्थवाद-

व्यतिरिक्तेभ्योनन्यसाधारणशारीरलक्षणादिभ्यः स्पृहयालुरेव श्रद्धालुरेव। किमर्थम्। स्तवाय स्तुतिकरणाय। इयं तादर्थ्ये चतुर्थी। पूर्वत्र तु—स्पृहेर्व्याप्यं वा इतिलक्षणा। तव गुणान्तराण्यपि स्तोतुं स्पृहावानेवायं जन इति भावः॥ ननु यदि गुणान्तरस्तुतावपि स्पृहयालुता तत्किमर्थं तत्रोपेक्षा। इत्याशङ्क्योत्तरार्धमाह। किंत्वित्यभ्युपगमविशेषद्योतने निपातः। एकमेकमेव। यथार्थवादं यथावस्थितवस्तुतत्त्वप्रख्यापनाख्यं त्वदीयं गुणम्। अयं जनो विगाहतां स्तुतिक्रियया समन्ताद्व्याप्नोतु। तस्मिन्नेकस्मिन्नपि हि गुणे वर्णिते तन्नान्तरीयदैवतेभ्यो वैशिष्ट्यख्यापनद्वारेण वस्तुतः सर्वगुणस्तवनसिद्धेः॥

अथ प्रस्तुतगुणस्तुतिः सम्यक्परीक्षाक्षमाणां दिव्यदृशामेवौचितीमञ्चति नार्वाग्दृशां भवादृशामित्याशङ्कां विशेषणद्वारेण निराकरोति। यतोयं जनः परीक्षाविधिदुर्विदग्धोधिकृतगुणविशेषपरीक्षणविधौ दुर्विदग्धः पण्डितंमन्य इति यावत्। अयमाशयः। यद्यपि जगद्गुरोर्यथार्थवादित्वगुणपरीक्षणं मादृशां मतेरगोचरस्तथापि भक्तिश्रद्धातिशयात् तस्यामहमात्मानं विदग्धमिव मन्य इति विशुद्धश्रद्धाभक्तिव्यक्तिमात्ररूपत्वात्स्तुतेः॥

इति वृत्तार्थः॥ २॥

अथ ये कुतीर्थ्याः कुशास्त्रवासनावासितस्वान्ततया त्रिभुवनस्वामिनं स्वामित्वेन न प्रतिपन्नाः तानपि तत्त्वविचारणां प्रति शिक्षयन्नाह—

गुणेष्वसूयां दधतः परेमी
मा शिश्रियन्नाम भवन्तमीशम्।

तथापि संमील्य विलोचनानि
विचारयन्तां नयवर्त्म सत्यम् ॥ ३ ॥

अमी इति अदसस्तु विप्रकृष्टे इति वचनात्तत्त्वातत्त्वविमर्शबाह्यतया दूरीकरणार्हत्वाद्विप्रकृष्टाः परे कुतीर्थिकाः भवन्तं त्वाम् अनन्यसामान्यसकलगुणनिलयमपि मा ईशं शिश्रियन्मा स्वामित्वेन प्रतिपद्यन्ताम् । यतो गुणेष्वसूयां दधतः गुणेषु बद्धमत्सराः । गुणेषु दोषाविष्करणं ह्यसूया । यो हि यत्र गुणे मत्सरीभवति स तदाश्रयं नानुरुध्यते । यथा माधुर्यमत्सरी करभः पुण्ड्रेक्षुकाण्डम् । गुणाश्रयश्च भवान् ॥ एवं परतीर्थिकानां भगवदाज्ञाप्रतिपत्तिं प्रतिषिध्य स्तुतिकारो माध्यस्थ्यमिवास्थाय तान्प्रति हितशिक्षामुत्तरार्धेनोपदिशति । तथापि त्वदाज्ञाप्रतिपत्तेरभावेपि । लोचनानि नेत्राणि । संमील्य मिलितपुटीकृत्य । सत्यं युक्तियुक्तम् । नयवर्त्म न्यायमार्गम् । विचारयन्तां विमर्शविषयीकुर्वन्तु ॥

अत्र च विचारयन्तामित्यात्मनेपदेन फलवत्कर्तृविषयेणैवं ज्ञापयत्याचार्यो यदवितथनयपथविचारणया तेषामेवफलं वयं केवलमुपदेष्टारः । किं तत्फलम् इति चेत्प्रेक्षावत्तेति ब्रूमः । संमील्य विलोचनानीति च वदतः प्रायस्तत्त्वविचारणमेकाग्रताहेतुनयननिमीलनपूर्वकं लोके प्रसिद्धमित्यभिप्रायः ॥ अथवा अयमुपदेशस्तेभ्योऽरोचमान एवाचार्येण वितीर्यते । ततोऽस्वदमानोप्ययं कटुकौषधपानन्यायेनायतिसुखत्वाद्भवद्भिर्नेत्रे निमील्य पेय एवेत्याकूतम् ॥

ननु च यदि पारमेश्वरे वचसि तेषामविवेकातिरेकादरोचकता तत्किमर्थं तान् प्रत्युपदेशक्लेश इति ॥ नैवम् । परोपकारसार-

प्रवृत्तीनां महात्मनां प्रतिपाद्यगतां रुचिमरुचिं वानपेक्ष्य हितोपदेशप्रवृत्तिदर्शनात् । तेषां हि परार्थस्यैव स्वार्थत्वेनाभिमतत्वात् । न च हितोपदेशादपरः पारमार्थिकः परार्थः । तथा चार्षम् ।

रूसउ वा परो मा वा विसं वा परियत्तउ ।
भासियव्वा हिया भासा सपक्खगुणकारिया ॥

इति । उवाच च वाचकमुख्यः—

न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोनुग्रहबुद्ध्या वक्तुस्त्वेकान्ततो भवति ॥ १ ॥

इति वृत्तार्थः ॥ ३ ॥

अथ यथावन्नयवर्त्मविचारमेव प्रपञ्चयितुं पराभिप्रेततत्त्वानां प्रामाण्यं निराकुर्वन्नादितस्तावत्काव्यषट्केनौलूक्यमताभिमततत्त्वानि दूषयितुकामस्तदन्तःपातिनौ प्रथमतरं सामान्यविशेषौ दूषयन्नाह—

स्वतोनुवृत्तिव्यतिवृत्तिभाजो
भावा न भावान्तरनेयरूपाः ।
परात्मतत्त्वादतथात्मतत्त्वाद्-
द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥ ४ ॥

अभवन् भवन्ति भविष्यन्ति चेति भावाः पदार्था आत्मपुद्गलादयस्ते । स्वत इति सर्वं हि वाक्यं सावधारणमामनन्ति

इति । स्वत एव आत्मीयस्वरूपादेव । अनुवृत्तिव्यातिवृत्तिभाजः । एकाकारा प्रतीतिरेकशब्दवाच्यता चानुवृत्तिः । व्यतिवृत्तिः व्यावृत्तिः । सजातीयविजातीयेभ्यः सर्वथा व्यवच्छेदः । ते उभे अपि संवलिते भजन्त आश्रयन्तीति अनुवृत्तिव्यतिवृत्तिभाजः । सामान्यविशेषोभयात्मका इत्यर्थः ॥

अस्यैवार्थस्य व्यतिरेकमाह । न भावान्तरनेयरूपा इति । नेति निषेधे । भावान्तराभ्यां पराभिमताभ्यां द्रव्यगुणकर्मसमवायेभ्यः पदार्थान्तराभ्यां भावव्यतिरिक्तसामान्यविशेषाभ्यां नेयं प्रतीतिविषयं प्रापणीयं रूपं यथासंख्यमनुवृत्तिव्यतिवृत्तिलक्षणं स्वरूपं येषां ते तथोक्ताः । स्वभाव एव ह्ययं सर्वभावानां यदनुवृत्तिव्यावृत्तिप्रत्ययौ स्वत एव जनयन्ति । तथाहि । घट एव तावत्पृथुबुध्नोदराद्याकारवान्प्रतीतिविषयीभवन्सन्नन्यानपि तदाकृतिभृतः पदार्थान्घटरूपतया घटैकशब्दवाच्यतया च प्रत्याययन्सामान्याख्यां लभते । स एव चेतरेभ्यः सजातीयविजातीयेभ्यो द्रव्यक्षेत्रकालभावैरात्मानं व्यावर्तयन्विशेषव्यपदेशमश्नुते । इति न सामान्यविशेषयोः पृथक्पदार्थान्तरत्वकल्पनं न्याय्यम् । पदार्थधर्मत्वेनैव तयोः प्रतीयमानत्वात् । न च धर्मा धर्मिणः सकाशादत्यन्तं व्यतिरिक्ताः । एकान्तभेदे विशेषणविशेष्यभावानुपपत्तेः । करभरासभयोरिव धर्मधर्मिव्यपदेशाभावप्रसङ्गाच्च । धर्माणामपि च पृथक्पदार्थान्तरत्वकल्पन एकस्मिन्नेव वस्तुनि पदार्थानन्त्यप्रसङ्गः । अनन्तधर्मकत्वाद्वस्तुनः ॥

तदेवं सामान्यविशेषयोः स्वतत्त्वं यथावदनवबुध्यमाना अकुशलाः अतत्त्वाभिनिविष्टदृष्टयः तीर्थान्तरीयाः स्खलन्ति

न्यायमार्गाद्भ्रश्यन्ति निरुत्तरीभवन्तीत्यर्थः । स्खलनेन चात्र प्रामाणिकजनोपहसनीयता ध्वन्यते । किं कुर्वाणाः द्वयमनुवृत्तिव्यावृत्तिलक्षणं प्रत्ययद्वयं वदन्तः । कस्मादेतत्प्रत्ययद्वयं वदन्तः इत्याह । परात्मतत्त्वात् । परौ पदार्थेभ्यो व्यतिरिक्तत्वादन्यौ परस्परनिरपेक्षौ च यौ सामान्यविशेषौ तयोर्यदात्मतत्त्वं स्वरूपमनुवृत्तिव्यावृत्तिलक्षणं तस्मात् तदाश्रित्येत्यर्थः गम्ययपः कर्माधारे इत्यनेन पञ्चमी । कथंभूतात् परात्मतत्त्वात् । इत्याह । अतथात्मतत्त्वात् । मा भूत्पराभिमतस्य परात्मतत्त्वस्य सत्यरूपतेति विशेषणमिदम् । यथा येनैकान्तभेदलक्षणेन प्रकारेण परैः प्रकल्पितं न तथा तेन प्रकारेणात्मतत्त्वं स्वरूपं यस्य तत्तथा । तस्मात् । यतः पदार्थेष्वविष्वग्भावेन सामान्यविशेषौ वर्त्तेते तैश्च तौ तेभ्यः परत्वेन कल्पितौ । परत्वं चान्यत्वम् । तच्चैकान्तभेदाविनाभावि ॥

किंच पदार्थेभ्यः सामान्यविशेषयोरेकान्तभिन्नत्वे स्वीक्रियमाण एकवस्तुविषयमनुवृत्तिव्यावृत्तिरूपं प्रत्ययद्वयं नोपपद्येत । एकान्ताभेदे चान्यतरस्यासत्त्वप्रसङ्गः सामान्यविशेषव्यवहाराभावश्च स्यात् । सामान्यविशेषोभयात्मकत्वेनैव वस्तुनः प्रमाणेन प्रतीतेः । परस्परनिरपेक्षपक्षस्तु पुरस्तान्निर्लोठयिष्यते । अत एव तेषां वादिनां स्खलनक्रिययोपहसनीयत्वमभिव्यज्यते । यो ह्यन्यथास्थितं वस्तुस्वरूपमन्यथैव प्रतिपद्यमानः परेभ्यश्च तथैव प्रज्ञापयन्स्वयं नष्टः परान्नाशयति न खलु तस्मादन्य उपहासपात्रम् ॥

इति वृत्तार्थः ॥ ४ ॥

अथ तदभिमतावेकान्तनित्यानित्यपक्षौ दूषयन्नाह—

आदीपमाव्योम समस्वभावं
स्याद्वादमुद्रानतिभेदि वस्तु ।
तन्नित्यमेवैकमनित्यमन्य-
दिति त्वदाज्ञाद्विषतां प्रलापाः ॥ ५ ॥

आदीपं दीपादारभ्य । आव्योम व्योम मर्यादीकृत्य । सर्वम् । वस्तु पदार्थस्वरूपम् । समस्वभावं समः तुल्यः स्वभावः स्वरूपं यस्य तत्तथा । किंच वस्तुनः स्वरूपं द्रव्यपर्यायात्मकत्वमिति ब्रूमः । तथा च वाचकमुख्यः—उत्पादव्ययध्रौव्ययुक्तं सत् इति । समस्वभावत्वं कुतः । इति विशेषणद्वारेण हेतुमाह–स्याद्वादमुद्रानतिभेदि । स्यादित्यव्ययमनेकान्तद्योतकम् । ततः स्याद्वादोऽनेकान्तवादः । नित्यानित्याद्यनेकधर्मशबलैकवस्त्वभ्युपगम इति यावत् । तस्य मुद्रा मर्यादा तां नातिभिनत्ति नातिक्रामतीति स्याद्वादमुद्रानतिभेदि । यथा हि न्यायैकनिष्ठे राजनि राज्यश्रियं शासति सति सर्वाः प्रजास्तन्मुद्रां नातिवर्तितुमीशते तदतिक्रमे तासां सर्वार्थहानिभावात् एवं विजयिनि निष्कण्टके स्याद्वादमहानरेन्द्रतदीयमुद्रां सर्वेऽपि पदार्था नातिक्रामन्ति तदुल्लङ्घने तेषां स्वरूपव्यवस्थाहानिप्रसक्तेः ॥

सर्ववस्तूनां समस्वभावत्वकथनं च पराभीष्टस्यैकं वस्तु व्योमादि नित्यमेवान्यच्च प्रदीपाद्यनित्यमेवेति वादस्य प्रतिक्षेपबीजम् । सर्वे हि भावा द्रव्यार्थिकनयापेक्षया नित्याः पर्यायार्थिकनयादेशात्पुनरनित्याः । तत्रैकान्तानित्यतया परैरङ्गीकृतस्य प्रदीपस्य तावन्नित्यानित्यत्वव्यवस्थापने दिङ्मात्रमुच्यते ॥ तथाहि । प्रदीप-

पर्यायापन्नास्तैजसाः परमाणवः स्वरसतस्तैलक्षयाद्वाताभिघाताद्वा ज्योतिःपर्यायं परित्यज्य तमोरूपं पर्यायान्तरमासादयन्तोपि नैकान्तेनानित्याः । पुद्गलद्रव्यरूपतयावस्थितत्वात्तेषाम् । न ह्येतावतैवानित्यत्वं यावता पूर्वपर्यायस्य विनाश उत्तरपर्यायस्य चोत्पादः । न खलु मृद्द्रव्यं स्थासककोशकुशूलशिवकघटाद्यवस्थान्तराण्यापद्यमानमप्येकान्ततो विनष्टम् । तेषु मृद्द्रव्यानुगमस्याबालगोपालं प्रतीतत्वात् । न च तमसः पौद्गलिकत्वमसिद्धम् । चाक्षुषत्वान्यथानुपपत्तेः । प्रदीपालोकवत् । अथ यच्चाक्षुषं तत्सर्वं स्वप्रतिभासे आलोकमपेक्षते । न चैवं तमः । तत्कथं चाक्षुषम् ॥ नैवम् । उलूकादीनामालोकमन्तरेणापि तत्प्रतिभासात् । यैस्त्वस्मदादिभिरन्यच्चाक्षुषं घटादिकमालोकं विना नोपलभ्यते तैरपि तिमिरमालोकयिष्यते । विचित्रत्वाद्भावानाम् । कथमन्यथा पीतश्वेतादयोपि स्वर्णमुक्ताफलाद्या आलोकापेक्षदर्शनाः । प्रदीपचन्द्रादयस्तु प्रकाशान्तरनिरपेक्षाः । इति सिद्धं तमश्चाक्षुषम् ॥ रूपवत्त्वाच्च स्पर्शवत्त्वमपि प्रतीयते । शीतस्पर्शप्रत्ययजनकत्वात् । यानि त्वनिबिडावयवत्वमप्रतिघातित्वमनुद्भूतस्पर्शविशेषत्वमप्रतीयमानखण्डावयविद्रव्यप्रविभागत्वमित्यादीनि तमसः पौद्गलिकत्वनिषेधाय परैः साधनान्युपन्यस्तानि तानि प्रदीपप्रभादृष्टान्तेनैव प्रतिषेध्यानि । तुल्ययोगक्षेमत्वात् । न च वाच्यं तैजसाः परमाणवः कथं तमस्त्वेन परिणमन्त इति । पुद्गलानां तत्तत्सामग्रीसहकृतानां विसदृशकार्योत्पादकत्वस्यापि दर्शनात् । दृष्टो ह्यार्द्रेन्धनसंयोगवशाद्भास्वररूपस्यापि वह्नेरभास्वररूपधूमरूपकार्योत्पादः । इति सिद्धो नित्यानित्यः प्रदीपः । यदापि निर्वाणादर्वाग्देदीप्यमानो दीपस्तदापि नवनवपर्यायोत्पादविनाशभाक्त्वात्प्रदीपत्वान्वयाच्च नित्यानित्य एव ॥

एवं व्योमाप्युत्पादव्ययध्रौव्यात्मकत्वान्नित्यानित्यमेव । तथाह्यवगाहकानां जीवपुद्गलानामवगाहदानोपग्रह एव तल्लक्षणम् । अवकाशदमाकाशम् इति वचनात् । यदा चावगाहका जीवपुद्गलाः प्रयोगतो विस्रसातो वैकस्मान्नभःप्रदेशात्प्रदेशान्तरमुपसर्पन्ति तदा तस्य व्योम्नस्तैरवगाहकैः सममेकस्मिन्प्रदेशे विभाग उत्तरस्मिंश्च प्रदेशे संयोगः । संयोगविभागौ च परस्परं विरुद्धौ धर्मौ । तद्भेदे चावश्यं धर्मिणो भेदः । तथा चाहुः—अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्चेति । ततश्च तदाकाशं पूर्वसंयोगविनाशलक्षणपरिणामापत्त्या विनष्टमुत्तरसंयोगोत्पादाख्यपरिणामानुभवाच्चोत्पन्नम् । उभयत्राकाशद्रव्यस्यानुगतत्वाच्चोत्पादव्यययोरेकाधिकरणम् । तथा च यत्—अप्रच्युतानुत्पन्नस्थिरैकरूपं नित्यम् इति नित्यलक्षणमाचक्षते तदपास्तम् । एवंविधस्य कस्यचिद्वस्तुनोऽभावात् । तद्भावाव्ययं नित्यम् इति तु सत्यं नित्यलक्षणम् । उत्पादविनाशयोः सद्भावेऽपि तद्भावात् अन्वयिरूपाद्यन्न व्येति तन्नित्यमिति तदर्थस्य घटमानत्वात् । यदि ह्यप्रच्युतादिलक्षणं नित्यमिष्यते तदोत्पादव्यययोर्निराधारत्वप्रसङ्गः । न च तयोर्योगे नित्यत्वहानिः ॥

द्रव्यं पर्यायवियुतं पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा दृष्टा मानेन केन वा ॥

इति वचनात् । न चाकाशं न द्रव्यम् । लौकिकानामपि घटाकाशं पटाकाशमिति व्यवहारप्रसिद्धेराकाशस्य नित्यानित्यत्वम् । घटाकाशमपि हि यदा घटापगमे पटेनाक्रान्तं तदा पटाकाशमिति व्यवहारः । न चायमौपचारिकत्वादप्रमाणमेव । उपचारस्यापि किंचित्साधर्म्यद्वारेण मुख्यार्थस्पर्शित्वात् । नभसो हि

यत्किल सर्वव्यापकत्वं मुख्यं परिमाणं तदाधेयघटपटादिसंबन्धिनियतपरिमाणवशात्कल्पितभेदं सत्प्रतिनियतदेशव्यापितया व्यवह्रियमाणं घटाकाशपटाकाशादि तत्तद्व्यपदेशनिबन्धनं भवति । तत्तद्धटादिसंबन्धे च व्यापकत्वेनावस्थितस्य व्योम्नोवस्थान्तरापत्तिः । ततश्चावस्थाभेदेवस्थावतोपि भेदः । तासां ततोऽविष्वग्भावात् । इति सिद्धं नित्यानित्यत्वं व्योम्नः ॥

स्वायंभुवा अपि हि नित्यानित्यमेव वस्तु प्रपन्नाः । तथा चाहुस्ते–त्रिविधः खल्वयं धर्मिणः परिणामो धर्मलक्षणावस्थारूपः । सुवर्णं धर्मि । तस्य धर्मपरिणामो वर्धमानरुचकादिः । धर्मस्य तु लक्षणपरिणामोऽनागतत्वादिः । यदा खल्वयं हेमकारो वर्धमानकं भङ्क्त्वा रुचकमारचयति तदा वर्धमानको वर्तमानतालक्षणं हित्वातीततालक्षणमापद्यते । रुचकस्तु अनागततालक्षणं हित्वा वर्तमानतालक्षणमापद्यते । वर्तमानतापन्न एव तु रुचको नवपुराणभावमापद्यमानोवस्थापरिणामवान्भवति । सोयं त्रिविधः परिणामो धर्मिणः । धर्मलक्षणावस्थाश्च धर्मिणो भिन्नाश्चाभिन्नाश्च । तथा च ते धर्म्यभेदात्तान्नित्यत्वेन नित्याः । भेदाच्चोत्पत्तिविनाशविषयत्वम् । इत्युभयमुपपन्नमिति ॥

अथोत्तरार्धं विव्रियते ॥ एवं चौत्पादव्ययध्रौव्यात्मकत्वे सर्वभावानां सिद्धेपि तद्वस्त्वेवमाकाशात्मादिकं नित्यमेव अन्यच्च प्रदीपघटादिकमनित्यमेव इत्येवकारोत्रापि संबध्यते । इत्थं हि दुर्नयवादापत्तिः । अनन्तधर्मात्मके वस्तुनि स्वाभिप्रेतनित्यत्वादिधर्मसमर्थनप्रवणाः शेषधर्मतिरस्कारेण प्रवर्त्तमाना दुर्नया इति तल्लक्षणात् । इत्यनेनोल्लेखेन त्वदाज्ञाद्विषतां भवत्प्रणीतशासनविरोधिनां प्रलापाः प्रलपन्त्यसंबद्धवाक्यनीति यावत् ॥

अत्र च प्रथममादीपमिति परप्रसिद्ध्या अनित्यपक्षोल्लेखेपि यदुत्तरत्र यथासंख्यपरिहारेण पूर्वतरं नित्यमेवैकमित्युक्तं तदेवं ज्ञापयति–यदनित्यं तदपि नित्यमेव कथंचित् यच्च नित्यं तदप्यनित्यमेव कथंचित् । प्रक्रान्तवादिभिरप्येकस्यामेव पृथिव्यां नित्यानित्यत्वाभ्युपगमात् । तथा च प्रशस्तकरः—सा तु द्विविधा नित्यानित्या च । परमाणुलक्षणा नित्या कार्यलक्षणा त्वनित्या इति । न चात्र परमाणुकार्यद्रव्यलक्षणविषयद्वयभेदान्नैकाधिकरणं नित्यानित्यत्वमिति वाच्यम् । पृथ्वीत्वस्योभयत्राप्यव्यभिचारात् । एवमबादिष्वपीति । आकाशेपि संयोगविभागाङ्गीकारात्तैरनित्यत्वं युक्त्या प्रतिपन्नमेव । तथा च स एवाह—शब्दकारणत्ववचनात्संयोगविभागौ इति नित्यानित्यपक्षयोः संवलितत्वम् । एतच्च लेशतो भावितमेवेति ॥

प्रलापप्रायत्वं च परवचनानामित्थं समर्थनीयम् ॥ वस्तुनस्तावदर्थक्रियाकारित्वं लक्षणम् । तच्चैकान्तनित्यानित्यपक्षयोर्न घटते ॥ अप्रच्युतानुत्पन्नस्थिरैकरूपो हि नित्यः । स च क्रमेणार्थक्रियां कुर्वीत अक्रमेण वा । अन्योन्यव्यवच्छेदरूपाणां प्रकारान्तरासंभवात् ॥ तत्र न तावत्क्रमेण । स हि कालान्तरभाविनीः क्रियाः प्रथमक्रियाकाल एव प्रसह्य कुर्यात् । समर्थस्य कालक्षेपायोगात् । कालक्षेपिणो वा असामर्थ्यप्राप्तेः । समर्थोपि तत्तत्सहकारिसमवधाने तं तमर्थं करोतीति चेत् न तर्हि तस्य सामर्थ्यम् । अपरसहकारिसापेक्षवृत्तित्वात् । सापेक्षमसमर्थमिति न्यायात् । न तेन सहकारिणोऽपेक्ष्यन्ते अपि तु कार्यमेव सहकारिष्वसत्स्वभवत्तानपेक्षत इति चेत् तत्किं स भावोऽसमर्थः समर्थो वा । समर्थश्चेत् किं सहकारिमुखप्रेक्षणदीनानि तान्यपेक्षते न पुनर्झटिति घटयति । ननु समर्थमपि बीजमिला-

जलानिलादिसहकारिसहितमेवाङ्कुरं करोति नान्यथा । तर्हि तस्य सहकारिभिः किंचिदुपक्रियेत न वा । यदि नोपक्रियेत तदा सहकारिसंनिधानात्प्रागिव किं न तदाप्यर्थक्रियायामुदास्ते । उपक्रियेत चेत्स तर्हि तैरुपकारोऽभिन्नो भिन्नो वा क्रियत इति वाच्यम् । अभेदे स एव क्रियते । इति लाभमिच्छतो मूलक्षतिरायाता । कृतकत्वेन तस्यानित्यत्वापत्तेः । भेदे तु स कथं तस्योपकारः । किं न सह्यविन्ध्याद्रेरपि । तत्संबन्धात्तस्यायमिति चेत् उपकार्योपकारयोः कः संबन्धः । न तावत्संयोगः । द्रव्ययोरेव तस्य भावात् । अत्र तूपकार्यं द्रव्यमुपकारश्च क्रियेति न संयोगः । नापि समवायः । तस्यैकत्वाद्व्यापकत्वाच्च प्रत्यासत्तिविप्रकर्षाभावेन सर्वत्र तुल्यत्वान्न नियतैः संबन्धिभिः संबन्धो युक्तः । नियतसंबन्धिसंबन्धे चाङ्गीक्रियमाणे तत्कृत उपकारोऽस्य समवायस्याभ्युपगन्तव्यः । तथा च सत्युपकारस्य भेदाभेदकल्पना तदवस्थैव । उपकारस्य समवायादभेदे समवाय एव कृतः स्यात् । भेदे पुनरपि समवायस्य न नियतसंबन्धिसंबन्धत्वम् । तन्नैकान्तनित्यो भावः क्रमेणार्थक्रियां कुरुते ॥ नाप्यक्रमेण । न ह्येको भावः सकलकालकलाकलापभाविनीर्युगपत्सर्वाः क्रियाः करोतीति प्रातीतिकम् । कुरुतां वा । तथापि द्वितीयक्षणे किं कुर्यात् । करणे वा क्रमपक्षभावी दोषः । अकरणे त्वर्थक्रियाकारित्वाभावादवस्तुत्वप्रसङ्गः । इत्येकान्तनित्यात् क्रमाक्रमाभ्यां व्याप्तार्थक्रिया व्यापकानुपलब्धिबलाद्व्यापकनिवृत्तौ निवर्तमाना स्वव्याप्यमर्थक्रियाकारित्वं निवर्तयति । अर्थक्रियाकारित्वं च निवर्तमानं स्वव्याप्यं सत्त्वं निवर्तयति । इति नैकान्तनित्यपक्षो युक्तिक्षमः ॥

एकान्तानित्यपक्षोपि न कक्षीकरणार्हः ॥ अनित्यो हि प्रतिक्षणविनाशी । स च न क्रमेणार्थक्रियासमर्थः । देशकृतस्य कालकृतस्य च क्रमस्यैवाभावात् । क्रमो हि पौर्वापर्यम् । तच्च क्षणिकस्यासंभवि । अवस्थितस्यैव हि नानादेशकालव्याप्तिर्देशक्रमः कालक्रमश्चाभिधीयते । न चैकान्तविनाशिनि सास्ति । यदाहुः—

योयत्रैव स तत्रैव यो यदैव तदैव सः ।
न देशकालयोर्व्याप्तिर्भावानामिह विद्यते ॥

न च संतानापेक्षया पूर्वोत्तरक्षणानां क्रमः संभवति । संतानस्यावस्तुत्वात् । वस्तुत्वेपि तस्य यदि क्षणिकत्वं न तर्हि क्षणेभ्यः कश्चिद्विशेषः । अथाक्षणिकत्वं तर्हि समाप्तः क्षणभङ्गवादः ॥

नाप्यक्रमेणार्थक्रिया क्षणिके संभवति । स ह्येको बीजपूरादिरूपादिक्षणो युगपदनेकान् रसादिक्षणाञ्जनयन्नेकेन स्वभावेन जनयेन्नानास्वभावैर्वा । यद्येकेन तदा तेषां रसादिक्षणानामेकत्वं स्यादेकस्वभावजन्यत्वात् । अथ नानास्वभावैर्जनयति किंचिद्रूपादिकमुपादानभावेन किंचिद्रसादिकं सहकारित्वेनेति चेत् स्वभावास्तस्यात्मभूता अनात्मभूता वा । अनात्मभूताश्चेत् स्वभावत्वहानिः । यद्यात्मभूतास्तर्हि तस्यानेकत्वमनेकस्वभावत्वात् । स्वभावानां वैकत्वं प्रसज्येत । तदव्यतिरिक्तत्वात्तेषां तस्य चैकत्वात् । अथ य एव एकत्रोपादानभावः स एवान्यत्र सहकारिभाव इति न स्वभावभेद इष्यते । तर्हि नित्यस्यैकरूपस्यापि क्रमेण नानाकार्यकारिणः स्वभावभेदः कार्यसांकर्यं च कथमिष्यते क्षणिकवादिना । अथ नित्यमेकरूपत्वादक्रमम् । अक्रमाच्च क्रमिणां नानाकार्याणां कथमुत्पत्तिरिति चेत् अहो स्वपक्षपाती देवानांप्रियो यः खलु स्वयमेकस्मान्निरंशाद्रूपादिक्षणात्कारणाद्युगपदनेककारण-

साध्यान्यनेककार्याण्यङ्गीकुर्वाणोपि परपक्षे नित्येपि वस्तुनि क्रमेण नानाकार्यकरणेपि विरोधमुद्भावयति । तस्मात्क्षणिकस्यापि भावस्याक्रमेणार्थक्रिया दुर्घटा ॥ इत्यनित्यैकान्तादपि क्रमाक्रमयोर्व्यापकयोर्निवृत्त्यैव व्याप्यार्थक्रियापि व्यावर्तते । तद्व्यावृत्तौ च सत्त्वमपि व्यापकानुपलब्धिबलेनैव निवर्तते । इत्येकान्तानित्यवादोपि न रमणीयः ॥

स्याद्वादे तु पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेन भावानामर्थक्रियोपपत्तिरविरुद्धा । न चैकत्र वस्तुनि परस्परविरुद्धधर्माध्यासायोगादसन्स्याद्वाद इति वाच्यम् । नित्यानित्यपक्षविलक्षणस्य पक्षान्तरस्याङ्गीक्रियमाणत्वात् । तथैव च सर्वैरनुभवात् । तथा च पठन्ति—

भागे सिंहो नरो भागे योऽर्थो भागद्वयात्मकः ।
तमभागं विभागेन नरसिंहं प्रचक्षते ॥ इति ॥

वैशेषिकैरपि चित्ररूपस्यैकस्यावयविनोभ्युपगमादेकस्यैव पटादेश्चलाचलरक्तारक्तावृतानावृतत्वादिविरुद्धधर्माणामुपलब्धेः । सौगतैरप्येकत्र चित्रपटीज्ञाने नीलानीलयोर्विरोधानङ्गीकारात् ॥

अत्र च यद्यप्यधिकृतवादिनः प्रदीपादिकं कालान्तरावस्थायित्वात्क्षणिकं न मन्यन्ते तन्मते पूर्वापरान्तावच्छिन्नायाः सत्ताया एवानित्यतालक्षणात् तथापि बुद्धिसुखादिकं तेपि क्षणिकतयैव प्रतिपन्नाः इति तदधिकारेपि क्षणिकवादचर्चा नानुपपन्ना । यदापि च कालान्तरावस्थायि वस्तु तदापि नित्यानित्यमेव । क्षणोपि न खलु सोस्ति यत्र वस्तूत्पादव्ययध्रौव्यात्मकं नास्ति ॥ इति काव्यार्थः ॥ ५ ॥

अथ तदभिमतमीश्वरस्य जगत्कर्तृत्वाभ्युपगमं मिथ्याभिनिवेशरूपं निरूपयन्नाह ।

कर्तास्ति कश्चिज्जगतः स चैकः
स सर्वगः स स्ववशः स नित्यः ।
इमाः कुहेवाकविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वम् ॥ ६ ॥

जगतः प्रत्यक्षादिप्रमाणोपलक्ष्यमाणचराचररूपस्य विश्वत्रयस्य कश्चिद् अनिर्वचनीयस्वरूपः पुरुषविशेषः कर्ता स्रष्टा अस्ति विद्यते ॥ ते हीत्थं प्रमाणयन्ति । उर्वीपर्वततर्वादिकं सर्वं बुद्धिमत्कर्तृकम् । कार्यत्वात् । यद्यत्कार्यं तत्तत्सर्वं बुद्धिमत्कर्तृकम् यथा घटः । तथा चेदम् । तस्मात्तथा । व्यतिरेके व्योमादि । यश्च बुद्धिमांस्तत्कर्ता स भगवानीश्वर एवेति ॥

न चायमसिद्धो हेतुः । यतो भूभूधरादेः स्वस्वकारणकलापजन्यतयावयवितया वा कार्यत्वं सर्ववादिनां प्रतीतमेव । नाप्यनैकान्तिको विरुद्धो वा । विपक्षादत्यन्तव्यावृत्तत्वात् । नापि कालात्ययापदिष्टः । प्रत्यक्षानुमानागमाबाधितधर्मधर्म्यनन्तरप्रतिपादितत्वात् ॥ नापि प्रकरणसमः । तत्प्रतिपन्थिधर्मोपपादनसमर्थप्रत्यनुमानाभावात् । न च वाच्यमीश्वरः पृथ्वीपृथ्वीधरादेर्विधाता न भवति अशरीरत्वात् निर्वृतात्मवदिति प्रत्यनुमानं तद्बाधकमिति । यतोत्रेश्वररूपो धर्मी प्रतीतोऽप्रतीतो वा प्ररूपितः । न तावदप्रतीतः । हेतोराश्रयासिद्धिप्रसङ्गात् । प्रतीतश्चेत् येन प्रमाणेन स प्रतीतस्तेनैव किं स्वयमुत्पादितस्वतनुर्न प्रतीयते । इत्यतः कथमशरीरत्वम् । तस्मान्निरवद्य एवायं हेतुरिति ॥

स चैक इति । च पुनरर्थे । स पुनः पुरुषविशेष एकः अद्वितीयः । बहूनां हि विश्वविधातृत्वस्वीकारे परस्परविमतिसंभावनाया अनिवार्यत्वादेकैकस्य वस्तुनोऽन्यान्यरूपतया निर्माणे सर्वमसमञ्जसमापद्येतेति ॥

तथा स सर्वग इति । सर्वत्र गच्छतीति सर्वगः । सर्वव्यापी । तस्य हि प्रतिनियतदेशवर्तित्वे नियतदेशवृत्तीनां विश्वत्रयान्तर्वर्तिपदार्थसार्थानां यथावन्निर्माणानुपपत्तिः । कुम्भकारादिषु तथा दर्शनात् ॥ अथवा सर्वं गच्छति जानातीति सर्वगः सर्वज्ञः । सर्वे गत्यर्थाः ज्ञानार्थाः इति वचनात् । सर्वज्ञत्वाभावे हि यथोचितोपादानकारणाद्यनभिज्ञत्वादनुरूपकार्योत्पत्तिर्न स्यात् ॥

तथा स स्ववशः स्वतन्त्रः । सकलप्राणिनां स्वेच्छया सुखदुःखयोरनुभावनसमर्थत्वात् । तथा चोक्तम्—

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ।
अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ॥

पारतन्त्र्ये तु तस्य परमुखप्रेक्षितया मुख्यकर्तृत्वव्याघातादनीश्वरत्वापत्तिः ॥

तथा स नित्य इति । अप्रच्युतानुत्पन्नस्थिरैकरूपः । तस्य ह्यनित्यत्वे परोत्पाद्यतया कृतकत्वप्राप्तिः । अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक इत्युच्यते । यश्चापरस्तत्कर्ता कल्प्यते स नित्योऽनित्यो वा स्यात् । नित्यश्चेदधिकृतेश्वरेण किमपराद्धम् । अनित्यश्चेत्तस्याप्युत्पादकान्तरेण भाव्यम् । तस्यापि नित्यानित्यत्वकल्पनायामनवस्थादौस्थ्यमिति ॥

तदेवमेकत्वादिविशेषणविशिष्टो भगवानीशस्त्रिजगत्कर्तेति पराभ्युपगममुपदर्श्योत्तरार्धेन तस्य दुष्टत्वमाचष्टे ॥ इमा एता

अनन्तरोक्ताः। कुहेवाकविडम्बनाः कुत्सिता हेवाका आग्रहविशेषाः कुहेवाकाः कदाग्रहा इत्यर्थः त एव विडम्बनाः विचारचातुरीबाह्यत्वेन तिरस्काररूपत्वाद्विगोपकप्रकाराः। स्युः भवेयुः। तेषां प्रामाणिकापसदानाम्। येषां हे स्वामिन् त्वं नानुशासकः न शिक्षादाता।। तदभिनिवेशानां विडम्बनारूपत्वज्ञापनार्थमेव पराभिप्रेतपुरुषविशेषणेषु प्रत्येकं तच्छब्दप्रयोगमसूयागर्भमाविर्भावयांचकार स्तुतिकारः। तथा चैवमेव निन्दनीयं प्रति वक्तारो वदन्ति। स मूर्खः स पापीयान् स दरिद्र इत्यादि। त्वमित्येकवचनसंयुक्तयुष्मच्छब्दप्रयोगेण परमेशितुः परमकारुणिकतयानपेक्षितस्वपरपक्षविभागमद्वितीयं हितोपदेशकत्वं ध्वन्यते। अतोत्रायमाशयः। यद्यपि भगवानविशेषेण सकलजगज्जन्तुजातहितावहां सर्वेभ्य एव देशनावाचमाचष्टे तथापि सैव केषांचिन्निचितनिकाचितपापकर्मकलुषितात्मनां रुचिरूपतया न परिणमते। अपुनर्बन्धकादिव्यतिरिक्तत्वेनायोग्यत्वात्। तथा च कादम्बर्यां बाणोपि बभाण—अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य इति। अतो वस्तुवृत्त्या न तेषां भगवाननुशासक इति।। न चैतावता जगद्गुरोरसामर्थ्यसंभावना। न हि कालदष्टमनुज्जीवयन् समुज्जीवितेतरदष्टको विषभिषगुपालम्भनीयः। अतिप्रसङ्गात्। स हि तेषामेव दोषः। न खलु निखिलभुवनाभोगमवभासयन्तोपि भानवीया भानवः कौशिकलोकस्यालोकहेतुतामभजमाना उपालम्भसंभावनास्पदम्। तथा च श्रीसिद्धसेनः—

सद्धर्मबीजवपनानघकौशलस्य
यल्लोकबान्धव तवापि खिलान्यभूवन्।

तन्नाद्भुतं खगकुलेष्विह तामसेषु
सूर्यांशवो मधुकरीचरणावदाताः ॥

अथ कथमिव तत्कुहेवाकानां विडम्बनारूपत्वमिति । ब्रूमः । यत्तावदुक्तं परैः क्षित्यादयो बुद्धिमत्कर्तृकाः कार्यत्वाद्घटवदिति । तदयुक्तम् । व्याप्तेरग्रहणात् । साधनं हि सर्वत्र व्याप्तौ प्रमाणेन सिद्धायां साध्यं गमयेदिति सर्ववादिसंवादः ॥ स चायं जगन्ति सृजन् सशरीरोऽशरीरो वा स्यात् ॥ सशरीरोपि किमस्मदादिवदृश्यशरीरविशिष्ट उत पिशाचादिवददृश्यशरीरविशिष्टः । प्रथमपक्षे प्रत्यक्षबाधः । तमन्तरेणापि च जायमाने तृणतरुपुरंदरधनुरभ्रादौ कार्यत्वस्य दर्शनात् प्रमेयत्वादिवत्साधारणानैकान्तिको हेतुः । द्वितीयविकल्पे पुनरदृश्यशरीरत्वे तस्य माहात्म्यविशेषः कारणम् आहोस्विदस्मदाद्यदृष्टवैगुण्यम् । प्रथमप्रकारः कोशपानप्रत्यायनीयः । तत्सिद्धौ प्रमाणाभावात् । इतरेतराश्रयदोषापत्तेश्च । सिद्धे हि माहात्म्यविशेषे तस्यादृश्यशरीरत्वं प्रत्येतव्यम् । तत्सिद्धौ च माहात्म्यविशेषसिद्धिरिति । द्वैतीयिकस्तु प्रकारो न संचरत्येव विचारगोचरे । संशयानिवृत्तेः । किं तस्यासत्त्वाददृश्यशरीरत्वं वान्ध्येयादिवत् किं वास्मदाद्यदृष्टवैगुण्यात्पिशाचादिवदितिनिश्चयाभावात् ॥ अशरीरश्चेत्तदा दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । घटादयो हि कार्यरूपाः सशरीरकर्तृका दृष्टाः । अशरीरस्य च सतस्तस्य कार्यप्रवृत्तौ कुतः सामर्थ्यम् आकाशादिवत् । तस्मात्सशरीराशरीरलक्षणे पक्षद्वयेपि कार्यत्वहेतोर्व्याप्त्यसिद्धिः ॥ किं च त्वन्मतेन कालात्ययापदिष्टोप्ययं हेतुः । धर्म्येकदेशस्य तरुविद्युदभ्रादेरिदानीमप्युत्पद्यमानस्य विधातुरनुपलभ्यमानत्वेन प्रत्यक्षबाधितधर्म्यनन्तरं हेतुभणनात् । तदेवं न कश्चिज्जगतः कर्ता ॥

एकत्वादीनि तु जगत्कर्तृत्वव्यवस्थापनायानीयमानानि तद्वि-

शेषणानि षण्ढं प्रति कामिन्या रूपसंपन्निरूपणप्रायाण्येव । तथापि तेषां विचारासहत्वख्यापनार्थं किंचिदुच्यते ॥ तत्रैकत्वचर्चस्तावत् । बहूनामेककार्यकरणे वैमत्यसंभावनेति नायमेकान्तः । अनेककीटिकाशतनिष्पाद्यत्वेऽपि शक्रमूर्ध्नोऽनेकशिल्पिकल्पितत्वेऽपि प्रासादादीनां नैकसरघानिर्वर्तितत्वेऽपि मधुच्छत्रादीनां चैकरूपताया अविगानेनोपलम्भात् । अथैतेष्वप्येक एवेश्वरः कर्तेति ब्रूषे । एवं चेद्भवतो भवानीपतिं प्रति निष्प्रतिमा वासना तर्हि कुविन्दकुम्भकारादितिरस्कारेण पटघटादीनामपि कर्ता स एव किं न कल्प्यते । अथ तेषां प्रत्यक्षसिद्धं कर्तृत्वं कथमपह्नोतुं शक्यम् । तर्हि कीटिकादिभिः किं तेषां विराद्धं यत्तेषामसदृशतादृशप्रयाससाध्यं कर्तृत्वमेकहेलयैवापलप्यते । तस्माद्वैमत्यभयान्महेशितुरेकत्वकल्पना भोजनादिव्ययभयात्कृपणस्यात्यन्तवल्लभपुत्रकलत्रादिपरित्यजनेन शून्यारण्यानीसेवनमिव ॥

तथा सर्वगतत्वमपि तस्य नोपपन्नम् । तद्धि शरीरात्मना ज्ञानात्मना वा स्यात् । प्रथमपक्षे तदीयेनैव देहेन जगत्त्रयस्य व्याप्तत्वादितरनिर्मेयपदार्थानामाश्रयानवकाशः । द्वितीयपक्षे तु सिद्धसाध्यता । अस्माभिरपि निरतिशयज्ञानात्मना परमपुरुषस्य जगत्त्रयक्रोडीकरणाभ्युपगमात् । यदि परमेवं भवत्प्रमाणीकृतेन वेदेन विरोधः । तत्र हि शरीरात्मना सर्वगतत्वमुक्तम् । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतःपाणिरुत विश्वतःपात् इत्यादिश्रुतेः ॥ यच्चोक्तं तस्य प्रतिनियतदेशवर्तित्वे त्रिभुवनगतपदार्थानामनियतदेशवृत्तीनां यथावन्निर्माणानुपपत्तिरिति । तत्रेदं पृच्छ्यते । स जगत्त्रयं निर्मिमाणस्तक्षादिवत्साक्षाद्देहव्यापारेण निर्मिमीते यदि वा संकल्पमात्रेण । आद्ये पक्ष एकस्यैव भूभूधरादेर्विधानेऽक्षोदी-

यसः कालक्षेपस्य संभवाद्भूहीयसाप्यनेहसा न परिसमाप्तिः । द्वितीयपक्षे तु संकल्पमात्रेणैव कार्यकल्पनायां नियतदेशस्थायित्वेपि न किंचिद्दूषणमुत्पश्यामः । नियतदेशस्थायिनां सामान्यदेवानामपि संकल्पमात्रेणैव तत्तत्कार्यसंपादनप्रतिपत्तेः ॥ किं च तस्य सर्वगतत्वेनाङ्गीक्रियमाणे शुचिषु निरन्तरसन्तमसेषु नरकादिस्थलेष्वपि तस्य वृत्तिः प्रसज्यते । तथा चानिष्टापत्तिः । अथ युष्मत्पक्षेपि यदा ज्ञानात्मना सर्वजगत्त्रयं व्याप्नोतीत्युच्यते तदा शुचिरसस्वादादीनामप्युपलम्भसंभावनान्नरकादिदुःखस्वरूपसंवेदनात्मकतया दुःखानुभवप्रसङ्गाच्चानिष्टापत्तिस्तुल्यैवेति चेत् तदेतदुपपत्तिभिः प्रतिकर्तुमशक्तस्य धूलिभिरिवावकरणम् । यतोज्ञानमप्राप्यकारि स्वस्थलस्थमेव विषयं परिच्छिनत्ति न पुनस्तत्र गत्वा । तत्कुतो भवदुपालम्भः समीचीनः । तर्हि भवतोप्यशुचिज्ञानमात्रेण तद्रसास्वादानुभूतिः । तद्भावे हि स्रक्चन्दनाङ्गनारसवत्यादिचिन्तनमात्रेणैव तृप्तिसिद्धौ तत्प्राप्तिप्रयत्नवैफल्यप्रसक्तिरिति ॥ यत्तु ज्ञानात्मना सर्वगतत्वे सिद्धसाधनं प्रागुक्तं तच्छक्तिमात्रमपेक्ष्य मन्तव्यम् । तथा च वक्तारो भवन्ति । अस्य मतिः सर्वशास्त्रेषु प्रसरतीति । न च ज्ञानं प्राप्यकारि । तस्यात्मधर्मत्वेन बहिर्निर्गमाभावात् । बहिर्निर्गमे चात्मनोऽचैतन्यापत्त्याऽजीवत्वप्रसङ्गः । न हि धर्मो धर्मिणमतिरिच्य क्वचन केवलो विलोकितः । यच्च परे दृष्टान्तयन्ति यथा सूर्यस्य किरणा गुणरूपा अपि सूर्यान्निष्क्रम्य भुवनं भासयन्त्येवं ज्ञानमप्यात्मनः सकाशाद्बहिर्निर्गत्य प्रमेयं परिच्छिनत्तीति तत्रेदमुत्तरम् । किरणानां गुणत्वमसिद्धम् । तेषां तैजसपुद्गलमयत्वेन द्रव्यत्वात् । यश्च तेषां प्रकाशात्मा गुणः स तेभ्यो न जातु पृथग्भवतीति । तथा च धर्मसंग्रहिण्यां श्रीहरिभद्राचार्यपादाः—

किरणा गुणा न दव्वं तेसिं पयासो गुणो न वा दव्वं ॥
जं नाणं आयगुणो कहमदव्वो स अन्नत्थ ॥ १ ॥
गन्तूण न परिछिंदइ नाणं णेयं तयम्मि देसम्मि ।
आयत्थं चिय नवरं अचिन्तसत्ती उ विण्णेयं ॥ २ ॥
लोहोवलस्स सत्ती आयत्था चेव भिन्नदेसंपि ।
लोहं आगरिसंती दीसइ इह कज्ज पच्चक्खा ॥ ३ ॥
एवमिह नाणसत्ती आयत्था चेव हंदि लोगंतं ।
जइ परिछिंदइ सम्मं को णु विरोहो भवे तत्थ ॥ ४ ॥

इत्यादि ॥

अथ सर्वगः सर्वज्ञ इति व्याख्यानं तत्रापि प्रतिविधीयते । ननु तस्य सार्वज्ञ्यं केन प्रमाणेन गृहीतम् । प्रत्यक्षेण परोक्षेण वा । न तावत्प्रत्यक्षेण । तस्येन्द्रियार्थसंनिकर्षोत्पन्नतयातीन्द्रियग्रहणासामर्थ्यात् । नापि परोक्षेण । तद्ध्यनुमानं शाब्दं वा स्यात् । न तावदनुमानम् । तस्य लिङ्गग्रहणेन लिङ्गिलिङ्गसंबन्धस्मरणपूर्वकत्वात् । न च तस्य सर्वज्ञत्वेनुमेये किंचिदव्यभिचारि लिङ्गं पश्यामः।तस्यात्यन्तविप्रकृष्टत्वेन तत्प्रतिबद्धलिङ्गसंबन्धग्रहणाभावात्। अथ तस्य सर्वज्ञत्वं ।विना जगद्वैचित्र्यमनुपपद्यमानं सर्वज्ञत्वमर्थादापादयतीति चेन्न । अविनाभावाभावात्। न हि जगद्वैचित्री तत्सार्वज्ञ्यं विनान्यथा नोपपन्ना । द्विविधं हि जगत्। स्थावरजङ्गमभेदात् । तत्र जङ्गमानां वैचित्र्यं स्वोपात्तशुभाशुभकर्मपरिपाकवशेनैव । स्थावराणां तु सचेतनानामियमेव गतिरचेतनानां तु तदुपभोगयोग्यतासाधनत्वेनानादिकालसिद्धमेव वैचित्र्यमिति ॥

नाप्यागमस्तत्साधकः । स हि तत्कृतोन्यकृतो वा स्यात् । तत्कृत एव चेत्तस्य सर्वज्ञतां साधयति तदा तस्य महत्त्वक्षतिः ।

स्वयमेव स्वगुणोत्कीर्तनस्य महतामनधिकृतत्वात् । अन्यच्च तस्य शास्त्रकर्तृत्वमेव न युज्यते । शास्त्रं हि वर्णात्मकम् । ते च ताल्वादिव्यापारजन्याः । स च शरीर एव संभवी । शरीराभ्युपगमे च तस्य पूर्वोक्ता एव दोषाः । अन्यकृतश्चेत्सोऽन्यः सर्वज्ञोऽसर्वज्ञो वा । सर्वज्ञत्वे तस्य द्वैतापत्त्या प्रागुक्ततदेकत्वाभ्युपगमबाधस्तत्साधकप्रमाणचर्चायामनवस्थापातश्च । असर्वज्ञश्चेत्कस्तस्य वचसि विश्वासः । अपरं च भवदभीष्ट आगमः प्रत्युत तत्प्रणेतुरसर्वज्ञत्वमेव साधयति । पूर्वापरविरुद्धार्थवचनोपेतत्वात् । तथाहि न हिंस्यात्सर्वभूतानीति प्रथममुक्त्वा पश्चात्तत्रैव पठितम् ।

षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि ।
अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः ॥

तथा अग्नीषोमीयं पशुमालभेत सप्तदश प्राजापत्यान्पशूनालभेत इत्यादिवचनानि कथमिव न पूर्वापरविरोधमनुरुध्यन्ते ॥ तथा नानृतं ब्रूयात् इत्यादिना अनृतभाषणं प्रथमं निषिध्य पश्चाद् ब्राह्मणार्थमनृतं ब्रूयात् इत्यादि । तथा—

न नर्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥

तथा अदत्तादानमेकधा निरस्य पश्चादुक्तम्—यद्यपि ब्राह्मणो हठेन परकीयमादत्ते छलेन वा तथापि तस्य नादत्तादानम् । यतः सर्वमिदं ब्राह्मणेभ्यो दत्तं ब्राह्मणानां तु दौर्बल्याद्वृषलाः परिभुञ्जते । तस्मादपहरन् ब्राह्मणः स्वमादत्ते स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति इति ॥ तथा । अपुत्रस्य गतिर्नास्ति इति लपित्वा

अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥

इत्यादि ॥ कियन्तो वा दधिमाषभोजनात्कृपणा विवेच्यन्ते । तदेवमागमोपि न तस्य सर्वज्ञतां वक्ति । किं च सर्वज्ञः सन्नसौ चराचरं चेद्विरचयति तदा जगदुपप्लवकरणस्वैरिणः पश्चादपि कर्तव्यनिग्रहान्सुरवैरिण एतदधिक्षेपकारिणश्चास्मदादीन्किमर्थं सृजतीति । तन्नायं सर्वज्ञः ॥

तथा स्ववशत्वं स्वातन्त्र्यम् । तदपि तस्य न क्षोदक्षमम् ॥ स हि यदि नाम स्वाधीनः सन् विश्वं विधत्ते परमकारुणिकश्च त्वया वर्ण्यते तत्कथं सुखिताद्यवस्थाभेदवृन्दस्थपुटितं घटयति भुवनमेकान्तशर्मसंपत्कान्तमेव तु किं न निर्मिमीते । अथ जन्मान्तरोपार्जिततत्तत्तदीयशुभाशुभकर्मप्रेरितः संस्तथा करोतीति । दत्तस्तर्हि स्ववशत्वाय जलाञ्जलिः । कर्मजन्ये च त्रिभुवनवैचित्र्ये शिपिविष्टहेतुकविष्टपसृष्टिकल्पनायाः कष्टैकफलत्वादस्मन्मतमेवाङ्गीकृतं प्रेक्षावता । तथाचायातोऽयं घटकुट्यां प्रभातमितिन्यायः । किं च प्राणिनां धर्माधर्मावपेक्षमाणश्चेदयं सृजति प्राप्तं तर्हि यदयमपेक्षते तन्न करोतीति । न हि कुलालो दण्डादि करोति । एवं कर्मापेक्षश्चेदीश्वरो जगत्कारणं स्यात्तर्हि कर्मणीश्वरत्वमीश्वरोनीश्वरः स्यादिति ॥

तथा नित्यत्वमपि तस्य स्वगृह एव प्रणिगद्यमानं हृद्यम् ॥ स खलु नित्यत्वेनैकरूपः सन् त्रिभुवनसर्गस्वभावोऽतत्स्वभावो वा । प्रथमविधायां जगन्निर्माणात्कदाचिदपि नोपरमेत । तदुपरमे तत्स्वभावत्वहानिः । एवं च सर्गक्रियाया अपर्यवसानादेकस्यापि

कार्यस्य न सृष्टिः । घटो हि स्वारम्भक्षणादारभ्य परिसमाप्तिरूपान्त्यक्षणं यावन्निश्चयनयाभिप्रायेण न घटव्यपदेशमासादयति । जलाहरणाद्यर्थक्रियायामसाधकतमत्वात् । अतत्स्वभावपक्षे तु न जातु जगन्ति सृजेत्स्वभावायोगाद्गगनवत् । अपि च तस्यैकान्तनित्यस्वरूपत्वे सृष्टिवत्संहारोपि न घटते । नानारूपकार्यकरणेऽनित्यत्वापत्तेः । स हि येनैव स्वभावेन जगन्ति सृजेत्तेनैव तानि संहरेत् स्वभावान्तरेण वा। तेनैव चेत् सृष्टिसंहारयोर्यौगपद्यप्रसङ्गः । स्वभावाभेदात् । एकस्वभावात्कारणादनेकस्वभावकार्योत्पत्तिविरोधात् । स्वभावान्तरेण चेत् नित्यत्वहानिः । स्वभावभेद एव हि लक्षणमनित्यतायाः । यथा पार्थिवशरीरस्याहारपरमाणुसहकृतस्य प्रत्यहमपूर्वापूर्वोत्पादेन स्वभावभेदादनित्यत्वम् । इष्टश्च भवतां सृष्टिसंहारयोः शम्भौ स्वभावभेदः । रजोगुणात्मकतया सृष्टौ तमोगुणात्मकतया संहरणे सात्त्विकतया च स्थितौ तस्य व्यापारस्वीकारात् । एवं चावस्थाभेदस्तद्भेदे चावस्थावतोपि भेदान्नित्यत्वक्षतिः ॥ अथास्तु नित्यस्तथापि कथं सततमेव सृष्टौ न चेष्टते । इच्छावशाच्चेन्ननु ता अपीच्छाः स्वसत्तामात्रनिबन्धनात्मलाभाः सदैव किं न प्रवर्तयन्तीति स एवोपालम्भः । तथा शम्भोरष्टगुणाधिकरणत्वे कार्यभेदानुमेयानां तदिच्छानामपि विषमरूपत्वहानिः केन वार्यते। किं च प्रेक्षावतां प्रवृत्तिः स्वार्थकरुणाभ्यां व्याप्ता। ततश्चायं जगत्सर्गे व्याप्रियते स्वार्थात्कारुण्याद्वा। न तावत् स्वार्थात् तस्य कृतकृत्यत्वात्। न च कारुण्यात्। परदुःखप्रहाणेच्छा हि कारुण्यम्। ततः प्राक्सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यम् । सर्गोत्तरकाले तु दुःखिनोवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयं कारुण्येन सृष्टिः सृष्ट्या च कारुण्यम् । इति नास्य जगत्कर्तृत्वं कथमपि सिद्ध्यति । तदेवमेवं-

विषदोषकलुषिते पुरुषविशेषे यस्तेषां सेवाहेवाकः स खलु केवलं बलवन्मोहविडम्बनापरिपाक इति । अत्र च यद्यपि मध्यवर्तिनो नकारस्य घण्टालालान्यायेन योजनादर्थान्तरमपि स्फुरति यथा इमाः कुहेवाकविडम्बनास्तेषां न स्युर्येषां त्वमनुशासक इति तथापि सोऽर्थः सहृदयैर्न हृदयधारणीयोऽन्ययोगव्यवच्छेदस्याधिकृतत्वादिति काव्यार्थः ॥

अथ चैतन्यादयो रूपादयश्च धर्मा आत्मादेर्घटादेश्च धर्मिणोऽत्यन्तं व्यतिरिक्ता अपि समवायसंबन्धेन संबद्धाः सन्तो धर्मधर्मिव्यपदेशमश्नुवते तन्मतं दूषयन्नाह ।

न धर्मधर्मित्वमतीवभेदे
वृत्त्यास्ति चेन्न त्रितयं चकास्ति ।
इहेदमित्यस्ति मतिश्च वृत्तौ
न गौणभेदोऽपि च लोकबाधः ॥ ७ ॥

धर्मधर्मिणोरतीवभेदे [अतीवेत्यत्रेवशब्दो वाक्यालङ्कारे तं च प्रायोऽतिशब्दात्किंवृत्तेश्च प्रयुञ्जते शाब्दिकाः यथा—आवर्जिता किञ्चिदिव स्तनाभ्याम् उद्वृत्तः क इव सुखावहः परेषामित्यादि] ततश्च एकान्तभिन्नत्वेऽङ्गीक्रियमाणे धर्मधर्मित्वं न स्याद् अस्य धर्मिण इमे धर्मा एषां च धर्माणामयमाश्रयभूतो धर्मीत्येवं सर्वप्रसिद्धो धर्मधर्मिव्यपदेशो न प्राप्नोति । तयोरत्यन्तभिन्नत्वेपि तत्कल्पनायां पदार्थान्तरधर्माणामपि विवक्षितधर्मधर्मित्वापत्तेः ॥ एवमुक्ते सति परः प्रत्यवतिष्ठते । वृत्त्यास्तीति । अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतुः संबन्धः समवायः । स च समवयनात्समवाय इति द्रव्यगुणकर्मसामान्य-

विशेषेषु पञ्चसु पदार्थेषु वर्तनाद्वृत्तिरिति चाख्यायते । तया वृत्त्या समवायसंबन्धेन तयोर्धर्मधर्मिणोरितरेतरविनिर्लुण्ठितत्वेपि धर्मधर्मिव्यपदेश इष्यते । इति नानन्तरोक्तो दोष इति ।। अत्राचार्यः समाधत्ते । चेदिति । यद्येवं तव मतिः सा प्रत्यक्षप्रतिक्षिप्ता । यतो न त्रितयं चकास्ति । अयं धर्मी इमे चास्य धर्मा अयं चैतत्संबन्धनिबन्धनं समवाय इत्येतत्त्रितयं वस्तुत्रयं न चकास्ति ज्ञानविषयतया न प्रतिभासते । यथा किल शिलाशकलयुगलस्य मिथोऽनुसन्धायकं रालादिद्रव्यं तस्मात्पृथक् तृतीयतया प्रतिभासते नैवमत्र समवायस्यापि प्रतिभानं किं तु द्वयोरेव धर्मधर्मिणोरिति शपथप्रत्यायनीयोयं समवाय इति भावार्थः।। किं चायं तेन वादिना एको नित्यः सर्वव्यापको ऽमूर्तश्च परिकल्प्यते । ततो यथा घटाश्रिताः पाकजरूपादयो धर्माः समवायसंबन्धेन समवेतास्तथा किं न पटेपि । तस्यैकत्वनित्यत्वव्यापकत्वैः सर्वत्र तुल्यत्वात् । यथाकाश एको निसो व्यापकोऽमूर्तश्च सन् सर्वैः संबन्धिभिर्युगपदविशेषेण संबध्यते तथा किं नायमपीति । विनश्यदेकवस्तुसमवायाभावे च समस्तवस्तुसमवायाभावः प्रसज्यते । तत्तदवच्छेदकभेदान्नायं दोष इति चेदेवमनित्यत्वापत्तिः । प्रतिवस्तुस्वभावभेदादिति । अथ कथं समवायस्य न ज्ञाने प्रतिभासनं यतस्तस्येहेतिप्रत्ययः सावधानं साधनम् । इहप्रत्ययश्चानुभवसिद्ध एव । इह तन्तुषु पटः इहात्मनि ज्ञानम् । इह घटे रूपादय इति प्रतीतेरुपलम्भात् । अस्य च प्रत्ययस्य केवलधर्मधर्म्यनालम्बनत्वादस्ति समवायाख्यं पदार्थान्तरं तद्धेतुरिति पराशङ्कामभिसन्धाय पुनराह । इहेदमित्यस्ति मतिश्च वृत्ताविति । इहेदमिति इहेदमिति आश्रयाश्रयिभावहेतुक इहप्रत्ययो वृत्तावप्यस्ति समवायसंबन्धेपि विद्यते । चशब्दोऽपिशब्दार्थः । तस्य

च व्यवहितसंबन्धस्तथैव च व्याख्यातम् । इदमत्र हृदयम् । यथा त्वन्मते पृथिवीत्वाभिसंबन्धात्पृथिवी तत्र पृथिवीत्वं पृथिव्या एव स्वरूपमस्तित्वाख्यं नापरं वस्त्वन्तरं तेन स्वरूपेणैव समं योसावभिसंबन्धः पृथिव्याः स एव समवाय इत्युच्यते । प्राप्तानामेव प्राप्तिः समवायः इति वचनात् । एवं समवायत्वाभिसंबन्धात्समवाय इत्यपि किं न कल्प्यते । यतस्तस्यापि यत्समवायत्वं स्वस्वरूपं तेन सार्धं संबन्धोस्त्येव । अन्यथा निःस्वभावत्वाच्छशविषाणवदवस्तुत्वमेव भवेत् । ततश्च इह समवाये समवायत्वमित्युल्लेखेन इहप्रत्ययः समवायेपि युक्त्या घटत एव । ततो यथा पृथिव्यां पृथिवीत्वं समवायेन समवेतं समवायेपि समवायत्वमेवं समवायान्तरेण संबन्धनीयं तदप्यपरेणेत्येवं दुस्तरानवस्था महानदी ॥ एवं समवायस्यापि समवायत्वाभिसंबन्धे युक्त्या उपपादिते साहसिक्यमालम्ब्य पुनः पूर्वपक्षवादी वदति । ननु पृथिव्यादीनां पृथिवीत्वाभिसंबन्धनिबन्धनं समवायो मुख्यः । तत्र त्वतलादिप्रत्ययाभिव्यङ्ग्यस्य संगृहीतसकलावान्तरजातिलक्षणव्यक्तिभेदस्य सामान्यस्योद्भवात् । इह तु समवायस्यैकत्वेन व्यक्तिभेदाभावे जातेरनुद्भूतत्वाद्गौणोयं युष्मत्परिकल्पित इहेतिप्रत्ययसाध्यः समवायत्वाभिसंबन्धस्तत्साध्यश्च समवाय इति । तदेतन्न चेतश्चमत्कारकारणम् । यतोत्रापि जातिरुद्भवन्ती केन निरुध्येत । व्यक्तेरभेदेनेति चेन्न । तत्तदवच्छेदकवशात्तद्भेदोपपत्तौ व्यक्तिभेदकल्पनाया दुर्निवारत्वात् । अन्यो हि घटसमवायोन्यश्च पटसमवाय इति व्यक्त एव समवायस्यापि व्यक्तिभेद इति तत्सिद्धौ सिद्ध एव जात्युद्भवः । तस्मादन्यत्रापि मुख्य एव समवायः । इहप्रत्ययस्योभयत्राप्यव्यभिचारात् ॥

तदेतत्सकलं सपूर्वपक्षं समाधानं मनसि निधाय

सिद्धान्तवादी आह । न गौणभेद इति । गौण इति योयं भेदः स नास्ति । गौणलक्षणाभावात् । तल्लक्षणं चेत्थमाचक्षते—

अव्यभिचारी मुख्योऽविकलोऽसाधारणोऽन्तरङ्गश्च ।
विपरीतो गौणोर्थः सति मुख्ये धीः कथं गौणे ॥

तस्माद्धर्मधर्मिणोः संबन्धने मुख्यः समवायः समवाये च समवायत्वाभिसंबन्धे गौण इत्ययं भेदो नानात्वं नास्तीति भावार्थः। किं च योयमिह तन्तुषु पट इत्यादिप्रत्ययात्समवायसाधनमनोरथः स खल्वनुहरते नपुंसकादपत्यप्रसवमनोरथम्। इह तन्तुषु पट इत्यादेर्व्यवहारस्यालौकिकत्वात् । पांशुलपादानामपीह पटे तन्तुरित्येवं प्रतीतिदर्शनात् । इह भूतले घटाभाव इत्यत्रापि समवायप्रसङ्गात्। अत एवाह अपि च लोकबाध इति। अपिचेति दूषणाभ्युच्चये। लोकः प्रामाणिकलोकः सामान्यलोकश्च । तेन बाधो विरोधो लोकबाधः । तदप्रतीतव्यवहारसाधनात् । बाधशब्दस्य ईहाद्याः प्रत्ययभेदे इति पुंस्त्रीलिङ्गता । तस्माद्धर्मधर्मिणोरविष्वग्भावलक्षण एव संबन्धः प्रतिपत्तव्यो नान्यः समवायादिरिति काव्यार्थः ॥ ७ ॥

अथ सत्ताभिधानं पदार्थान्तरमात्मनश्च व्यतिरिक्तं ज्ञानाख्यं गुणमात्मविशेषगुणोच्छेदस्वरूपां च मुक्तिमज्ञानादङ्गीकृतवतः परानुपहसन्नाह ।

सतामपि स्यात्क्वचिदेव सत्ता
चैतन्यमौपाधिकमात्मनोन्यत् ।
न संविदानन्दमयी च मुक्तिः
सुसूत्रमासूत्रितमत्वदीयैः ॥ ८ ॥

वैशेषिकाणां द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट्पदार्थास्तत्त्वतयाभिप्रेताः ॥ तत्र पृथिव्यापस्तेजोवायुराकाशः कालो दिग् आत्मा मन इति नव द्रव्याणि ॥ गुणाश्चतुर्विंशतिः। तद्यथा—रूपरसगन्धस्पर्शसंख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धिः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्चेति सूत्रोक्ताः सप्तदश । चशब्दसमुच्चिताश्च सप्त–द्रवत्वं गुरुत्वं संस्कारः स्नेहो धर्माधर्मौ शब्दश्च। इत्येवं चतुर्विंशतिर्गुणाः। संस्कारस्य वेगभावनास्थितिस्थापकभेदात्त्रैविध्येपि संस्कारत्वजात्यपेक्षया एकत्वाच्छौर्यौदार्यादीनां चात्रैवान्तर्भावान्नाधिक्यम् ॥ कर्माणि पञ्च । तद्यथा–उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति। गमनग्रहणाद् भ्रमणरेचनस्यन्दनाद्यविरोधः॥ असन्तव्यावृत्तानां पिण्डानां यतः कारणादन्योन्यस्वरूपानुगमः प्रतीयते तदनुवृत्तिप्रत्ययहेतुः सामान्यम् । तच्च द्विविधं परमपरं च । तत्र परं सत्ता भावो महासामान्यमिति चोच्यते। द्रव्यत्वाद्यवान्तरसामान्यापेक्षया महाविषयत्वात्। अपरसामान्यं च द्रव्यत्वादि । एतच्च सामान्यविशेष इत्यपि व्यपदिश्यते । तथाहि द्रव्यत्वं नवसु द्रव्येषु वर्तमानत्वात्सामान्यं गुणकर्मभ्यो व्यावृत्तत्वाद्विशेषः । ततः कर्मधारये सामान्यविशेष इति । एवं द्रव्यत्वापेक्षया पृथिवीत्वादिकमपरं तदपेक्षया घटत्वादिकम् । एवं चतुर्विंशतौ गुणेषु वृत्तेर्गुणत्वं सामान्यं द्रव्यकर्मभ्यो व्यावृत्तेश्च विशेषः। एवं गुणत्वापेक्षया रूपत्वादिकं तदपेक्षया नीलत्वादिकम् । एवं पञ्चसु कर्मसु वर्तनात्कर्मत्वं सामान्यं द्रव्यगुणेभ्यो व्यावृत्तत्वाद्विशेषः । एवं कर्मत्वापेक्षया उत्क्षेपणत्वादिकं ज्ञेयम् ॥ तत्र सत्ता द्रव्यगुणकर्मभ्योर्थान्तरं कया युक्त्येति चेत् । उच्यते । न द्रव्यं सत्ता द्रव्यादन्येत्यर्थः । एकद्रव्यवत्त्वात्। एकैकस्मिन् द्रव्ये वर्तमानत्वादित्यर्थः। द्रव्यत्ववत्।

यथा द्रव्यत्वं नवसु द्रव्येषु प्रत्येकं वर्तमानं द्रव्यं न भवति किं तु सामान्यविशेषलक्षणं द्रव्यत्वमेव एवं सत्तापि । वैशेषिकाणां हि अद्रव्यं वा द्रव्यम् अनेकद्रव्यं वा द्रव्यम् । तत्राद्रव्यमाकाशः कालो दिग् आत्मा मनः परमाणवः । अनेकद्रव्यं तु द्व्यणुकादिस्कन्धः । एकद्रव्यं तु द्रव्यमेव न भवति । एकद्रव्यवती च सत्ता । इति द्रव्यलक्षणविलक्षणत्वान्न द्रव्यम् । एवं न गुणः सत्ता । गुणेषु भावाद् । गुणत्ववत् । यदि हि सत्ता गुणः स्यान्न तर्हि गुणेषु वर्तेत । निर्गुणत्वाद् गुणानाम् । वर्तते च गुणेषु सत्ता । सन् गुण इति प्रतीतेः । तथा न सत्ता कर्म । कर्मसु भावात् । कर्मत्ववत् । यदि च सत्ता कर्म स्यान्न तर्हि कर्मसु वर्तेत । निष्कर्मत्वात् कर्मणाम् । वर्त्तते च कर्मसु सत्ता । सत् कर्मेति प्रतीतेः । तस्मात् पदार्थान्तरं सत्ता ॥

तथा विशेषा नित्यद्रव्यवृत्तयोन्त्या अत्यन्तव्यावृत्तिहेतवस्ते द्रव्यादिवैलक्षण्यात् पदार्थान्तरम् । तथा च प्रशस्तकरः—अन्तेषु भवा अन्त्याः । स्वाश्रयविशेषकत्वाद्विशेषाः । विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनःसु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्तव्यावृत्तिबुद्धिहेतवः । यथास्मदादीनां गवादिष्वश्वादिभ्यस्तुल्याकृतिगुणक्रियावयवोपचयावयवविशेषसंयोगनिमित्ता प्रत्ययव्यावृत्तिर्दृष्टा गौः शुक्लः शीघ्रगतिः पीनः ककुद्मान् महाघण्ट इति तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्ममनःसु चान्यनिमित्तासंभवाद्येभ्यो निमित्तेभ्यः प्रत्याधारं विलक्षणोयं विलक्षणोयमितिप्रत्ययव्यावृत्तिर्देशकालविप्रकृष्टे च परमाणौ स एवायमिति प्रत्यभिज्ञानं च भवति तेन्त्या विशेषा इति । अमी च विशेषरूपा एव न तु द्रव्यत्वादिवत्सामान्यविशेषोभयरूपा । व्यावृत्तेरेव हेतुत्वात् ॥

तथा अयुतसिद्धानामाधार्याधारभूतानामिहप्रत्ययहेतुः संबन्धः

समवाय इति। अयुतसिद्धयोः परस्परपरिहारेण पृथगाश्रयानाश्रितयोराश्रयाश्रयिभावः इह तन्तुषु पट इत्यादेः प्रत्ययस्यासाधारणं कारणं समवायः। यद्वशात् स्वकारणसामर्थ्यादुपजायमानं पटाद्याधार्यं तन्त्वाद्याधारे संबध्यते यथा छिदिक्रिया छेद्येनेति सोपि द्रव्यादिलक्षणवैधर्म्यात् पदार्थान्तरम्॥ इति षट् पदार्थाः॥

सांप्रतमक्षरार्थो व्याक्रियते। सतामपीत्यादि। सतामपि सद्बुद्धिवेद्यतया साधारणानामपि षण्णां पदार्थानां मध्ये क्वचिदेव केषुचिदेव पदार्थेषु सत्ता सामान्ययोगः स्यात् भवेत् न सर्वेषु। तेषामेषा वाचोयुक्तिः सदिति। यतो द्रव्यगुणकर्मसु सा सत्ता इति वचनात् यत्रैव सत्प्रत्ययस्तत्रैव सत्ता। सत्प्रत्ययश्च द्रव्यगुणकर्मस्वेव अतस्तेष्वेव सत्तायोगः। सामान्यादिपदार्थत्रये तु न। तदभावात्। इदमुक्तं भवति। यद्यपि वस्तुस्वरूपमस्तित्वं सामान्यादित्रयेपि विद्यते तथापि तदनुवृत्तिप्रत्ययहेतुर्न भवति। य एव चानुवृत्तिप्रत्ययः स एव सदितिप्रत्यय इति तदभावान्न सत्तायोगः तत्र। द्रव्यादीनां पुनस्त्रयाणां षट्पदार्थसाधारणं वस्तुस्वरूपमस्तित्वमपि विद्यते। अनुवृत्तिप्रत्ययहेतुः सत्तासंबन्धोप्यस्ति। निःस्वरूपे शशविषाणादौ सत्तायाः समवायाभावात्। सामान्यादित्रिके कथं नानुवृत्तिप्रत्यय इति चेत् बाधकसद्भावादिति ब्रूमः। तथा हि—सत्तायामपि सत्तायोगाङ्गीकारेनवस्था। विशेषेषु पुनस्तदभ्युपगमे व्यावृत्तिहेतुत्वलक्षणतत्स्वरूपहानिः। समवाये तत्कल्पनायां संबन्धाभावः। केन हि संबन्धेन तत्र सत्ता संबध्यते। समवायान्तराभावात्। तथा च प्रामाणिकप्रकाण्डमुदयनः—

व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः॥

इति। ततः स्थितमेतत्सतामपि स्यात्क्वचिदेव सत्तेति॥

तथा चैतन्यमित्यादि । चैतन्यं ज्ञानम् । आत्मनः क्षेत्रज्ञात् । अन्यत् अत्यन्तव्यतिरिक्तम् । असमासकरणादत्यन्तमिति लभ्यते । अत्यन्तभेदे सति कथमात्मनः संबन्धि ज्ञानमिति व्यपदेश इति पराशङ्कापरिहारार्थम् औपाधिकमितिविशेषणद्वारेण हेत्वभिधानम् । उपाधेरागतम् औपाधिकम् । समवायसंबन्धलक्षणेनोपाधिना आत्मनि समवेतम् । आत्मनः स्वयं जडरूपत्वात् । समवायसंबन्धोपढौकितमिति यावद् । यद्यात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावाद् बुद्ध्यादीनां नवानामात्मविशेषगुणानामुच्छेदावसर आत्मनोऽप्युच्छेदः स्यात् । तदव्यतिरिक्तत्वात् । अतो भिन्नमेवात्मनो ज्ञानं यौक्तिकमिति ॥ तथा न संविदित्यादि । मुक्तिर्मोक्षः । न संविदानन्दमयी न ज्ञानसुखरूपा । संविद् ज्ञानम् । आनन्दः सौख्यम् । ततो द्वन्द्वः । संविदानन्दौ प्रकृतौ यस्यां सा संविदानन्दमयी । तादृशी न भवति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काररूपाणां नवानामात्मनो वैशेषिकगुणानामत्यन्तोच्छेदो मोक्ष इति वचनात् । चशब्दः पूर्वोक्ताभ्युपगमद्वयसमुच्चये । ज्ञानं हि क्षणिकत्वादनित्यं सुखं च सप्रक्षयतया सातिशयतया च न विशिष्यते संसारावस्थातः । इति तदुच्छेदे आत्मस्वरूपेणावस्थानं मोक्ष इति । प्रयोगश्चात्र—नवानामात्मविशेषगुणानां संतानोत्यन्तमुच्छिद्यते । संतानत्वात् । यो यः संतानः स सोत्यन्तमुच्छिद्यते यथा प्रदीपसंतानः । तथा चायं । तस्मादत्यन्तमुच्छिद्यते इति । तदुच्छेद एव महोदयो न कृत्स्नकर्मक्षयलक्षण इति । न हि वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशतः इत्यादयोपि वेदान्तास्तादृशीमेव मुक्तिमादिशन्ति । अत्र हि प्रिया-

प्रिये सुखदुःखे ते चाशरीरं मुक्तं न स्पृशतः । अपि च

यावदात्मगुणाः सर्वे नोच्छिन्ना वासनादयः ।
तावदात्यन्तिकी दुःखव्यावृत्तिर्न विकल्प्यते ॥ १ ॥
धर्माधर्मनिमित्तो हि संभवः सुखदुःखयोः ।
मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः ॥ २ ॥
तदुच्छेदे च तत्कार्यशरीराद्यनुपप्लवात् ।
नात्मनः सुखदुःखे स्त इत्यसौ मुक्त उच्यते ॥ ३ ॥
इच्छाद्वेषप्रयत्नादि भोगायतनबन्धनम् ।
उच्छिन्नभोगायतनो नात्मा तैरपि युज्यते ॥४॥
तदेवं धिषणादीनां नवानामपि मूलतः ।
गुणानामात्मनो ध्वंसः सोपवर्गः प्रतिष्ठितः ॥५॥
ननु तस्यामवस्थायां कीदृगात्मावशिष्यते ।
स्वरूपैकप्रतिष्ठानः परित्यक्तोखिलैर्गुणैः ॥६॥
ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः ।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥ ७ ॥

कामक्रोधलोभगर्वदम्भहर्षाः ऊर्मिषट्कमिति। तदेतदभ्युपगमत्रयमित्थं समर्थयद्भिः अत्वदीयैस्त्वदाज्ञाबहिर्भूतैः कणादमतानुगामिभिः सुसूत्रमासूत्रितम् सम्यगागमः प्रपञ्चितः। अथ वा सुसूत्रमिति क्रियाविशेषणम्। शोभनं सूत्रं वस्तुव्यवस्थाघटनाविज्ञानं यत्रैवमासूत्रितं तत्तच्छास्त्रार्थोपनिबन्धः कृत इति हृदयम्। सूत्रं तु सूचनाकारि ग्रन्थे तन्तुव्यवस्थयोः इत्यनेकार्थवचनात् । अत्र सुसूत्रमिति विपरीतलक्षणयोपहासगर्भं प्रशंसावचनम्। यथा—उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता चिरम् इत्यादि। उपहसनीयता च युक्तिरिक्तत्वात् तदङ्गीकरणम्। तथा हि अविशेषेण सद्बुद्धिवेद्येष्वपि सर्वपदार्थेषु द्रव्यादिष्वेव त्रिषु सत्तासंबन्धः स्वीक्रियते न सामान्या-

दित्रये इति महतीयं पश्यतोहरता । यतः परिभाव्यतां सत्ताशब्दस्य शब्दार्थः। अस्तीति सन्। सतो भावः सत्ता अस्तित्वम्। तद्वस्तुस्वरूपं निर्विशेषमशेषेष्वपि पदार्थेषु त्वयाप्युक्तम् । तत्किमिदमर्धजरतीयं यद्द्रव्यादित्रय एव सत्तायोगो नेतरत्र त्रये इति । अनुवृत्तिप्रत्ययाभावान्न सामान्यादित्रये सत्तायोग इति चेत् न । तत्राप्यनुवृत्तिप्रत्ययस्यानिवार्यत्वात् । पृथिवीत्वगोत्वघटत्वादिसामान्येषु सामान्यं सामान्यमिति विशेषेष्वपि बहुत्वादयमपि विशेषोयमपि विशेष इति समवाये च प्रागुक्तयुक्त्या तत्तदवच्छेदकभेदात् एकाकारप्रतीतेरनुभवात् । स्वरूपत्वसाधर्म्येण सत्ताध्यारोपात् । सामान्यादिष्वपि सत्सदित्यनुगम इति चेत् तर्हि मिथ्याप्रत्ययोयमापद्यते । अथ भिन्नस्वभावेष्वेकानुगमो मिथ्यैवेति चेत् द्रव्यादिष्वपि सत्ताध्यारोपकृत एवास्तु प्रत्ययानुगमः । असति मुख्येध्यारोपस्यासंभवात् । द्रव्यादिषु मुख्योयमनुगतः प्रत्ययः सामान्यादिषु तु गौण इति चेत् न । विपर्ययस्यापि शक्यकल्पनत्वात् । सामान्यादिषु बाधकसंभवान्न मुख्योनुगतः प्रत्ययः द्रव्यादिषु तु तदभावान्मुख्य इति चेत् ननु किमिदं बाधकम् । अथ सामान्येपि सत्ताभ्युपगमेनवस्था विशेषेषु पुनः सामान्यसद्भावे स्वरूपहानिः समवायेपि सत्ताकल्पने तद्वृत्त्यर्थं संबन्धान्तराभाव इति बाधकानीति चेत् न । सामान्येपि सत्ताकल्पने यद्यनवस्था तर्हि कथं न सा द्रव्यादिषु । तेषामपि स्वरूपसत्तायाः प्रागेव विद्यमानत्वात् । विशेषेषु पुनः सत्ताभ्युपगमेपि न रूपहानिः । स्वरूपस्य प्रत्युतोत्तेजनात् । निःसामान्यस्य विशेषस्य क्वचिदप्यनुपलम्भात् । समवायेपि समवायत्वलक्षणायाः स्वरूपसत्तायाः स्वीकारे उपपद्यत एवाविष्वग्भावात्मकः संबन्धः । अन्यथा तस्य स्वरूपाभावप्रसङ्गः । इति बाधकाभावात् तेष्वपि द्रव्यवन्मुख्य एव सत्तासंबन्ध इति व्यर्थं

द्रव्यगुणकर्मस्वेव सत्ताकल्पनम् ॥ किं च तैर्वादिभिर्यो द्रव्यादित्रये मुख्यः सत्तासंबन्धः कक्षीकृतः सोऽपि विचार्यमाणो विशीर्येत । तथा हि—यदि द्रव्यादिभ्योऽत्यन्तविलक्षणा सत्ता तदा द्रव्यादीन्यसद्रूपाण्येव स्युः । सत्तायोगात्सत्त्वमस्त्येवेति चेत् असतां सत्तायोगेपि कुतः सत्त्वम् । सतां तु निष्फलः सत्तायोगः । स्वरूपसत्त्वं भावानामस्त्येवेति चेत् तर्हि किं शिखण्डिना सत्तायोगेन । सत्तायोगात्प्राग् भावो न सन् नाप्यसन् सत्तायोगात्तु सन्निति चेत् वाङ्मात्रमेतत् । सदसद्विलक्षणस्य प्रकारान्तरस्यासंभवात् । तस्मात् सतामपि स्यात्क्वचिदेव सत्तेति तेषां वचनं विदुषां परिषदि कथमिव नोपहासाय जायते ॥ ज्ञानमपि यद्येकान्तेनात्मनः सकाशाद्भिन्नमिष्यते तदा तेन चैत्रज्ञानेन मैत्रस्येव नैव विषयपरिच्छेद् स्यादात्मनः । अथ यत्रैवात्मनि समवायसंबन्धेन समवेतं ज्ञानं तत्रैव भावावभासं करोतीति चेन्न । समवायस्यैकत्वान्नित्यत्वाद्व्यापकत्वाच्च । सर्वत्र वृत्तेरविशेषात्समवायवदात्मनामपि व्यापकत्वादेकज्ञानेन सर्वेषां विषयावबोधप्रसङ्गः । यथा च घटे रूपादयः समवायसंबन्धेन समवेतास्तद्विनाशे च तदाश्रयस्य घटस्यापि विनाश एवं ज्ञानमप्यात्मनि समवेतम् तच्च क्षणिकम् ततस्तद्विनाशे आत्मनोपि विनाशापत्तेरनित्यत्वापत्तिः । अथास्तु समवायेन ज्ञानात्मनोः संबन्धः । किं तु स एव समवायः केन तयोः संबध्यते । समवायान्तरेण चेत् अनवस्था । स्वेनैव चेत् किं न ज्ञानात्मनोरपि तथा । अथ यथा प्रदीपस्वाभाव्यादात्मानं परं च प्रकाशयति तथा समवायस्येदृगेव स्वभावो यदात्मानं ज्ञानात्मानौ च संबन्धयतीति चेत् ज्ञानात्मनोरपि किं न तथास्वभावता येन स्वयमेवैतौ संबध्येते । किं च प्रदीपदृष्टान्तोपि भवत्पक्षे न जाघटीति । यतः प्रदीपस्तावद्द्रव्यं

प्रकाशश्च तस्य धर्मो धर्मधर्मिणोश्च त्वयात्यन्तं भेदोऽभ्युपगम्यते तत्कथं प्रदीपस्य प्रकाशात्मकता। तदभावे च स्वपरप्रकाशकस्वभावताभणितिर्निर्मूलैव । यदि च प्रदीपात्प्रकाशस्यात्यन्तभेदेऽपि प्रदीपस्य स्वपरप्रकाशकत्वमिष्यते तदा घटादीनामपि तदनुषज्यते। भेदाविशेषात् । अपि च तौ स्वपरसंबन्धस्वभावौ समवायाद्भिन्नौ स्यातामभिन्नौ वा । यदि भिन्नौ ततस्तस्यैतौ स्वभावाविति कथं संबन्धः । संबन्धनिबन्धनस्य समवायान्तरस्यानवस्थाभयादनभ्युपगमात्। अथाभिन्नौ ततः समवायमात्रमेव। न तौ। तदव्यतिरिक्तत्वात्तत्स्वरूपवदिति । किं च यथा इह समवायिषु समवाय इति प्रतीतिः समवायं विनाप्युपपन्ना तथा इहात्मनि ज्ञानमित्ययमपि प्रत्ययस्तं विनैव चेदुच्यते तदा को दोषः। अथात्मा कर्ता ज्ञानं करणं कर्तृकरणयोश्च वर्द्धकिवासीवद्भेद एव प्रतीतस्तत्कथं ज्ञानात्मनोरभेद इति । तन्न । दृष्टान्तस्य वैषम्यात् । वासी हि बाह्यं करणं ज्ञानं चाभ्यन्तरं तत्कथमनयोः साधर्म्यम् । न चैवं करणस्य द्वैविध्यमप्रसिद्धम् । यदाहुर्लाक्षणिकाः ।

करणं द्विविधं ज्ञेयं बाह्यमाभ्यन्तरं बुधैः ।
यथा लुनाति दात्रेण मेरुं गच्छति चेतसा ॥

यदि हि किंचित्करणमान्तरमेकान्तेन भिन्नमुपदर्श्यते ततः स्यात् दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यम् । न च तथाविधमस्ति । न च बाह्यकरणगतो धर्मः सर्वोऽप्यान्तरे योजयितुं शक्यते । अन्यथा दीपेन चक्षुषा देवदत्तः पश्यतीत्यत्रापि दीपादिच्चक्षुषोऽप्येकान्तेन देवदत्तस्य भेदः स्यात्। तथा च सति लोकप्रतीतिविरोध इति । अपि च साध्यविकलोऽपि वासीवर्द्धकिदृष्टान्तः। तथा हि नायं वर्द्धकिः काष्ठमिदमनया वास्या घटयिष्य इत्येवं वासीग्रहणपरिणामेनापरिणतः सन् तामगृहीत्वा घटयति किं तु तथा परिणतस्तां गृहीत्वा ।

तथा परिणामेन वासिरपि तस्य काष्ठस्य घटने व्याप्रियते पुरुषोपि। इत्येवं लक्षणैकार्थसाधकत्वाद्वासीवर्द्धक्योरभेदोप्युपपद्यते । तत्कथमनयोर्भेद एवेत्युच्यते । एवमात्मापि विवक्षितमर्थमनेन ज्ञानेन ज्ञास्यामीति ज्ञानग्रहणपरिणामवान् ज्ञानं गृहीत्वार्थं व्यवस्यति।ततश्च ज्ञानात्मनोरुभयोरपि संवित्तिलक्षणैककार्यसाधकत्वादभेद एव।एवं कर्तृकरणयोरभेदे सिद्धे संवित्तिलक्षणं कार्यं किमात्मनि व्यवस्थितं आहोस्विद्विषय इति वाच्यम्। आत्मनि चेत् सिद्धं नः समीहितम्। विषये चेत् कथमात्मनोनुभवः प्रतीयते । अथ विषयस्थितसंवित्तेः सकाशादात्मनोनुभवःतर्हि किं न पुरुषान्तरस्यापि । तद्भेदाविशेषात्। अथ ज्ञानात्मनोरभेदपक्षे कथं कर्तृकरणभाव इति चेत् ननु यथा सर्प आत्मानमात्मना वेष्टयतीत्यत्र अभेदे यथा कर्तृकरणभावस्तथात्रापि । अथ परिकल्पितोऽयं कर्तृकरणभाव इति चेत् वेष्टनावस्थायां प्रागवस्थाविलक्षणगतिनिरोधलक्षणार्थक्रियादर्शनात् कथं परिकल्पितत्वम् । न हि परिकल्पनाशतैरपि शैलस्तम्भ आत्मानमात्मना वेष्टयतीति वक्तुं शक्यम् । तस्मादभेदेपि कर्तृकरणभावः सिद्ध एव॥ किं च चैतन्यमितिशब्दस्य चिन्त्यतामन्वर्थः । चेतनस्य भावश्चैतन्यम् । चेतनश्चात्मा त्वयापि कीर्त्यते । तस्य भावः स्वरूपं चैतन्यम्। यच्च यस्य स्वरूपं न तत्ततो भिन्नं भवितुमर्हति । यथा वृक्षाद्वृक्षस्वरूपम् । अथास्ति चेतन आत्मा। परं चेतनासमवायसंबन्धात् न स्वतः तथाप्रतीतेरिति चेत् तदयुक्तम्। यतः प्रतीतिश्चेत्प्रमाणीक्रियते तर्हि निर्बाधमुपयोगात्मक एवात्मा प्रसिद्ध्यति। न हि जातुचित्स्वयमचेतनोहं चेतनायोगाच्चेतनः अचेतने वा मयि चेतनायाः समवाय इति प्रतीतिरस्ति । ज्ञाताहमिति समानाधिकरणतया प्रतीतेः। भेदे तथाप्रतीतिरिति चेत् न । कथंचित्तादात्म्याभावे सामानाधिकरण्य-

प्रतीतेरदर्शनात् । यष्टिः पुरुष इत्यादिप्रतीतिस्तु भेदे सत्युपचारात् दृष्टा न पुनस्तात्त्विकी । उपचारस्य तु बीजं पुरुषस्य यष्टिगतस्तब्धत्वादिगुणैरभेदः । उपचारस्य मुख्यार्थस्पर्शित्वात् । तथा चात्मनि ज्ञाताहमिति प्रतीतिः कथंचिच्चेतनात्मतां गमयति । तामन्तरेण ज्ञाताहमितिप्रतीतेरनुपपद्यमानत्वात् । घटादिवत् । न हि घटादिरचेतनात्मको ज्ञाताहमिति प्रत्येति । चैतन्ययोगाभावादसौ न तथा प्रत्येतीति चेत् न । अचेतनस्यापि चैतन्ययोगाच्चेतनोहमिति प्रतिपत्तेरनन्तरमेव निरस्तत्वात् । इत्यचेतनत्वं सिद्धमात्मनो जडस्यार्थपरिच्छेदं पराकरोति । तं पुनरिच्छता चैतन्यस्वरूपतास्य स्वीकरणीया ॥ ननु ज्ञानवानहमितिप्रत्ययादात्मज्ञानयोर्भेदः अन्यथा धनवानितिप्रत्ययादपि धनधनवतोर्भेदाभावानुषङ्गात् । तदसत् । यतो ज्ञानवानहमिति नात्मा भवन्मते प्रत्येति जडत्वैकान्तरूपत्वात् । घटवत् । सर्वथा जडश्च स्यादात्मा ज्ञानवानहमितिप्रत्ययश्च स्यादस्य विरोधाभावात् इति मा निर्णैषीः। तस्य तथोत्पत्त्यसंभवात् । ज्ञानवानहमिति हि प्रत्ययो नागृहीतज्ञानाख्ये विशेषणे विशेष्ये चात्मनि जातूत्पद्यते । स्वमतविरोधात् । नागृहीतविशेषणा विशेष्ये बुद्धिः इति वचनात् । गृहीतयोस्तयोरुत्पद्यत इति चेत्कुतस्तद्गृहीतिः। न तावत्स्वतः । स्वयंवेदनानभ्युपगमात् । स्वयंविदिते ह्यात्मनि ज्ञाने च स्वतः सा युज्यते नान्यथा । संतानान्तरवत् । परतश्चेत्तदपि ज्ञानान्तरं विशेष्यं नागृहीते ज्ञानत्वविशेषणे ग्रहीतुं शक्यम् । गृहीते हि घटत्वे घटग्रहणमिति ज्ञानान्तरात्तद्ग्रहणेन भाव्यमित्यनवस्थानात् कुतः प्रकृतप्रत्ययः । तदेवं नात्मनो जडस्वरूपता संगच्छते । तदसंगतौ च चैतन्यमौपाधिकमात्मनोऽन्यत् इति वाङ्मात्रम् ॥

तथा यदपि न संविदानन्दमयी च मुक्तिरिति व्यवस्थापनायानुमानमवादि संतानत्वादिति तत्राभिधीयते । ननु किमिदं संतानत्वं स्वतन्त्रमपरापरपदार्थोत्पत्तिमात्रं वा एकाश्रयापरापरोत्पत्तिर्वा । तत्राद्यः पक्षः सव्यभिचारः । अपरापरेषामुत्पादुकानां घटपटकटादीनां संतानत्वेऽप्यत्यन्तमनुच्छिद्यमानत्वात् । अथ द्वितीयपक्षः तर्हि तादृशं संतानत्वं प्रदीपे नास्तीति साधनविकलो दृष्टान्तः। परमाणुपाकजरूपादिभिश्च व्यभिचारी हेतुः।तथाविधसंतानत्वस्य तत्र सद्भावेऽप्यत्यन्तोच्छेदाभावात्। अपि च संतानत्वमपि भविष्यति अत्यन्तानुच्छेदश्च भविष्यति। विपर्ययबाधकप्रमाणाभावात्। इति संदिग्धविपक्षव्यावृत्तिकत्वादप्यनैकान्तिकोऽयम् । किं च स्याद्वादवादिनां नास्ति कश्चिदत्यन्तमुच्छेदो द्रव्यरूपतया स्थास्नूनामेव सतां भावानामुत्पादव्यययुक्तत्वात् इति विरुद्धश्च। इति नाधिकृतानुमानाद्बुद्ध्यादिगुणोच्छेदरूपा सिद्धिः सिध्यति॥नापि न हि वै सशरीरस्य इत्यादेरागमात्। स हि शुभाशुभादृष्टपरिपाकजन्ये सांसारिकप्रियाप्रिये परस्परानुषक्ते अपेक्ष्य व्यवस्थितः। मुक्तिदशायां तु सकलादृष्टक्षयहेतुकमैकान्तिकमात्यन्तिकं च केवलं प्रियमेव तत्कथं प्रतिषिध्यते। आगमस्य चायमर्थः सशरीरस्य गतिचतुष्टयान्यतमस्थानवर्तिनः आत्मनः प्रियाप्रिययोः परस्परानुषक्तयोः सुखदुःखयोरपहतिरभावो नास्तीति। अवश्यं हि तत्र सुखदुःखाभ्यां भाव्यम्। परस्परानुषक्तत्वं च समासकरणादभ्यूह्यते। अशरीरं मुक्तात्मानम् । वाशब्दस्यैवकारार्थत्वादशरीरमेव सन्तं सिद्धिक्षेत्रमध्यासीनं प्रियाप्रिये परस्परानुषक्ते सुखदुःखे न स्पृशतः। इदमत्र हृदयम्। यथा किल संसारिणः सुखदुःखे परस्परानुषक्ते स्यातां न तथा मुक्तात्मनः किं तु केवलं सुखमेव। दुःखमूलस्य शरीरस्यैवाभावात्। सुखं त्वात्मस्वरूपत्वादवस्थितमेव।

स्वस्वरूपावस्थानं हि मोक्षः । अत एवाशरीरमित्युक्तम् । आगमार्थश्चायमित्थमेव समर्थनीयः । यत एतदर्थानुपातिन्येव स्मृतिरपि दृश्यते ।

सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।
तं वै मोक्षं विजानीयाद्दुष्प्रापमकृतात्मभिः ॥

न चायं सुखशब्दो दुःखाभावमात्रे वर्तते । मुख्यसुखवाच्यतायां बाधकाभावात् । अयं रोगाद्विप्रमुक्तः सुखी जात इत्यादिवाक्येषु च सुखीतिप्रयोगस्य पौनरुक्त्यप्रसङ्गाच्च । दुःखाभावमात्रस्य रोगाद्विप्रयुक्त इतीयतैव गतत्वात् । न च भवदुदीरितो मोक्षः पुंसामुपादेयतया संमतः । को हि नाम शिलाकल्पमपगतसकलसुखसंवेदनमात्मानमुपपादयितुं यतेत । दुःखसंवेदनरूपत्वादस्य सुखदुःखयोरेकस्याभावेऽपरस्यावश्यंभावात् । अत एव त्वदुपहासः श्रूयते ।

वरं वृन्दावने रम्ये क्रोष्टृत्वमभिवाञ्छितम् ।
न तु वैशेषिकीं मुक्तिं गौतमो गन्तुमिच्छति ॥

सोपाधिकसावधिकपरिमितानन्दनिष्यन्दात् स्वर्गादप्यधिकं तद्विपरीतानन्दमम्लानज्ञानं च मोक्षमाचक्षते विचक्षणाः । यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत् तदलमपवर्गेण । संसार एव वरमस्तु । यत्र तावदन्तरान्तरापि दुःखकलुषितमपि कियदपि सुखमनुभुज्यते चिन्त्यतां तावत्किमल्पसुखानुभवो भव्य उत सर्वसुखोच्छेद एव । अथास्ति तथाभूते मोक्षे लाभातिरेकः प्रेक्षादक्षाणाम् । ते ह्येवं विवेचयन्ति । संसारे तावत् दुःखास्पृष्टं सुखं न संभवति दुःखं चावश्यं हेयं विवेकहानं चानयोरेकभाजनपतितविषमधुनोरिव दुःशक्यमत एव द्वे अपि त्यज्येते । अतश्च संसारान्मोक्षः श्रेयान् । यतोत्र दुःखं

सर्वथा न स्यात् । वरमियती कादाचित्कसुखमात्रापि त्यक्ता न तु तस्याः कृते दुःखभार इयान् व्यूढ इति । तदेतत्ससम् । सांसारिकसुखस्य मधुदिग्धधाराकरालमण्डलाग्रग्रासवद्दुःखरूपत्वादेव युक्तैव मुमुक्षूणां तज्जिहासा । किंत्वात्यन्तिकसुखविशेषलिप्सूनामेव । इहापि विषयनिवृत्तिजं सुखमनुभवसिद्धं तद्यदि मोक्षे विशिष्टं नास्ति ततो मोक्षो दुःखरूप एवापद्यत इत्यर्थः । ये अपि विषमधुनी एकत्र संपृक्ते त्यज्येते ते अपि सुखविशेषलिप्सयैव । किञ्च यथा प्राणिनां संसारावस्थायां सुखमिष्टं दुःखं चानिष्टं तथा मोक्षावस्थायां दुःखनिवृत्तिरिष्टा सुखनिवृत्तिस्त्वनिष्टैव । ततो यदि त्वदभिमतो मोक्षः स्यात्तदा न प्रेक्षावतां प्रवृत्तिः स्यात् । भवति चेयम् । ततः सिद्धो मोक्षः सुखसंवेदनस्वभावः । प्रेक्षावत्प्रवृत्तेरन्यथानुपपत्तेः । अथ यदि सुखसंवेदनैकस्वभावो मोक्षः स्यात्तदा तद्रागेण प्रवर्तमानो मुमुक्षुर्न मोक्षमधिगच्छेत् । नहि रागिणां मोक्षोस्ति । रागस्य बन्धनात्मकत्वात् । नैवम् । सांसारिकसुखमेव रागो बन्धनात्मको विषयादिप्रवृत्तिहेतुत्वात् । मोक्षसुखे तु रागो न बन्धनात्मकः । परां कोटिमारूढस्य च स्पृहामात्ररूपोप्यसौ निवर्तते । मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः इति वचनात् । अन्यथा भवत्पक्षेपि दुःखनिवृत्त्यात्मकमोक्षाङ्गीकृतौ दुःखविषयकषायकालुष्यं केन निषिध्येत । इति सिद्धं कृत्स्नकर्मक्षयात्परमसुखसंवेदनात्मको मोक्षो न बुद्ध्यादिविशेषगुणोच्छेदरूप इति ॥ अपि च भोः तपस्विन् कथं चिदुच्छेदोस्माकमप्यभिमत एवैषामिति मा विरूपं मनः कृथाः । तथा हि बुद्धिशब्देन ज्ञानमुच्यते । तच्च मतिश्रुतावधिमनःपर्यायकेवलभेदात्पञ्चधा । तत्राद्यं ज्ञानचतुष्टयं क्षायोपशमिकत्वात् केवलज्ञानाविर्भावकाल एव प्रलीनम् । "नट्ठंमि उ छाउमत्थिए नाणे" इत्यागमात् । केवलं तु सर्वद्रव्यपर्यायगतं क्षायिक-

स्वस्वरूपावस्थानं हि मोक्षः । अत एवाशरीरमित्युक्तम् । आगमार्थश्चायमित्थमेव समर्थनीयः । यत एतदर्थानुपातिन्येव स्मृतिरपि दृश्यते ।

सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।
तं वै मोक्षं विजानीयाद्दुष्प्रापमकृतात्मभिः ॥

न चायं सुखशब्दो दुःखाभावमात्रे वर्तते । मुख्यसुखवाच्यतायां बाधकाभावात् । अयं रोगाद्विप्रमुक्तः सुखी जात इत्यादिवाक्येषु च सुखीतिप्रयोगस्य पौनरुक्त्यप्रसङ्गाच्च । दुःखाभावमात्रस्य रोगाद्विप्रयुक्त इतीयतैव गतत्वात् । न च भवदुदीरितो मोक्षः पुंसामुपादेयतया संमतः । को हि नाम शिलाकल्पमपगतसकलसुखसंवेदनमात्मानमुपपादयितुं यतेत । दुःखसंवेदनरूपत्वादस्य सुखदुःखयोरेकस्याभावेऽपरस्यावश्यंभावात् । अत एव त्वदुपहासः श्रूयते ।

वरं वृन्दावने रम्ये क्रोष्टृत्वमभिवाञ्छितम् ।
न तु वैशेषिकीं मुक्तिं गौतमो गन्तुमिच्छति ॥

सोपाधिकसावधिकपरिमितानन्दनिष्यन्दात् स्वर्गादप्यधिकं तद्विपरीतानन्दमम्लानज्ञानं च मोक्षमाचक्षते विचक्षणाः । यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत् तदलमपवर्गेण । संसार एव वरमस्तु । यत्र तावदन्तरान्तरापि दुःखकलुषितमपि कियदपि सुखमनुभुज्यते चिन्त्यतां तावत्किमल्पसुखानुभवो भव्य उत सर्वसुखोच्छेद एव । अथास्ति तथाभूते मोक्षे लाभातिरेकः प्रेक्षादक्षाणाम् । ते ह्येवं विवेचयन्ति । संसारे तावत् दुःखास्पृष्टं सुखं न संभवति दुःखं चावश्यं हेयं विवेकहानं चानयोरेकभाजनपतितविषमधुनोरिव दुःशक्यमत एव द्वे अपि त्यज्येते । अतश्च संसारान्मोक्षः श्रेयान् । यतोत्र दुःखं

सर्वथा न स्यात् । वरमियती कादाचित्कसुखमात्रापि त्यक्ता न तु तस्याः कृते दुःखभार इयान् व्यूढ इति । तदेतत्ससम् । सांसारिकसुखस्य मधुदिग्धधाराकरालमण्डलाग्रग्रासवद्दुःखरूपत्वादेव युक्तैव मुमुक्षूणां तज्जिहासा । किंत्वात्यन्तिकसुखविशेषलिप्सूनामेव । इहापि विषयनिवृत्तिजं सुखमनुभवसिद्धं तद्यदि मोक्षे विशिष्टं नास्ति ततो मोक्षो दुःखरूप एवापद्यत इत्यर्थः । ये अपि विषमधुनी एकत्र संपृक्ते त्यज्येते ते अपि सुखविशेषलिप्सयैव । किञ्च यथा प्राणिनां संसारावस्थायां सुखमिष्टं दुःखं चानिष्टं तथा मोक्षावस्थायां दुःखनिवृत्तिरिष्टा सुखनिवृत्तिस्त्वनिष्टैव । ततो यदि त्वदभिमतो मोक्षः स्यात्तदा न प्रेक्षावतां प्रवृत्तिः स्यात् । भवति चेयम् । ततः सिद्धो मोक्षः सुखसंवेदनस्वभावः । प्रेक्षावत्प्रवृत्तेरन्यथानुपपत्तेः । अथ यदि सुखसंवेदनैकस्वभावो मोक्षः स्यात्तदा तद्रागेण प्रवर्तमानो मुमुक्षुर्न मोक्षमधिगच्छेत् । नहि रागिणां मोक्षोस्ति।रागस्य बन्धनात्मकत्वात् । नैवम्। सांसारिकसुखमेव रागो बन्धनात्मको विषयादिप्रवृत्तिहेतुत्वात् ।मोक्षसुखे तु रागो न बन्धनात्मकः । परां कोटिमारूढस्य च स्पृहामात्ररूपोप्यसौ निवर्तते । मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः इति वचनात् । अन्यथा भवत्पक्षेपि दुःखनिवृत्त्यात्मकमोक्षाङ्गीकृतौ दुःखविषयकषायकालुष्यं केन निषिध्येत । इति सिद्धं कृत्स्नकर्मक्षयात्परमसुखसंवेदनात्मको मोक्षो न बुद्ध्यादिविशेषगुणोच्छेदरूप इति ॥ अपि च भोः तपस्विन् कथं चिदुच्छेदोस्माकमप्यभिमत एवैषामिति मा विरूपं मनः कृथाः। तथा हि बुद्धिशब्देन ज्ञानमुच्यते । तच्च मतिश्रुतावधिमनःपर्यायकेवलभेदात्पञ्चधा । तत्राद्यं ज्ञानचतुष्टयं क्षायोपशमिकत्वात् केवलज्ञानाविर्भावकाल एव प्रलीनम् । "नट्ठंमि उ छाउमत्थिए नाणे" इत्यागमात् । केवलं तु सर्वद्रव्यपर्यायगतं क्षायिक-

त्वेन निष्कलङ्कात्मस्वरूपत्वादस्त्येव मोक्षावस्थायां सुखं तु वैषयिकं तत्र नास्ति। तद्धेतोर्वेदनीयकर्मणोऽभावात्। यत्तु निरतिशयमक्षयमनपेक्षमनन्तं च सुखं तद्बाढं विद्यते। दुःखस्य चाधर्ममूलत्वात्तदुच्छेदादुच्छेदः। नन्वेवं सुखस्यापि धर्ममूलत्वाद्धर्मस्य चोच्छेदात्तदपि न युज्यते। पुण्यपापक्षयो मोक्षः इत्यागमवचनात्। नैवम्। वैषयिकसुखस्यैव धर्ममूलत्वाद्भवतु तदुच्छेदो न पुनरनपेक्षस्यापि सुखस्योच्छेदः। इच्छाद्वेषयोः पुनर्मोहभेदत्वात् तस्य च समूलकाषंकषितत्वादभावः। प्रयत्नश्च क्रियाव्यापारगोचरो नास्त्येव। कृतकृत्यत्वात्। वीर्यान्तरायक्षयोपनतस्त्वस्त्येव प्रयत्नो दानादिलब्धिवत्। न च क्वचिदुपयुज्यते कृतार्थत्वात्। धर्माधर्मयोस्तु पुण्यपापापरपर्याययोरुच्छेदोऽस्त्येव। तदभावे मोक्षस्यैवायोगात्। संस्कारश्च मतिज्ञानविशेष एव। तस्य च मोहक्षयानन्तरमेव क्षीणत्वादभाव इति। तदेवं न संविदानन्दमयी च मुक्तिरिति युक्तिरिक्तेयमुक्तिरिति काव्यार्थः॥ ८॥

अथ ते वादिनः कायप्रमाणत्वमात्मनः स्वयंसंवेद्यमानमप्यपलप्य तादृशकुशास्त्रशस्त्रसंपर्कविनष्टदृष्टयस्तस्य विभुत्वं मन्यन्ते। अतस्तत्रोपालम्भमाह।

यत्रैव यो दृष्टगुणः स तत्र
कुम्भादिवन्निष्प्रतिपक्षमेतत्।
तथापि देहाद्बहिरात्मतत्त्व-
मतत्त्ववादोपहताः पठन्ति॥ ९॥

यत्रैव देशे यः पदार्थो दृष्टगुणो दृष्टाः प्रत्यक्षादिप्रमाणतोऽनुभूता गुणा धर्मा यस्य स तथा स पदार्थस्तत्रैव विवक्षितदेश एवोपपद्यते। क्रियाध्याहारो गम्यः। पूर्वस्यैवकारस्यावधारणार्थस्याता-

ष्यभिसंबन्धात् तत्रैव नान्यत्रेत्यन्ययोगव्यवच्छेदः । अमुमेवार्थं दृष्टान्तेन द्रढयति । कुम्भादिवदिति । घटादिवत् । यथा कुम्भादेर्यत्रैव देशे रूपादयो गुणा उपलभ्यन्ते तत्रैव तेषामास्तित्वं प्रतीयते नान्यत्र एवमात्मनोपि गुणाश्चैतन्यादयो देह एव दृश्यन्ते न बहिः तस्मात् तत्प्रमाण एवायमिति । यद्यपि पुष्पादीनामवस्थानदेशादन्यत्रापि गन्धादिगुण उपलभ्यते तथापि तेन न व्यभिचारः । तदाश्रया हि गन्धादिपुद्गलास्तेषां च वैस्रसिक्या प्रायोगिक्या वा गत्या गतिमत्त्वेन तदुपलम्भकघ्राणादिदेशं यावदागमनोपपत्तेरिति । अत एवाह । निष्प्रतिपक्षमेतदिति । एतन्निष्प्रतिपक्षं बाधकरहितम् । न हि दृष्टेऽनुपपन्नं नामेति न्यायात् । ननु मन्त्रादीनां भिन्नदेशस्थानामप्याकर्षणोच्चाटनादिको गुणो योजनशतादेः परतोपि दृश्यते इत्यस्ति बाधकमिति चेत् मैवं वोचः । स हि न खलु मन्त्रादीनां गुणः किं तु तदधिष्ठातृदेवतानाम् । तासां चाकर्षणीयोच्चाटनीयादिदेशगमने कौतस्कुतोऽयमुपालम्भः । न जातु गुणा गुणिनमतिरिच्य वर्तन्त इति ॥

अथोत्तरार्धं व्याख्यायते । तथापीत्यादि । तथाप्येवं निःसपत्नं व्यवस्थितेपि तत्त्वे । अतत्त्ववादोपहताः । अनाचार इत्यत्रेव नञः कुत्सार्थत्वात् । कुत्सिततत्त्ववादेन तदभिमताप्ताभासपुरुषविशेषप्रणीतेन तत्त्वाभासप्ररूपणेनोपहता व्यामोहिताः । देहाद्बहिः शरीरव्यतिरिक्तेपि देशे । आत्मतत्त्वमात्मस्वरूपम् । पठन्ति शास्त्ररूपतया प्रणयन्ति ॥ इत्यक्षरार्थः ॥

भावार्थस्त्वयम् । आत्मा सर्वगतो न भवति । सर्वत्र तद्गुणानुपलब्धेः । यो यः सर्वत्रानुपलभ्यमानगुणः स सर्वगतो न भवति यथा घटः। तथा चायम् । तस्मात् तथा । व्यतिरेके व्योमादिः॥ न चायमसिद्धो हेतुः । कायव्यतिरिक्तदेशे तद्गुणानां बुद्ध्या-

दीनां वादिना प्रतिवादिना वानभ्युपगमात् । तथा च भट्टः श्रीधरः । सर्वगतत्वेप्यात्मनो देहप्रदेशे ज्ञातृत्वं नान्यत्र शरीरस्योपभोगायतनत्वात् अन्यथा तस्य वैयर्थ्यात् इति । अथास्त्यदृष्टमात्मनो विशेषगुणः । तच्च सर्वोत्पत्तिमतां निमित्तं सर्वव्यापकं च । कथमितरथा द्वीपान्तरादिष्वपि प्रतिनियतदेशवर्त्तिपुरुषोपभोग्यानि कनकरत्नचन्दनाङ्गनादीनि तेनोत्पाद्यन्ते । गुणश्च गुणिनं विहाय न वर्तते । अतोनुमीयते सर्वगत आत्मेति । नैवम् । अदृष्टस्य सर्वगतत्वसाधने प्रमाणाभावात् । अथास्त्येव प्रमाणं वह्नेरूर्द्ध्वज्वलनं वायोस्तिर्यग्गमनं चादृष्टकारितमिति चेन्न । तयोस्तत्स्वभावत्वादेव तत्सिद्धेर्दहनस्य दहनशक्तिवत् । साप्यदृष्टकारिता चेत् तर्हि जगत्त्रयवैचित्रीसूत्रणेपि तदेव सूत्रधारायतां किमीश्वरकल्पनया । तन्नायमसिद्धो हेतुः ॥ नचानैकान्तिकः । साध्यसाधनयोर्व्याप्तिग्रहणेन व्यभिचाराभावात् ॥ नापि विरुद्धः । अत्यन्तं विपक्षव्यावृत्तत्वात् । आत्मगुणाश्च बुद्ध्यादयः शरीर एवोपलभ्यन्ते ततो गुणिनापि तत्रैव भाव्यम् ॥ इति सिद्धः कायप्रमाण आत्मा ॥ अन्यच्च । त्वया आत्मनां बहुत्वमिष्यते । नानात्मानो व्यवस्थात इति वचनात् । ते च व्यापकाः । ततस्तेषां प्रदीपप्रभामण्डलानामिव परस्परानुवेधे तदाश्रितशुभाशुभकर्मणामपि परस्परं संकरः स्यात् । तथाचैकस्य शुभकर्मणा अन्यः सुखी भवेदितरस्याशुभकर्मणा अन्यो दुःखीत्यसमञ्जसमापद्येत । अन्यच्च एकस्यैवात्मनः स्वोपात्तशुभकर्मविपाकेन सुखित्वं परोपार्जिताशुभकर्मविपाकसंबन्धेन च दुःखित्वमिति युगपत्सुखदुःखसंवेदनप्रसङ्गः । अथ स्वावष्टब्धभोगायतनमाश्रित्यैव शुभाशुभयोर्भोगः तर्हि स्वोपार्जितमप्यदृष्टं कथं भोगायतनाद्बहिर्निष्क्रम्य वह्नेरूर्द्ध्वज्वल-

नादिकं करोतीति चिन्त्यमेतत् ॥ आत्मनां च सर्वगतत्वे एकैकस्य सृष्टिकर्तृत्वप्रसङ्गः । सर्वगतत्वेनेश्वरान्तरानुप्रवेशस्य संभावनीयत्वात् । ईश्वरस्य वा तदन्तरनुप्रवेशे तस्याप्यकर्तृत्वापत्तिः । न हि क्षीरनीरयोरन्योन्यसंबन्धे एकतरस्य पानादिक्रिया अन्यतरस्य न भवतीति युक्तं वक्तुम् ॥ किंच आत्मनः सर्वगतत्वे नरनारकादिपर्यायाणां युगपदनुभवानुषङ्गः । अथ भोगायतनाभ्युपगमान्नायं दोष इति चेत् ननु स भोगायतनं सर्वात्मनावष्टभ्नीयादेकदेशेन वा । सर्वात्मना चेदस्मदभिमताङ्गीकारः । एकदेशेन चेत् सावयवत्वप्रसङ्गः । परिपूर्णभोगाभावश्च ॥ अथात्मनो व्यापकत्वाभावे दिग्देशान्तरवर्तिपरमाणुभिर्युगपत्संयोगाभावादाद्यकर्माभावः तदभावादन्त्यसंयोगस्य तन्निर्मितशरीरस्य तेन तत्संबन्धस्य चाभावादनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यात् । नैवम् । यद्येन संयुक्तं तदेव तं प्रत्युपसर्पतीति नियमासंभवात् । अयस्कान्तं प्रत्ययसस्तेनासंयुक्तस्याप्याकर्षणोपलब्धेः । अथासंयुक्तस्याप्याकर्षणे तच्छरीरारम्भं प्रत्येकमुखीभूतानां त्रिभुवनोदरविवरवर्तिपरमाणूनामुपसर्पणप्रसङ्गान्न जाने तच्छरीरं कियत्प्रमाणं स्यादिति चेत् संयुक्तस्याप्याकर्षणे कथं स एव दोषो न भवेत् । आत्मनो व्यापकत्वेन सकलपरमाणूनां तेन संयोगात् । अथ तद्भावाविशेषेऽप्यदृष्टवशाद्विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति । तदितरत्रापि तुल्यम् ॥ अथास्तु यथाकथंचिच्छरीरोत्पत्तिः तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन्नात्मा सावयवः स्यात् । तथा चास्य पटादिवत् कार्यत्वप्रसङ्गः । कार्यत्वे चासौ विजातीयैः सजातीयैर्वा कारणैरारभ्येत । न तावद्विजातीयैः । तेषामनारम्भकत्वात् । न हि तन्तवो घटमारभन्ते । न च सजातीयैः । यत आत्मत्वाभिसंब-

न्धादेवैतेषां कारणानां सजातीयत्वम् । पार्थिवादिपरमाणूनां विजातीयत्वात्। तथा चात्मभिरात्मा आरभ्यत इत्यायातम् । तच्चायुक्तम्।एकत्र शरीरेऽनेकात्मनामात्मारम्भकाणामसंभवात् । संभवे वा प्रतिसन्धानानुपपत्तिः । नह्यन्येन दृष्टमन्यः प्रतिसन्धातुमर्हति । अतिप्रसङ्गात् । तदारभ्यत्वे चास्य घटवदवयवक्रियातो विभागात्संयोगविनाशाद्विनाशः स्यात् । तस्माद्व्यापक एवात्मा युज्यते । कायप्रमाणतायामुक्तदोषसद्भावात् । इति चेन्न । सावयवत्वकार्यत्वयोः कथंचिदात्मन्यभ्युपगमात् । तत्र सावयवत्वं तावदसंख्येयप्रदेशात्मकत्वम् । तथा च द्रव्यालङ्कारकारौ । आकाशोपि सदेशः सकृत्सर्वमूर्ताभिसंबन्धार्हत्वात् इति । यद्यप्यवयवप्रदेशयोर्गन्धहस्त्यादिषु भेदोस्ति तथापि नात्र सूक्ष्मेक्षिका चिन्त्या । प्रदेशेष्वप्यवयवव्यवहारात् । कार्यत्वं तु वक्ष्यामः ॥ नन्वात्मनां कार्यत्वे घटादिवत् प्राक्प्रसिद्धसमानजातीयावयवारभ्यत्वप्रसक्तिः । अवयवा ह्यवयविनमारभन्ते यथा तन्तवः पटमिति चेन्न वाच्यम् । न खलु घटादावपि कार्ये प्राक्प्रसिद्धसमानजातीयकपालसंयोगात्मत्वं दृष्टम् । कुम्भकारादिव्यापारान्वितान्मृत्पिण्डात्प्रथममेव पृथुबुध्नोदराद्याकारस्यास्योत्पत्तिप्रतीतेः । द्रव्यस्य हि पूर्वाकारपरित्यागेन उत्तराकारपरिणामः कार्यत्वम् । तच्च बहिरिवान्तरप्यनुभूयत एव । ततश्चात्मापि स्यात्कार्यः । न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात् सर्वत्र तथाभावो युक्तः । काष्ठे लोहलेख्यत्वोपलम्भाद्वज्रेपि तथाभावप्रसङ्गात् । प्रमाणबाधनमुभयत्र तुल्यम् । न चोक्तलक्षणकार्यत्वाभ्युपगमेप्यात्मनोऽनित्यत्वानुषङ्गात्प्रतिसन्धानाभावोऽनुषज्यते । कथंचिदनित्यत्वे सत्येवास्योपपद्यमानत्वात् । प्रतिसन्धानं हि यमहमद्राक्षं तमहं स्मरामीत्यादिरूपम् । तच्चैकान्तनित्यत्वे कथमुपपद्यते । अवस्थाभेदात् । अन्या ह्यनुभवावस्था अन्या च

स्मरणावस्था। अवस्थाभेदे चावस्थावतोपि भेदादेकरूपत्वक्षतेः कथंचिदनित्यत्वं युक्त्यायातं केन वार्यताम्॥ अथात्मनः शरीरपरिमाणत्वे मूर्तत्वानुषङ्गात् शरीरेनुप्रवेशो न स्यात्। मूर्ते मूर्तस्यानुप्रवेशविरोधात्। ततो निरात्मकमेवाखिलं शरीरं प्राप्नोतीति चेत् किमिदं मूर्तत्वं नाम। असर्वगतद्रव्यपरिमाणत्वं रूपादिमत्त्वं वा। तत्र नाद्यः पक्षो दोषाय। संमतत्वात्। द्वितीयस्त्वयुक्तः। व्याप्त्यभावात्। नहि यदसर्वगतं तन्नियमेन रूपादिमदित्यविनाभावोस्ति। मनसोऽसर्वगतत्वेपि भवन्मते तदसंभवात्। आकाशकालदिगात्मनां सर्वगतत्वं सर्वसंयोगिसमानदेशत्वं वेत्युक्तत्वान्मनसो वैधर्म्यात्सर्वगतत्वप्रतिषेधनात्। अतो नात्मनः शरीरेऽनुप्रवेशानुपपत्तिर्येन निरात्मकं तत् स्यात्। असर्वगतद्रव्यपरिमाणलक्षणमूर्तत्वस्य मनोवत्प्रवेशाप्रतिबन्धकत्वात्। रूपादिमत्त्वलक्षणमूर्तत्वोपेतस्यापि जलादेर्वालुकादावनुप्रवेशो न निषिध्यते आत्मनस्तु तद्रहितस्यापि तत्रासौ प्रतिषिध्यत इति महच्चित्रम्॥ अथात्मनः कायप्रमाणत्वे बालशरीरपरिमाणस्य सतो युवशरीरपरिमाणस्वीकारः कथं स्यात्। किं तत्परिमाणपरित्यागात् तदपरित्यागाद्वा। परित्यागाच्चेत् तदा शरीरवत्तस्यानित्यत्वप्रसङ्गात्परलोकाद्यभावानुषङ्गः। अथापरित्यागात् तन्न। पूर्वपरिमाणापरित्यागे शरीरवत्तस्योत्तरपरिमाणोत्पत्त्यनुपपत्तेः। तदयुक्तम्। युवशरीरपरिमाणावस्थायामात्मनो बालशरीरपरिमाणपरित्यागे सर्वथा विनाशासंभवात्। विफणावस्थोत्पादे सर्पवत्। इति कथं परलोकाभावोनुषज्यते। पर्यायतस्तस्यानित्यत्वेपि द्रव्यतो नित्यत्वात्॥ अथात्मनः कायप्रमाणत्वे तत्खण्डने खण्डनप्रसङ्ग इति चेत् कः किमाह शरीरस्य खण्डने कथंचित्तत्खण्डनस्येष्टत्वात्। शरीरसंबद्धात्मप्रदेशेभ्यो हि कतिपयात्मप्रदेशानां खण्डितशरीरप्रदेशेवस्थानादात्मनः

खण्डनम् । तच्चात्र विद्यत एव । अन्यथा शरीरात्पृथग्भूतावयवस्य कम्पोपलब्धिर्न स्यात् । न च खण्डितावयवानुप्रविष्टस्यात्मप्रदेशस्य पृथगात्मत्वप्रसङ्गः । तत्रैवानुप्रवेशात् । न चैकत्र संतानेऽनेके आत्मानः। अनेकार्थप्रतिभासिज्ञानानामेकप्रमात्राधारतया प्रतिभासाभावप्रसङ्गात् । शरीरान्तरव्यवस्थितानेकज्ञानावसेयार्थसंवित्तिवत् । कथं खण्डितावयवयोः संघट्टनं पश्चादिति चेत् एकान्तेन छेदानभ्युपगमात् । पद्मनालतन्तुवच्छेदस्यापि स्वीकारात् । तथाभूतादृष्टवशात्तत्संघट्टनमविरुद्धमेवेति तनुपरिमाण एवात्माङ्गीकर्तव्यो न व्यापकः। तथा चात्मा व्यापको न भवति । चेतनत्वात् । यत्तु व्यापकं न तच्चेतनं यथा व्योम। चेतनश्चात्मा। तस्मान्न व्यापकः। अव्यापकत्वे चास्य तत्रैवोपलभ्यमानगुणत्वेन सिद्धा कायप्रमाणता । यत्पुनरष्टसमयसाध्यकेवलिसमुद्घातदशायामार्हतानामपि चतुर्दशरज्ज्वात्मकलोकव्यापित्वेनात्मनः सर्वव्यापकत्वं तत्कादाचित्कमिति न तेन व्यभिचारः । स्याद्वादमन्त्रकवचावगुण्ठितानां च नेदृशविभीषिकाभ्यो भयमिति काव्यार्थः ॥ ९ ॥

वैशेषिकनैयायिकयोः प्रायः समानतन्त्रत्वादौलूक्यमते क्षिप्ते यौगमतमपि क्षिप्तमेवावसेयम् । पदार्थेषु च तयोरपि न तुल्या प्रतिपत्तिरिति सांप्रतमक्षपादप्रतिपादितपदार्थानां सर्वेषां चतुर्थपुरुषार्थं प्रत्यसाधकतमत्वे वाच्येपि तदन्तःपातिनां छलजातिनिग्रहस्थानानां परोपन्यासनिरासमात्रफलतया अत्यन्तमनुपादेयत्वात् तदुपदेशदातुर्वैराग्यमुपहसन्नाह ।

स्वयंविवादग्रहिले वितण्डा-
पाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।

मायोपदेशात्परमर्म भिन्द-
न्नहो विरक्तो मुनिरन्यदीयः ॥ १० ॥

अन्ये अविज्ञाततत्वदाज्ञासारतयाऽनुपादेयनामानः परे। तेषामयं शास्तृत्वेन संबन्धी अन्यदीयः। मुनिः अक्षपादऋषिः। अहो विरक्तः अहो वैराग्यवान्। अहो इत्युपहासगर्भमाश्चर्यं सूचयति। अन्यदीय इत्यत्र ईयकारके इति दोन्तः। किं कुर्वन्नित्याह परमर्म भिन्दन्। जातावेकवचनप्रयोगात् परमर्माणि व्यथयन्। बहुभिरात्मप्रदेशैरधिष्ठिता देहावयवा मर्माणीति पारिभाषिकी संज्ञा। तत उपचारात्साध्यस्वतत्त्वसाधनाव्यभिचारितया प्राणभूतः साधनोपन्यासोपि मर्मेव मर्म। कस्मात्तद्भिन्दन्। मायोपदेशाद्धेतोः। मायापरवञ्चनम्। तस्या उपदेशश्छलजातिनिग्रहस्थानलक्षणपदार्थचयप्ररूपणद्वारेण शिष्येभ्यः प्रतिपादनं तस्मात्। गुणादस्त्रियां न वा इत्यनेन हेतौ तृतीयाप्रसङ्गे पञ्चमी। कस्मिन्विषये मायामयमुपदिष्टवान् इत्याह। अस्मिन् प्रत्यक्षोपलक्ष्यमाणे जने तत्त्वविमर्शबहिर्मुखतया प्राकृतप्राये लोके। कथंभूते। स्वयमात्मना परोपदेशनिरपेक्षमेव। विवादग्रहिले। विरुद्धः परस्परकक्षीकृतपक्षाधिक्षेपदक्षो वादो वचनोपन्यासो विवादः। तथा च भगवान् हरिभद्रसूरिः।

लब्धिख्यात्यर्थिना तु स्याद् दुःस्थितेनामहात्मना।
छलजातिप्रधानो यः स विवाद इति स्मृतः॥

तेन ग्रहिल इव ग्रहगृहीत इव विवादग्रहिलः। तत्र यथा ग्रहाद्यपस्मारपरवशः पुरुषो यत्किंचनप्रलापी स्यादेवमयमपि जन इति भावः। तथा वितण्डा प्रतिपक्षस्थापनाहीनं वाक्यम्। वितण्ड्यते आहन्यतेऽनया प्रतिपक्षसाधनमिति व्युत्पत्तेः। अभ्युपेत्य

पक्षं यो न स्थापयति स वैतण्डिक इत्युच्यते इति न्यायवार्त्तिकम्। वस्तुतस्तु अपरामृष्टतत्त्वातत्त्वविचारं मौखर्यं वितण्डा। तत्र यत्पाण्डित्यमविकलं कौशलं तेन कण्डूलमिव कण्डूलं मुखं लपनं यस्य स तथा तस्मिन्। कण्डूः खर्जूः। कण्डूरस्यास्तीति कण्डूलः। सिध्मादित्वान्मत्वर्थीयो लप्रत्ययः। यथा किलान्तरुत्पन्नकृमिकुलजनितां कण्डूतिं निरोद्धुमपारयन्पुरुषो व्याकुलतां कलयति एवं तन्मुखमपि वितण्डापाण्डित्येनासंबद्धप्रलापचापलमाकलयत्कण्डूलमित्युपचर्यते। एवं च स्वरसत एव स्वस्वाभिमतव्यवस्थापनाविसंष्ठुलो वैतण्डिकलोकः। तत्र च तत्परमाप्तभूतपुरुषविशेषपरिकल्पितपरवञ्चनप्रचुरवचनोपदेशश्चेत्सहायः समजनि तदा स्वत एव ज्वालाकलापजटिले प्रज्वलति हुताशन इव कृतो घृताहुतिप्रक्षेप इति। तैश्च भवाभिनन्दिभिर्वादिभिरेतादृशोपदेशदानमपि तस्य मुनेः कारुणिकत्वकोटावारोपितम्। तथा चाहुः।

दुःशिक्षितकुतर्कांशलेशवाचालिताननाः।
शक्याः किमन्यथा जेतुं वितण्डाटोपमण्डिताः॥
गतानुगतिको लोकः कुमार्गं तत्प्रतारितः।
मा गादिति छलादीनि प्राह कारुणिको मुनिः॥

कारुणिकत्वं च वैराग्यान्न भिद्यते। ततो युक्तमुक्तम् अहो विरक्त इति स्तुतिकारेणोपहासवचनम्॥ अथ मायोपदेशादितिसूचनासूत्रं वितन्यते। अक्षपादमते किल षोडश पदार्थाः। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति वचनात्। न चैतेषां व्यस्तानां समस्तानां वा

अधिगमो निःश्रेयसावाप्तिहेतुः। न ह्येकेनैव क्रियाविरहितेन ज्ञानमात्रेण मुक्तिर्युक्तिमती। असमग्रसामग्रीकत्वात्। विघटितैकचक्ररथेन मनीषितनगरप्राप्तिवत्। न च वाच्यं न खलु वयं क्रियां प्रतिक्षिपामः किंतु तत्त्वज्ञानपूर्विकाया एव तस्या मुक्तिहेतुत्वमिति ज्ञापनार्थं तत्त्वज्ञानान्निःश्रेयसाधिगम इति ब्रूम इति। न ह्यमीषां संहते अपि ज्ञानक्रिये मुक्तिप्राप्तिहेतुभूते। वितथत्वात्तज्ज्ञानक्रिययोः। न च वितथत्वमसिद्धम्। विचार्यमाणानां षोडशानामपि तत्त्वाभासत्वात्। तथा हि। तैः प्रमाणस्य तावल्लक्षणमित्थं सूत्रितम् अर्थोपलब्धिहेतुः प्रमाणमिति। एतच्च न विचारसहम्। यतोऽर्थोपलब्धौ हेतुत्वं यदि निमित्तत्वमात्रं तत्सर्वकारकसाधारणमिति कर्तृकर्मादेरपि प्रमाणत्वप्रसङ्गः। अथ कर्तृकर्मादिविलक्षणं हेतुशब्देन करणमेव विवक्षितं तर्हि तज्ज्ञानमेव युक्तं न चेन्द्रियसन्निकर्षादि। यस्मिन् हि सत्यर्थ उपलब्धो भवति स तत्करणम्। न चेन्द्रियसन्निकर्षसामग्र्यादौ सत्यपि ज्ञानाभावेऽर्थोपलम्भः। साधकतमं हि करणम्। अव्यवहितफलं तदिष्यते। व्यवहितफलस्यापि करणत्वे दुग्धभोजनादेरपि तथाप्रसङ्गः। तन्न ज्ञानादन्यत्र प्रमाणत्वम्। अन्यत्रोपचारात्। यदपि न्यायभूषणसूत्रकारेणोक्तं सम्यगनुभवसाधनं प्रमाणमिति तत्रापि साधनग्रहणात्कर्तृकर्मनिरासेन करणस्यैव प्रमाणत्वं सिध्यति। तथाप्यव्यवहितफलत्वेन साधकतमत्वं ज्ञानस्यैवेति न तत्सम्यग्लक्षणम्। स्वपरव्यवसायि ज्ञानं प्रमाणम् इति तु तात्त्विकं लक्षणम्॥

प्रमेयमपि तैरात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदाद् द्वादशविधमुक्तम्। तच्च न सम्यक्॥ यतः शरीरेन्द्रियबुद्धिमनःप्रवृत्तिदोषफलदुःखानामात्मन्येवान्तर्भावो युक्तः। संसारिण आत्मनः कथंचित्तदविष्वग्भूतत्वात्। आत्मा च

प्रमेय एव न भवति। तस्य प्रमातृत्वात् ॥ इन्द्रियबुद्धिमनसां तु करणत्वात्प्रमेयत्वाभावः ॥ दोषास्तु रागद्वेषमोहास्ते च प्रवृत्तेर्न पृथग्भवितुमर्हन्ति । वाङ्मनःकायव्यापारस्य शुभाशुभफलस्य विंशतिविधस्य तन्मते प्रवृत्तिशब्दवाच्यत्वात् । रागादिदोषाणां च मनोव्यापारात्मकत्वात् ॥ दुःखस्य शब्दादीनामिन्द्रियार्थानां च फल एवान्तर्भावः । प्रवृत्तिदोषजनितं सुखदुःखात्मकं मुख्यं फलं तत्साधनं तु गौणम् इति जयन्तवचनात् ॥ प्रेत्यभावापवर्गयोः पुनरात्मन एव परिणामान्तरापत्तिरूपत्वान्न पार्थक्यमात्मनः सकाशादुचितम् ॥ तदेवं द्वादशविधं प्रमेयमिति वाग्विस्तरमात्रम् । द्रव्यपर्यायात्मकं वस्तु प्रमेयम् इति तु समीचीनं लक्षणम् । सर्वसंग्राहकत्वात् ॥

एवं संशयादीनामपि तत्त्वाभासत्वं प्रेक्षावद्भिरनुप्रेक्षणीयम् । अत्र तु प्रतीतत्वाद् ग्रन्थगौरवभयाच्च न प्रपञ्चितम् । न्यक्षेण ह्यत्र न्यायशास्त्रमवतारणीयं तच्चावतार्यमाणं ग्रन्थान्तरतामवगाहत इत्यास्ताम् ॥

तदेवं प्रमाणादिषोडशपदार्थानामविशिष्टेपि तत्त्वाभासत्वे प्रकटकपटनाटकसूत्रधाराणां त्रयाणामेव छलजातिनिग्रहस्थानानां मायोपदेशादितिपदेनोपक्षेपः कृतः ॥ तत्र परस्य वदतोऽर्थविकल्पोपपादनेन वचनविघातश्छलम् । तत्त्रिधा । वाक्छलं सामान्यच्छलमुपचारच्छलं चेति । तत्र साधारणे शब्दे प्रयुक्ते वक्तुरभिप्रेतादर्थादर्थान्तरकल्पनया तन्निषेधो वाक्छलम् । यथा नवकम्बलोऽयं माणवक इति नूतनविवक्षया कथिते परः संख्यामारोप्य निषेधाति कुतोस्य नव कम्बला इति । संभावनयातिप्रसङ्गिनोपि सामान्यस्योपन्यासे हेतुत्वारोपणेन तन्निषेधः सामान्यच्छलम् । यथा अहो नु खल्वसौ ब्राह्मणो विद्याचरणसंपन्न इति ब्राह्मणस्तुतिप्रसङ्गे कश्चिद्वदति संभवति ब्राह्मणे विद्याचरणसंपदिति

तच्छलवादी ब्राह्मणत्वस्य हेतुतामारोप्य निराकुर्वन्नभियुङ्क्ते यदि ब्राह्मणे विद्याचरणसंपद् भवति व्रात्येपि सा भवेद्व्रात्योपि ब्राह्मण एवेति । औपचारिके प्रयोगे मुख्यप्रतिषेधेन प्रत्यवस्थानमुपचारच्छलम् । यथा मञ्चाः क्रोशन्तीत्युक्ते परः प्रत्यवतिष्ठते कथमचेतनाः मञ्चाः क्रोशन्ति मञ्चस्थाः पुरुषाः क्रोशन्तीति ॥ तथा सम्यग्हेतौ हेत्वाभासे वा वादिना प्रयुक्ते झटिति तद्दोषतत्त्वाप्रतिभासे हेतुप्रतिबिम्बनप्रायं किमपि प्रत्यवस्थानं जातिर्दूषणाभास इत्यर्थः । सा च चतुर्विंशतिभेदा । साधर्म्यादिप्रत्यवस्थानभेदेन । यथा साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः । तत्र साधर्म्येण प्रत्यवस्थानं साधर्म्यसमा जातिर्भवति । अनित्यः शब्दः कृतकत्वाद् घटवदिति प्रयोगे कृते साधर्म्यप्रयोगेणैव प्रत्यवस्थानं नित्यः शब्दो निरवयवत्वादाकाशवत् । न चास्ति विशेषहेतुर्घटसाधर्म्यात्कृतकत्वादनित्यः शब्दो न पुनराकाशसाधर्म्यान्निरवयवत्वान्नित्य इति । वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमा जातिर्भवति । अनित्यः शब्दः कृतकत्वाद् घटवदित्यत्रैव प्रयोगे स एव प्रतिहेतुर्वैधर्म्येण प्रयुज्यते नित्यः शब्दो निरवयवत्वात् अनित्यं हि सावयवं दृष्टं घटादीति । न चास्ति विशेषहेतुर्घटसाधर्म्यात् कृतकत्वादनित्यः शब्दो न पुनस्तद्वैधर्म्यान्निरवयवत्वान्नित्य इति । उत्कर्षापकर्षाभ्यां प्रत्यवस्थानमुत्कर्षापकर्षसमे जाती भवतः । तत्रैव प्रयोगे दृष्टान्तधर्मं कंचित्साध्यधर्मिण्यापादयन्नुत्कर्षसमां जातिं प्रयुङ्क्ते । यदि घटवत् कृतकत्वादनित्यः शब्दो घटवदेव मूर्तो भवतु न चेन्मूर्तो घटवदनित्योपि माभूदिति शब्दे धर्मान्तरोत्कर्षमापादयति ।

अपकर्षस्तु घटः कृतकः सन्नश्रावणो दृष्टः एवं शब्दोप्यस्तु नो चेद् घटवदनित्योपि माभूदिति शब्दे श्रावणत्वधर्ममपकर्षतीति । इत्येताश्चतस्रो दिङ्मात्रदर्शनार्थं जातय उक्ताः । एवं शेषा अपि विंशतिरक्षपादशास्त्रादवज्ञेयाः । अत्र तु अनुपयोगित्वान्न लिखिताः॥ तथा विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । तत्र विप्रतिपत्तिः साधनाभासे साधनबुद्धिर्दूषणाभासे च दूषणबुद्धिरिति । अप्रतिपत्तिः साधनस्यादूषणं दूषणस्य चानुद्धरणम् । तच्च निग्रहस्थानं द्वाविंशतिविधम् । तद्यथा । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरम् अर्थान्तरम् निरर्थकम् अविज्ञातार्थम् अपार्थकम् अप्राप्तकालम् न्यूनम् अधिकम् पुनरुक्तम् अननुभाषणम् अज्ञानम् अप्रतिभा विक्षेपः मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धान्तः हेत्वाभासाश्च । तत्र हेतावनैकान्तिकीकृते प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेभ्युपगच्छतः प्रतिज्ञाहानिर्नाम निग्रहस्थानम् । यथा अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदिति प्रतिज्ञासाधनाय वादी वदन् परेण सामान्यमैन्द्रियकमपि नित्यं दृष्टमिति हेतावनैकान्तिकीकृते यद्येवं ब्रूयात् सामान्यवद्घटोपि नित्यो भवत्विति स एवं ब्रुवाणः शब्दानित्यत्वप्रतिज्ञां जह्यात् । प्रतिज्ञातार्थप्रतिषेधे परेण कृते तत्रैव धर्मिणि धर्मान्तरं साधनीयमभिदधतः प्रतिज्ञान्तरं नाम निग्रहस्थानं भवति । अनित्यः शब्द ऐन्द्रियकत्वादित्युक्ते तथैव सामान्येन व्यभिचारे चोदिते यदि ब्रूयात् युक्तं सामान्यमैन्द्रियकं नित्यं तद्धि सर्वगतम् असर्वगतस्तु शब्दः इति तदिदं शब्देऽनित्यत्वलक्षणपूर्वप्रतिज्ञातः प्रतिज्ञान्तरमसर्वगतः शब्द इति निग्रहस्थानम् । अनया दिशा शेषाण्यपि विंशतिर्ज्ञेयानि । इह तु न लिखितानि । पूर्वहेतोरेव ॥ इत्येवं मायाशब्देनात्र छलादित्रयं सूचितम् । तदेवं परवञ्चनात्मकान्यपि

छलजातिनिग्रहस्थानानि तत्त्वरूपतयोपदिशतोऽक्षपादर्षेर्वैराग्यव्यावर्णनं तमसः प्रकाशात्मकत्वप्रख्यापनमिव कथमिव नोपहसनीयमिति काव्यार्थः ॥ १० ॥

अधुना मीमांसकभेदाभिमतं वेदविहितहिंसाया धर्महेतुत्वमुपपत्तिपुरस्सरं निरस्यन्नाह ।

न धर्महेतुर्विहितापि हिंसा
नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सा-
सब्रह्मचारि स्फुरितं परेषाम् ॥ ११ ॥

इह खल्वर्चिर्मार्गप्रतिपक्षधूममार्गाश्रिता जैमिनीया इत्थमाचक्षते । या हिंसा गार्ध्याद् व्यसनितया वा क्रियते सैवाधर्मानुबन्धहेतुः प्रमादसंपादितत्वात् शौनिकलुब्धकादीनामिव । वेदविहिता तु हिंसा प्रत्युत धर्महेतुः देवतातिथिपितॄणां प्रीतिसंपादकत्वात् तथाविधपूजोपचारवत् । न च तत्प्रीतिसंपादकत्वमसिद्धम् । कारीरीप्रभृतियज्ञानां स्वसाध्ये वृष्ट्यादिफले यः खल्वव्यभिचारः स तत्प्रीणितदेवताविशेषानुग्रहहेतुकः । एवं त्रिपुरार्णववर्णितच्छगलजाङ्गलहोमात्परराष्ट्रवशीकृतिरपि तदनुकूलितदैवतप्रसादसंपाद्या । अतिथिप्रीतिस्तु मधुपर्कसंस्कारादिसमास्वादजा प्रत्यक्षोपलक्ष्यैव । पितॄणामपि तत्तदुपयाचितश्राद्धादिविधानेन प्रीणितानां स्वसंतानवृद्धिविधानं साक्षादेव वीक्ष्यते । आगमश्चात्र प्रमाणम् । स च देवप्रीत्यर्थमश्वमेधगोमेधनरमेधादिविधानाभिधायकः प्रतीत एव । अतिथिविषयस्तु महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत् इत्यादिः । पितृप्रीत्यर्थस्तु–

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु ॥

इत्यादिः । एवं पराभिप्रायं हृदि संप्रधार्याचार्यः प्रतिविधत्ते न धर्मेत्यादि ॥ विहितापि वेदप्रतिपादितापि । आस्तां तावदविहिता हिंसा प्राणिप्राणव्यपरोपणरूपा । न धर्महेतुः न धर्मानुबन्धनिबन्धनम् । यतोऽत्र प्रकट एव स्ववचनविरोधः । तथाहि । हिंसा चेद्धर्महेतुः कथम् धर्महेतुश्चेद्धिंसा कथम् । श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यतामित्यादिः । न हि भवति माता च वन्ध्या चेति । हिंसा कारणं धर्मस्तु तत्कार्यमिति पराभिप्रायः । नचायं निरपायः । यतो यद्यस्यान्वयव्यतिरेकावनुविधत्ते तत्तस्य कार्यम् । यथा मृत्पिण्डादेर्घटादिः । न च धर्मो हिंसात एव भवतीति प्रातीतिकम् । तपोविधानदानध्यानादीनां तदकारणत्वप्रसङ्गात् । अथ न वयं सामान्येन हिंसां धर्महेतुं ब्रूमः किं तु विशिष्टामेव विशिष्टा च सैव या वेदविहितेति चेत् ननु तस्या धर्महेतुत्वं किं वध्यजीवानां मरणाभावेन मरणेऽपि तेषामार्त्तध्यानाभावात्सुगतिलाभेन वा । नाद्यः पक्षः । प्राणत्यागस्य तेषां साक्षादवेक्ष्यमाणत्वात् । न द्वितीयः । परचेतोवृत्तीनां दुर्लक्षतयार्त्तध्यानाभावस्य वाङ्मात्रत्वात् । प्रत्युत हा कष्टम् अस्ति न कोपि कारुणिकः शरणमिति स्वभाषया विरसमारसत्सु तेषु वदनदैन्यनयनतरलतादीनां लिङ्गानां दर्शनात् । दुर्ध्यानस्य स्पष्टमेव निष्टङ्क्यमानत्वात् ॥ अथेत्थमाचक्षीथाः यथा अयःपिण्डो गुरुतया मज्जनात्मकोपि तनुतरपत्रादिकरणेन संस्कृतः सन् जलोपरि प्लवते यथा च मारणात्मकमपि विषं मन्त्रादिसंस्कारविशिष्टं सद् गुणाय जायते यथा वा दहनस्वभावोप्यग्निः सत्यादिप्रभावप्रतिहतशक्तिः सन्न हि प्रदहति एवं मन्त्रादिविधिसंस्कारान्न खलु

वेदविहिता हिंसा दोषपोषाय । न च तस्याः कुत्सितत्वं शङ्कनीयं तत्कारिणां याज्ञिकानां लोके पूज्यत्वदर्शनादिति । तदेतन्न दक्षाणां क्षमते क्षोदम् । वैषम्येण दृष्टान्तानामसाधकतमत्वात् । अयःपिण्डादयो हि पत्रादिभावान्तरापन्नाः सन्तः सलिलतरणादिक्रियासमर्थाः । न च वैदिकमन्त्रसंस्कारविधिनापि विशस्यमानानां पशूनां काचिद्वेदनानुत्पादादिरूपा भावान्तरापत्तिः प्रतीयते । अथ तेषां वधानन्तरं देवतापत्तिर्भावान्तरमस्त्येवेति चेत्किमत्र प्रमाणम् । न तावत्प्रत्यक्षम् । तस्य संबद्धवर्तमानार्थग्राहकत्वात् । संबद्धं वर्तमानं च गृह्यते चक्षुरादिना इति वचनात् । नाप्यनुमानम् । तत्प्रतिबद्धलिङ्गानुपलब्धेः । नाप्यागमः । तस्याद्यापि विवादास्पदत्वात् । अर्थापत्त्युपमानयोस्त्वनुमानान्तर्गततया तद्दूषणेनैव गतार्थत्वम् । अथ भवतामपि जिनायतनादिविधाने परिणामविशेषात्पृथिव्यादिजन्तुजातघातनमपि यथा पुण्याय कल्पत इति कल्पना तथास्माकमपि किं नेष्यते । वेदोक्तविधिविधानरूपस्य परिणामविशेषस्य निर्विकल्पं तत्रापि भावात् । नैवम् । परिणामविशेषोपि स एव शुभफलो यत्रानन्योपायत्वेन यतनयापकृष्टप्रतनुचैतन्यानां पृथिव्यादिजीवानां वधेपि स्वल्पपुण्यव्ययेनापरिमितसुकृतसंप्राप्तिः न पुनरितरः । भवत्पक्षे तु सत्स्वपि तत्तच्छ्रुतिस्मृतिपुराणेतिहासप्रतिपादितेषु यमनियमादिषु स्वर्गावाप्त्युपायेषु तांस्तान्देवानुद्दिश्य प्रतिप्रतीकं कर्तनकदर्थनया कान्दिशीकान्कृपणपञ्चेन्द्रियान् शौनिकाधिकं मारयतां कृत्स्नसुकृतव्ययेन दुर्गतिमेवानुकूलयतां दुर्लभः शुभपरिणामविशेषः । एवं च यं कंचन पदार्थं किंचित्साधर्म्यद्वारेणैव दृष्टान्तीकुर्वतां भवतामतिप्रसङ्गः संगच्छते । न च जिनायतनविधापनादौ पृथिव्यादिजीववधेपि न गुणः । तथाहि तद्दर्शनाद्गुणानुरागितया भव्यानां बोधिलाभः पूजा-

तिशयविलोकनादिना च मनःप्रसादः ततः समाधिःततश्च क्रमेण निश्रेयसप्राप्तिरिति । तथा च भगवान्पञ्चलिङ्गीकारः ।

पुढवाइयाण जइवि हु होइ विणासो जिणालयाहिंतो ।
तव्विसया वि सुदिट्ठिस्स णियमओ अत्थि अणुकंपा ॥ १ ॥
एयाहिंतो बुद्धा विरया रक्खंति जेण पुढवाई ।
इत्तो निव्वाणगया अबाहिया आभवमिमाणं ॥२॥
रोगिसिरावेहो इव सुविज्जकिरिया व सुप्पउत्ताओ ।
परिणामसुंदरच्चिय चिट्ठा से बाहजोगे वि ॥ ३ ॥

इति । वैदिकवधविधाने तु न कंचित्पुण्यार्जनानुगुणं गुणं पश्यामः । अथ विप्रेभ्यः पुरोडाशादिप्रदानेन पुण्यानुबन्धी गुणोस्त्येवेति चेत् न । पवित्रसुवर्णादिप्रदानमात्रेणैव पुण्योपार्जनसंभवात् । कृपणपशुगणव्यपरोपणसमुत्थमांसदानं केवलं निर्घृणत्वमेव व्यनक्ति । अथ न प्रदानमात्रं पशुवधक्रियायाः फलं किं तु भूत्यादिकम् । यदाह श्रुतिः श्वेतं वायव्यमजमालभेत भूतिकामः इत्यादि । एतदपि व्यभिचारपिशाचग्रस्तत्वादप्रमाणमेव । भूतेश्चौपयिकान्तरैरपि साध्यत्वात् । अथ तत्र सत्रे हन्यमानानां छागादीनां प्रेत्यसङ्गतिप्राप्तिरूपोस्त्येवोपकार इति चेत् वाङ्मात्रमेतत् । प्रमाणाभावात् । न हि ते निहताः पशवः संगतिलाभमुदितमनसः कस्मैचिदागत्य तथाभूतमात्मानं कथयन्ति । अथास्त्यागमाख्यं प्रमाणम् । यथा

औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितं पुनः ॥

इत्यादि । नैवम् । तस्य पौरुषेयापौरुषेयविकल्पाभ्यां निराकरिष्यमाणत्वात् । न च श्रौतेन विधिना पशुविशसनविधायिना स्वर्गावाप्तिरुपकार इति वाच्यम् । यदि हि हिंसयापि स्वर्गप्राप्तिः

स्यात्तर्हि बाढं पिहिता नरकपुरप्रतोल्यः । शौनिकादीनामपि स्वर्गप्राप्तिप्रसङ्गात् । तथा च पठन्ति पारमर्षाः ।

यूपं छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते ॥

किंच अपरिचितास्पष्टचैतन्यानुपकारिपशुहिंसनेनापि त्रिदिवपदवीप्राप्तिस्तदा परिचितस्पष्टचैतन्यपरमोपकारिमातापित्रादिव्यापादनेन यज्ञकारिणामधिकतरपदप्राप्तिः प्रसज्यते । अथ अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः इति वचनाद्वैदिकमन्त्राणामचिन्त्यप्रभावत्वात् तत्संस्कृतपशुवधे संभवत्येव स्वर्गप्राप्तिरिति चेत् न । इह लोके विवाहगर्भाधानजातकर्मादिषु तन्मन्त्राणां व्यभिचारोपलम्भाददृष्टे स्वर्गादावपि तद्व्यभिचारोनुमीयते । दृश्यन्ते हि वेदोक्तमन्त्रसंस्कारविशिष्टेभ्योपि विवाहादिभ्योनन्तरं वैधव्याल्पायुष्कतादारिद्र्याद्युपद्रवविधुराः परःशताः । अपरे च मन्त्रसंस्कारं विना कृतेभ्योपि तेभ्योनन्तरं तद्विपरीताः । अथ तत्र क्रियावैगुण्यं विसंवादहेतुरिति चेत् न । संशयानिवृत्तेः । किं तत्र क्रियावैगुण्यात् फले विसंवादः किं वा मन्त्राणामसामर्थ्यादिति न निश्चयः । तेषां फलेनाविनाभावासिद्धेः । अथ यथा युष्मन्मते आरोग्गबोहिलाभं समाहिवरमुत्तमं दिंतु इत्यादीनां वाक्यानां लोकान्तर एव फलमिष्यते एवमस्मदभिमतवेदवाक्यानामपि नेह जन्मनि फलमिति किं न प्रतिपद्यते । ततश्च विवाहादौ नोपलम्भावकाश इति चेत् अहो वचनवैचित्री । यथा वर्तमानजन्मनि विवाहादिषु प्रयुक्तैर्मन्त्रसंस्कारैरागामिनि जन्मनि तत्फलमेवं द्वितीयादिजन्मान्तरेष्वपि विवाहादीनामेव प्रवृत्तिधर्माणां पुण्यहेतुत्वाङ्गीकारेनन्तभवानुसन्धानं प्रसज्यते । एवं च न कदाचन संसारस्य परिसमाप्तिः । तथा च न कस्यचिदपवर्गप्राप्तिः इति प्राप्तं भवदभिमतवेदस्यापर्यव-

सितसंसारवल्लरीमूलकन्दत्वम् । आरोग्यादिप्रार्थना तु असत्यामृषाभाषापरिणामविशुद्धिकारणत्वान्न दोषाय । तत्र हि भावारोग्यादिकमेव विवक्षितम् । तच्च चातुर्गतिकसंसारलक्षणभावरोगपरिक्षयस्वरूपत्वादुत्तमफलम् । तद्विषया च प्रार्थना कथमिव विवेकिनामनादरणीया । न च तज्जन्यपरिणामविशुद्धेस्तत्फलं न प्राप्यते । सर्ववादिनां भावशुद्धेरपवर्गफलसंपादनेऽविप्रतिपत्तेरिति । न च वेदनिवेदिता हिंसा न कुत्सिता । सम्यग्दर्शनज्ञानसंपन्नैरर्चिर्मार्गप्रपन्नैर्वेदान्तवादिभिश्च गर्हितत्वात् । तथा च तत्त्वदर्शिनः पठन्ति ।

देवोपहारव्याजेन यज्ञव्याजेन येथवा ।
घ्नन्ति जन्तून् गतघृणा घोरं ते यान्ति दुर्गतिम् ॥

वेदान्तिका अप्याहुः ।

अन्धे तमसि मज्जामः पशुभिर्ये यजामहे ।
हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति ॥

तथा अग्निर्मामेतस्माद्धिंसाकृतादेनसो मुञ्चतु । छान्दसत्वान्मोचयतु इत्यर्थः । इति । व्यासेनाप्युक्तम् ।

ज्ञानपालिपरिक्षिप्ते ब्रह्मचर्यदयाम्भसि ।
स्नात्वातिविमले तीर्थे पापपङ्कापहारिणि ॥ १ ॥
ध्यानाग्नौ जीवकुण्डस्थे दममारुतदीपिते ।
असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तमम् ॥२॥
कषायपशुभिर्दुष्टैर्धर्मकामार्थनाशकैः ।
शममन्त्रहुतैर्यज्ञं विधेहि विहितं बुधैः ॥३॥
प्राणिघातात्तु यो धर्ममीहते मूढमानसः ।
स वाञ्छति सुधावृष्टिं कृष्णाहिमुखकोटरात् ॥४॥

इत्यादि ॥ यच्च याज्ञिकानां लोकपूज्यत्वोपलम्भादित्युक्तं तदप्यसारम् । अबुधा एव हि पूजयन्ति तान् न तु विविक्तबुद्धयः । अबुधपूज्यता तु न प्रमाणम् । तस्याः सारमेयादिष्वप्युपलम्भात् ॥ यदप्यभिहितं देवतातिथिपितृप्रीतिसंपादकत्वाद्वेदविहिता हिंसा न दोषायेति तदपि वितथम् । यतो देवानां संकल्पमात्रोपनताभिमताहारपुद्गलरसास्वादसुहितानां वैक्रियशरीरत्वाद् युष्मदावर्जितजुगुप्सितपशुमांसाद्याहुतिगृहीताविच्छैव दुःसंभवा । औदारिकशरीरिणामेव तदुपादानयोग्यत्वात् । प्रक्षेपाहारस्वीकारे च देवानां मन्त्रमयदेहत्वाभ्युपगमबाधः । न च तेषां मन्त्रमयदेहत्वं भवत्पक्षे न सिद्धम् । चतुर्थ्यन्तपदमेव देवता इति जैमिनिवचनप्रामाण्यात् । तथा च मृगेन्द्रः ।

शब्देतरत्वे युगपद्भिन्नदेशेषु यष्टृषु ।
न सा प्रयाति सांनिध्यं मूर्तत्वादस्मदादिवत् ॥

इति । सेति देवता । हूयमानस्य च वस्तुनो भस्मीभावमात्रोपलम्भात्तदुपयोगजनिता देवानां प्रीतिः प्रलापमात्रम् । अपि च योयं त्रेताग्निः स त्रयस्त्रिंशत्कोटिदेवतानां मुखम् । अग्निमुखा वै देवा इति श्रुतेः । ततश्चोत्तममध्यमाधमदेवानामेकेनैव मुखेन भुञ्जानानामन्योच्छिष्टभुक्तिप्रसङ्गः । तथा चैते तुरुष्केभ्योप्यतिरिच्यन्ते । तेपि तावदेकत्रैवामत्रे भुञ्जते न पुनरेकेनैव वदनेन । किं च । एकस्मिन् वपुषि वदनबाहुल्यं क्वचन श्रूयते यत्पुनरनेकशरीरेष्वेकं मुखमिति महदाश्चर्यम् । सर्वेषां च देवानामेकस्मिन्नेव मुखेङ्गीकृते यदा केनचिदेको देवः पूजादिनाराद्धोन्यश्च निन्दादिना विराद्धस्ततश्चैकेनैव मुखेन युगपदनुग्रहनिग्रहवाक्योच्चारणसंकरः प्रसज्येत । अन्यच्च । मुखं देहस्य नवमो भागस्तदपि येषां दाहात्मकं तेषामेकैकशः सकलदेहदाह-

त्मकत्वं त्रिभुवनभस्मीकरणपर्यवसितमेव संभाव्यत इत्यलमतिचर्चया ॥ यश्च कारीरीयज्ञादौ वृष्ट्यादिफलेऽव्यभिचारस्तत्प्रीणितदेवतानुग्रहहेतुक उक्तः सोप्यनैकान्तिकः । क्वचिद् व्यभिचारस्यापि दर्शनात् । यत्रापि न व्यभिचारस्तत्रापि न त्वदाहिताहुतिभोजनजन्मा तदनुग्रहः । किं तु स देवताविशेषोतिशयज्ञानी स्वोद्देशनिर्वर्तितं पूजोपचारं यदा स्वस्थानावस्थितः सन् जानीते तदा तत्कर्तारं प्रति प्रसन्नचेतोवृत्तिस्तत्कार्याणीच्छावशात्साधयति । अनुपयोगादिना पुनरजानानो जानानोपि वा पूजाकर्तुरभाग्यसहकृतः सन्न साधयति । द्रव्यक्षेत्रकालभावादिसहकारिसाचिव्यापेक्षस्यैव कार्योत्पादस्योपलम्भात् । स च पूजोपचारः पशुविशसनव्यतिरिक्तैः प्रकारान्तरैरपि सुकरस्तत्किमनया पापैकफलया शौनिकवृत्त्या । यच्च छगलजाङ्गलहोमात्परराष्ट्रवशीकृतिसिद्ध्या देव्याः परितोषानुमानं तत्र कः किमाह । कासांचित्क्षुद्रदेवतानां तथैव प्रत्यङ्गीकारात् । केवलं तत्रापि तद्वस्तुदर्शनज्ञानादिनैव परितोषो न पुनस्तद्भुक्त्या । निम्बपत्रकटुकतैलधूमांशादीनां हूयमानद्रव्यादीनामपि तद्भोज्यत्वप्रसङ्गात् । परमार्थतस्तु तत्तत्सहकारिसमवधानसचिवाराधकानां भक्तिरेव तत्तत्फलं जनयति अचेतने चिन्तामण्यादौ तथादर्शनात् । अतिथीनां तु प्रीतिः संस्कारसंपन्नपक्वान्नादिनापि साध्या । तदर्थं महोक्षमहाजादिप्रकल्पनं निर्विवेकतामेव ख्यापयति । पितॄणां पुनः प्रीतिरनैकान्तिकी श्राद्धादिविधानेनापि भूयसां संतानवृद्धेरनुपलब्धेः । तदविधानेपि च केषांचिद्गर्दभशूकराजादीनामिव सुतरां तद्दर्शनात् । ततश्च श्राद्धादिविधानं मुग्धजनविप्रतारणमात्रफलमेव । ये हि लोकान्तरं प्राप्तास्ते तावत्स्वकृतकर्मानुसारेण सुरनारकादिगतिषु सुखमसुखं वा भुञ्जाना एवासते ते कथमिव

तनयादिभिरावर्जितं पिण्डमुपभोक्तुं स्पृहयालवोपि स्युः । तथा च युष्मद्यूथिनः पठन्ति ।

मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
तन्निर्वाणप्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम् ॥

इति कथं श्राद्धविधानाद्यर्जितं पुण्यं तेषां समीपमुपैतु । तदन्यकृतत्वात् तस्य जडत्वात् निश्चरणत्वाच्च । अथ तेषामुद्देशेन श्राद्धादिविधानेपि पुण्यं दातुरेव तनयादेः स्यादिति चेन्न । तेन तज्जन्यपुण्यस्य स्वाध्यवसायादुत्तारितत्वात् । एवं च तत्पुण्यं नैवेतरस्यापि इति विचाल एव विलीनं त्रिशङ्कुज्ञातेन । किं तु पापानुबन्धिपुण्यत्वात् तत्त्वतः पापमेव । अथ विप्रोपभुक्तं तेभ्य उपतिष्ठत इति चेत् क इवैतत्प्रत्येतु । विप्राणामेव मेदुरोदरतादर्शनात् । तद्वपुषि च तेषां संक्रमः श्रद्धातुमपि न शक्यते । भोजनावसरे तत्संक्रमलिङ्गस्य कस्याप्यनवलोकनात् । विप्राणामेव च तृप्तेः साक्षात्करणात् । यदि परं त एव स्थूलकवलैराकुलतरमतिगार्ध्याद्भक्षयन्तः प्रेतप्राया इति मुधैव श्राद्धादिविधानम् । यदपि गयाश्राद्धादियाचनमुपलभ्यते तदपि तादृशविप्रलम्भकविभङ्गज्ञानिव्यन्तरादिकृतमेव निश्चेयम् ॥ यदप्युदितम् आगमश्चात्र प्रमाणमिति तदप्यप्रमाणम् । स हि पौरुषेयो वा स्यादपौरुषेयो वा । पौरुषेयश्चेत् सर्वज्ञकृतः तदितरकृतो वा । आद्यपक्षे युष्मन्मतव्याहतिः । तथा च भवत्सिद्धान्तः ।

अतीन्द्रियाणामर्थानां साक्षाद्द्रष्टा न विद्यते ।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः ॥

द्वितीयपक्षे तु तत्र दोषवत्कर्तृकत्वेनानाश्वासप्रसङ्गः । अपौरुषेयश्चेन्न । संभवत्येव स्वरूपनिराकरणात् तुरङ्गशृङ्गवत् । तथाह्युक्तिर्वचनमुच्यत इति चेति पुरुषक्रियानुगतं रूपमस्य एतत्क्रियाभावे कथं भवितुमर्हति । नचैतत्केवलं क्वचिद्ध्वनदुपलभ्यते ।

उपलब्धावप्यदृश्यवक्त्राशङ्कासंभवात् । तस्माद्यद्वचनं तत्पौरुषेयमेव वर्णात्मकत्वात् कुमारसंभवादिवचनवत् । वचनात्मकश्च वेदः । तथा चाहुः ।

ताल्वादिजन्मा ननु वर्णवर्गो
वर्णात्मको वेद इति स्फुटं च ।
पुंसश्च ताल्वादि ततः कथं स्या-
दपौरुषेयोयमिति प्रतीतिः ॥

इति श्रुतेरपौरुषेयत्वमुररीकृत्यापि तावद्भवद्भिरपि तदर्थव्याख्यानं पौरुषेयमेवाङ्गीक्रियते । अन्यथाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र श्वमांसं भक्षयेदिति किं नार्थः । नियामकाभावात् । ततो वरं सूत्रमपि पौरुषेयमभ्युपगतम् । अस्तु वा अपौरुषेयः तथापि तस्य न प्रामाण्यम् । आप्तपुरुषाधीना हि वाचां प्रमाणतेति । एवं च तस्याप्रामाण्ये तदुक्तस्तदनुपातिस्मृतिप्रतिपादितश्च हिंसात्मको यागश्राद्धादिविधिः प्रामाण्यविधुर एवेति ॥ अथ योयं न हिंस्यात् सर्वभूतानि इत्यादिना हिंसानिषेधः स औत्सर्गिको मार्गः । सामान्यतो विधिरित्यर्थः । ततश्चापवादेनोत्सर्गस्य बाधितत्वान्न श्रौतो हिंसाविधिर्दोषाय । उत्सर्गापवादयोरपवादो विधिर्बलीयानिति न्यायात् । भवतामपि हि न खल्वेकान्तेन हिंसानिषेधः । तत्तत्कारणजाते पृथिव्यादिप्रतिसेवनानामनुज्ञानात् । ग्लानाद्यसंस्तरे आधाकर्मादिग्रहणभणनाच्च । अपवादपदं च याज्ञिकी हिंसा देवतादिप्रीतेः पुष्टालम्बनत्वादिति परमाशङ्क्य स्तुतिकार आह । नोत्सृष्टमित्यादि । अन्यार्थमिति मध्यवर्ति पदं डमरुकमणिन्यायेनोभयत्रापि संबन्धनीयम् । अन्यार्थमुत्सृष्टम् अन्यस्मै कार्याय प्रयुक्तम् । उत्सर्गवाक्यमन्यार्थप्रयुक्तेन वाक्येन नापोद्यते नापवादगोचरीक्रियते । यमेवार्थमाश्रित्य शास्त्रे उत्सर्गः प्रवर्तते --

तमेवाश्रित्यापवादोपि प्रवर्तते । तयोर्निम्नोन्नतादिव्यवहारवत्परस्परसापेक्षत्वेनैकार्थसाधनविषयत्वात् । यथा जैनानां संयमपरिपालनार्थं नवकोटिविशुद्धाहारग्रहणमुत्सर्गः तथाविधद्रव्यक्षेत्रकालभावापत्सु च निपतितस्य गत्यन्तराभावे पञ्चकादियतनयाऽनेषणीयादिग्रहणमपवादः सोपि च संयमपरिपालनार्थमेव । न च मरणैकशरणस्य गत्यन्तराभावोऽसिद्ध इति वाच्यम् ।

सव्वत्थसजंमं संजमाओ अप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवायाओ पुणो विसोही नयाऽविरई ॥

इत्यागमात् । तथा आयुर्वेदेपि यमेवैकं रोगमधिकृत्य कस्यांचिदवस्थायां किंचिद्वस्त्वपथ्यं तदेवावस्थान्तरे तत्रैव रोगे पथ्यम् ।

उत्पद्यते हि सावस्था देशकालामयान्प्रति ।
यस्यामकार्यं कार्यं स्यात्कर्म कार्यं तु वर्जयेत् ॥

इति वचनात् । यथा बलवदादेर्ज्वरिणो लङ्घनं क्षीणधातोस्तु तद्विपर्ययः। एवं देशाद्यपेक्षया ज्वरिणोपि दधिपानादि योज्यम् । तथा च वैद्याः ।

कालाविरोधि निर्दिष्टं ज्वरादौ लङ्घनं हितम् ।
ऋतेऽनिलश्रमक्रोधशोककामकृतज्वरान् ॥

एवं च यः पूर्वमपथ्यपरिहारो यत्र तत्रैवावस्थान्तरे तस्यैव परिभोगः। स खलूभयोरपि तस्यैव रोगस्य शमनार्थः। इति सिद्धमेकविषयत्वमुत्सर्गापवादयोरिति ॥ भवतां चोत्सर्गोन्यार्थोऽपवादश्चान्यार्थः। न हिंस्यात्सर्वभूतानि इत्युत्सर्गो हि दुर्गतिनिषेधार्थः अपवादस्तु वैदिकहिंसाविधिर्देवतातिथिपितृप्रीतिसंपादनार्थः। अतश्च परस्परनिरपेक्षत्वे कथमुत्सर्गोपवादेन बाध्यते । तुल्यबलयोर्विरोध इति न्यायात् । भिन्नार्थत्वेपि तेन तद्बाधनेतिप्रसङ्गात् । न च वाच्यं

वैदिकहिंसाविधिरपि स्वर्गहेतुतया दुर्गतिनिषेधार्थ एवेति तस्योक्तयुक्त्या स्वर्गहेतुत्वनिर्लोठनात्। तमन्तरेणापि च प्रकारान्तरैरपि तत्सिद्धिभावाद्गत्यन्तराभावे ह्यपवादपक्षकक्षीकारः॥ न च वयमेव यागविधेः सुगतिहेतुत्वं नाङ्गीकुर्महे किं तु भवादाप्ता अपि। यदाह व्यासमहर्षिः।

पूजया विपुलं राज्यमग्निकार्येण संपदः।
तपः पापविशुद्ध्यर्थं ज्ञानं ध्यानं च मुक्तिदम्॥

अत्राग्निकार्यशब्दवाच्यस्य यागादिविधेरुपायान्तरैरपि लभ्यानां संपदामेव हेतुत्वं वदन्नाचार्यस्तस्य सुगतिहेतुत्वमर्थात्कदर्थितवानेव। तथा च स एव भावाग्निहोत्रं ज्ञानपालीत्यादिश्लोकैः स्थापितवान्। तदेवं स्थिते तेषां वादिनां चेष्टामुपमया दूषयति स्वपुत्रेत्यादि। परेषां भवत्प्रणीतवचनपराङ्मुखानाम्। स्फुरितं चेष्टितम्। स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि निजसुतनिपातनेन राज्यप्राप्तिमनोरथसदृशम्। यथा किल कश्चिदविपश्चित्पुरुषः परुषाशयतया निजमङ्गजं व्यापाद्य राज्यश्रियं प्राप्तुमीहते न च तस्य तत्प्राप्तावपि पुत्रघातपातककलङ्कपङ्कः क्वचिदपयाति एवं वेदविहितहिंसया देवतादिप्रीतिसिद्धावपि हिंसासमुत्थं दुष्कृतं न खलु पराहन्यते। अत्र च लिप्साशब्दं प्रयुञ्जानः स्तुतिकारो ज्ञापयति यथा तस्य दुराशयस्यासदृशतादृक्कर्मणा निर्मूलितसत्कर्मणो राज्यप्राप्तौ केवलं समीहामात्रमेव न पुनस्तत्सिद्धिः एवं तेषां दुर्वादिनां वेदविहितहिंसामनुतिष्ठतामपि देवतादिपरितोषणे मनोराज्यमेव। न पुनस्तेषामुत्तमजनपूज्यत्वमिन्द्रादिदिवौकसां च तृप्तिः। प्रागुक्तयुक्त्या निराकृतत्वात्॥ इति काव्यार्थः॥ ११॥

सांप्रतं नित्यपरोक्षज्ञानवादिनां मीमांसकभेदभट्टानामेकात्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां च यौगानां मतं विकुट्टयन्नाह ।

स्वार्थावबोधक्षम एव बोधः
प्रकाशते नार्थकथान्यथा तु ॥
परे परेभ्यो भयतस्तथापि
प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥ १२ ॥

बोधो ज्ञानम् । स च स्वार्थावबोधक्षम एव प्रकाशते । स्वस्यात्मस्वरूपस्यार्थस्य च पदार्थस्य योऽवबोधः परिच्छेदः तत्र क्षम एव समर्थ एव प्रतिभासत इत्ययोगव्यवच्छेदः । प्रकाशत इति क्रिययावबोधस्य प्रकाशरूपत्वसिद्धेः सर्वप्रकाशानां स्वार्थप्रकाशकत्वेन बोधस्यापि तत्सिद्धिः । विपर्यये दूषणमाह । नार्थकथान्यथा तु इति । अन्यथेति अर्थप्रकाशनेऽविवादात् ज्ञानस्य स्वसंविदितत्वानभ्युपगमेऽर्थकथैव न स्यात् । अर्थकथा पदार्थसंबन्धिनी वार्ता । सदसद्रूपात्मकं स्वरूपमिति यावत् । तुशब्दोऽवधारणे । भिन्नक्रमश्च । स चार्थकथया सह योजित एव । यदि हि ज्ञानं स्वसंविदितं नेष्यते तदा तेनात्मज्ञानाय ज्ञानान्तरमपेक्षणीयं तेनाप्यपरमित्याद्यनवस्था । ततो ज्ञानं तावत्स्वावबोधव्यग्रतामग्नम् । अर्थस्तु जडतया स्वरूपज्ञापनासमर्थ इति को नामार्थस्य कथामपि कथयेत् । तथापि एवं ज्ञानस्य स्वसंविदितत्वे युक्त्या घटमानेऽपि । परे तीर्थान्तरीयाः । ज्ञानं कर्मतापन्नम् । अनात्मनिष्ठम् न विद्यते आत्मनः स्वस्य निष्ठा निश्चयो यस्य तदनात्मनिष्ठम् । अस्वसंविदितमित्यर्थः । प्रपेदिरे प्रपन्नाः । कुत इत्याह । परेभ्यो भयतः । परे पूर्वपक्षवादिनस्तेभ्यः सकाशात् ज्ञानस्य स्वसंविदितत्वं नोपपद्यते स्वात्मनि क्रियाविरोधादित्युपालम्भसंभावनासंभवं यद्भयं तस्मात् तदाश्रित्येत्यर्थः ॥

इत्थमक्षरगमनिकां विधाय भावार्थः प्रपञ्च्यते ॥ भट्टास्तावदिदं वदन्ति । यत् ज्ञानं स्वसंविदितं न भवति । स्वात्मनि क्रियाविरोधात् । न हि सुशिक्षितोपि नटबटुः स्वस्कन्धमधिरोढुं पटुः । न च सुतीक्ष्णाप्यसिधारा स्वं छेत्तुमाहितव्यापारा । ततश्च परोक्षमेव ज्ञानमिति ॥ तदेतन्न सम्यक् । यतः किमुत्पत्तिः स्वात्मनि विरुध्यते ज्ञप्तिर्वा । यद्युत्पत्तिः सा विरुध्यताम् । न हि वयमपि ज्ञानमात्मानमुत्पादयतीति मन्यामहे । अथ ज्ञप्तिः । नेयमात्मनि विरुद्धा । तदात्मनैव ज्ञानस्य स्वहेतुभ्य उत्पादात् प्रकाशात्मनेव प्रदीपालोकस्य । अथ प्रकाशात्मैव प्रदीपालोक उत्पन्न इति परप्रकाशकोस्तु आत्मानमप्येतावन्मात्रेणैव प्रकाशयतीति कोऽयं न्याय इति चेत् तत्किं तेन वराकेणाप्रकाशितेनैव स्थातव्यम् आलोकान्तराद्वास्य प्रकाशेन भवितव्यम् । प्रथमे प्रत्यक्षबाधः । द्वितीयेपि सैवानवस्थापत्तिश्च ॥ अथ नासौ स्वमपेक्ष्य कर्मतया चकास्तीत्यस्वप्रकाशकः स्वीक्रियते । आत्मानं न प्रकाशयतीत्यर्थः । प्रकाशरूपतयोत्पन्नत्वात्स्वयं प्रकाशत एव इति चेत् चिरं जीव । न हि वयमपि ज्ञानं कर्मतयैव प्रतिभासमानं स्वसंवेद्यं ब्रूमः । ज्ञानं स्वयं प्रतिभासत इत्यादावकर्मकस्य तस्य चकासनात् । यथा तु ज्ञानं स्वं जानामीति कर्मतयापि तद्भाति तथा प्रदीपः स्वं प्रकाशयतीत्ययमपि कर्मतया प्रथित एव । यस्तु स्वात्मनि क्रियाविरोधो दोष उद्भावितः सोऽयुक्तः । अनुभवसिद्धेर्थे विरोधासिद्धेः । घटमहं जानामीत्यादौ कर्तृकर्मवज्ज्ञप्तेरप्यवभासमानत्वात् । न चाप्रत्यक्षोपलम्भस्यार्थदृष्टिः प्रसिध्यति । न च ज्ञानान्तरादुपलम्भसंभावना । तस्याप्यनुपलब्धस्य प्रस्तुतोपलम्भप्रत्यक्षीकाराभावात् । उपलम्भान्तरसंभावने चानवस्था । अर्थोपलम्भात्तस्योपलम्भेऽन्योन्याश्रयदोषः ॥ अथार्थप्राकट्यमन्यथा नोपपद्यते यदि ज्ञानं

न स्यादित्यर्थापत्त्या तदुपलम्भ इति चेन्न । तस्या अपि ज्ञापकत्वेनाज्ञाताया ज्ञापकत्वायोगात् । अर्थापत्त्यन्तरात्तज्ज्ञानेऽनवस्थेतरेतराश्रयदोषापत्तेस्तदवस्थः परिभवः । तस्मादर्थोन्मुखतयेव स्वोन्मुखतयापि ज्ञानस्य प्रतिभासात्स्वसंविदितत्वम् ॥ नन्वनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गः । प्रयोगस्तु ज्ञानमनुभवरूपमप्यनुभूतिर्न भवति अनुभाव्यत्वाद् । घटवत् अनुभाव्यं च भवद्भिरिष्यते ज्ञानम् । स्वसंवेद्यत्वात् । नैवम् । ज्ञातुर्ज्ञातृत्वेनेवानुभूतेरनुभूतित्वेनैवानुभवात् । न चानुभूतेरनुभाव्यत्वं दोषः । अर्थापेक्षयानुभूतित्वात् स्वापेक्षया चानुभाव्यत्वात् । स्वपितृपुत्रापेक्षयैकस्य पुत्रत्वपितृत्ववद्विरोधाभावात् ॥ अनुमानाच्च स्वसंवेदनसिद्धिः । तथाहि । ज्ञानं स्वयं प्रकाशमानमेवार्थं प्रकाशयति प्रकाशकत्वात् प्रदीपवत् । संवेदनस्य प्रकाश्यत्वात्प्रकाशकत्वमसिद्धमिति चेन्न । अज्ञाननिरासादिद्वारेण प्रकाशकत्वोपपत्तेः । ननु नेत्रादयः प्रकाशका अपि स्वं न प्रकाशयन्तीति प्रकाशकत्वहेतोरनैकान्तिकतेति चेत् नात्र नेत्रादिभिरनैकान्तिकता । तेषां लब्ध्युपयोगलक्षणभावेन्द्रियरूपाणामेव प्रकाशकत्वात् ॥ भावेन्द्रियाणां च स्वसंवेदनरूपतैवेति न व्यभिचारः । तथा संवित् स्वप्रकाशा । अर्थप्रतीतित्वात् । यः स्वप्रकाशो न भवति नासावर्थप्रतीतिर्यथा घटः ॥ तदेवं सिद्धेपि प्रत्यक्षानुमानाभ्यां ज्ञानस्य स्वसंविदितत्वे सत्संप्रयोगे इन्द्रियबुद्धिजन्मलक्षणं ज्ञानं ततोर्थप्राकट्यं तस्मादर्थापत्तिः तया प्रवर्तकज्ञानस्योपलम्भ इत्येवंरूपा त्रिपुटीप्रत्यक्षकल्पना भट्टानां प्रयासफलैव ॥

यौगास्त्वाहुः । ज्ञानं स्वान्यप्रकाश्यम् । ईश्वरज्ञानान्यत्वे सति प्रमेयत्वात् । घटवत् । समुत्पन्नं हि ज्ञानमेकात्मसमवेतानन्तरोद्भविष्णुमानसप्रत्यक्षेणैव लक्ष्यते न पुनः स्वेन । न चैवमनवस्था । अर्थावसायिविज्ञानोत्पादमात्रेणैवार्थसिद्धौ प्रमातुः कृतार्थत्वात् । अर्थज्ञान-

जिज्ञासायां तु तत्रापि ज्ञानमुत्पद्यत एवेति ॥ तदयुक्तम् । पक्षस्य प्रत्यनुमानवाधितत्वेन हेतोः कालात्ययापदिष्टत्वात् । तथा हि । विवादास्पदं ज्ञानं स्वसंविदितं ज्ञानत्वात् ईश्वरज्ञानवत् । न चायं वाद्यप्रतीतो दृष्टान्तः। पुरुषस्येश्वरतया जैनैरपि स्वीकृतत्वेन तज्ज्ञानस्य तेषां प्रसिद्धेः । व्यर्थविशेष्यश्चात्र तव हेतुः । समर्थविशेषणोपादानेनैव साध्यसिद्धेः। अग्निसिद्धौ धूमवत्त्वे सति द्रव्यत्वादितिवत् ईश्वरज्ञानान्यत्वादित्येतावतैव गतत्वात् । न हीश्वरज्ञानादन्यत्स्वसंविदितमप्रमेयं वा ज्ञानमस्ति यद्व्यवच्छेदाय प्रमेयत्वादिति क्रियेत । भवन्मते तदन्यज्ञानस्य सर्वस्य प्रमेयत्वात् । अप्रयोजकश्चायं हेतुः । सोपाधित्वात् । साधनाव्यापकः साध्येन समव्याप्तिश्च खलूपाधिरभिधीयते । तत्पुत्रत्वादिना श्यामत्वे साध्ये शाकाद्याहारपरिणामवत् । उपाधिश्चात्र जडत्वम् । तथा हि ईश्वरज्ञानान्यत्वे प्रमेयत्वे च सत्यपि यदेव जडं स्तम्भादि तदेव स्वस्मादन्येन प्रकाश्यते । स्वप्रकाशे परमुखप्रेक्षित्वं हि जडस्य लक्षणम् । न च ज्ञानं जडस्वरूपम् । अतः साधनाव्यापकत्वं जडत्वस्य । साध्येन समव्याप्तिकत्वं चास्य स्पष्टमेव । जाड्यं विहाय स्वप्रकाशाभावस्य तं च त्यक्त्वा जाड्यस्य क्वचिदप्यदर्शनादिति ॥ यच्चोक्तं समुत्पन्नं हि ज्ञानमेकात्मसमवेतेत्यादि तदप्यसत्यम् । इत्थमर्थज्ञानतज्ज्ञानयोरुत्पद्यमानयोः क्रमानुपलक्षणात् । आशूत्पादात्क्रमानुपलक्षणमुत्पलपत्रशतव्यतिभेदवदिति चेत् तन्न।जिज्ञासाव्यवहितस्यार्थज्ञानस्योत्पादप्रतिपादनात् । न च ज्ञानानां जिज्ञासासमुत्पाद्यत्वं घटते। अजिज्ञासितेष्वपि योग्यदेशेषु विषयेषु तदुत्पादप्रतीतेः । न चार्थज्ञानमयोग्यदेशम् । आत्मसमवेतस्यास्य समुत्पादात्।इति जिज्ञासामन्तरेणैवार्थज्ञाने ज्ञानोत्पादप्रसङ्गः । अथोत्पद्यतां नामेदं को दोष इति चेत् तन्न। नन्वेवमेव तज्ज्ञानज्ञानेप्यपरज्ञानोत्पादप्रसङ्गः

तत्रापि चैवमेवायमित्यपरापरज्ञानोत्पादपरंपरायामेवात्मनो व्यापारान्न विषयान्तरसंचारः स्यादिति ॥ तस्माद्यज्ज्ञानं तदात्मबोधं प्रत्यनपेक्षितज्ञानान्तरव्यापारम् । यथा गोचरान्तरग्राहिज्ञानात्प्राग्भाविगोचरान्तरग्राहिधारावाहिज्ञानप्रबन्धस्यान्त्यज्ञानम् । ज्ञानं च विवादाध्यासितं रूपादिज्ञानमिति न ज्ञानस्य ज्ञानान्तरज्ञेयता युक्तिं सहत इति काव्यार्थः ॥ १२ ॥

अथ ये ब्रह्माद्वैतवादिनोऽविद्याऽपरपर्यायमायावशात्प्रतिभासमानत्वेन विश्वत्रयवर्तिवस्तुप्रपञ्चमपारमार्थिकं समर्थयन्ते तन्मतमुपहसन्नाह ।

माया सती चेद्द्वयतत्त्वसिद्धि-
रथासती हन्त कुतः प्रपञ्चः ।
मायैव चेदर्थसहा च तत्किं
माता च वन्ध्या च भवत्परेषाम् ॥ १३ ॥

तैर्वादिभिस्तात्त्विकात्मब्रह्मव्यतिरिक्ता या माया अविद्या प्रपञ्चहेतुः परिकल्पिता सा सद्रूपाऽसद्रूपा वा द्वयी गतिः । सती सद्रूपा चेत्तदा द्वयतत्त्वसिद्धिः । द्वावयवौ यस्य तद्द्वयं तथाविधं यत्तत्त्वं परमार्थस्तस्य सिद्धिः । अयमर्थः । एकं तावत्त्वदभिमतं तात्त्विकमात्मब्रह्म द्वितीया च माया तत्त्वरूपा सद्रूपतयाङ्गीक्रियमाणत्वात् । तथा चाद्वैतवादस्य मूले निहितः कुठारः । अथेति पक्षान्तरद्योतने । यदि असती गगनाम्भोजवदवस्तुरूपा सा माया ततः । हन्तेत्युपदर्शने आश्चर्ये वा । कुतः प्रपञ्चः । अयं त्रिभुवनोदरविवरविवर्तिपदार्थसार्थरूपप्रपञ्चः कुतः । न कुतोपि संभवीत्यर्थः । मायाया अवस्तुत्वेनाभ्युपगमात् अवस्तुनश्च तुरङ्गशृङ्गस्येव सर्वोपा-

ख्याविरहितस्य साक्षात्क्रियमाणेदृशविवर्तजननेऽसमर्थत्वात् । किलेन्द्रजालादौ मृगतृष्णादौ वा मायोपदर्शितार्थानामर्थक्रियाया-मसामर्थ्यं दृष्टम् । अत्र तु तदुपलम्भात्कथं मायाव्यपदेशः श्रद्धीयताम् । अथ मायापि भविष्यति अर्थक्रियासमर्थपदार्थोपदर्शनक्षमा च भविष्यति इति चेत्तर्हि स्ववचनविरोधः । न हि भवति माता च वन्ध्या चेति । एनमेवार्थं हृदि निधायोत्तरार्धमाह । मायैव चेदित्यादि। अत्रैवकारोऽप्यर्थः।अपिश्च समुच्चयार्थः।अग्रेतनचकारश्च तथा। उभयोश्च समुच्चयार्थयोर्यौगपद्यद्योतकत्वं प्रतीतमेव। यथा रघुवंशे ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः इति । तदयं वाक्यार्थो माया च भविष्यति अर्थसहा च भविष्यति । अर्थसहा अर्थक्रियासमर्थपदार्थोपदर्शनक्षमा। चेच्छब्दोऽत्र योज्यते इति चेत्। एवं परमाशङ्क्य तस्य स्ववचनविरोधमुद्भावयति। तत्किं भवत्परेषां माता च वन्ध्या च । किमिति संभावने । संभाव्यते एतत् भवतो ये परे प्रतिपक्षास्तेषां भवत्परेषां भवद्व्यतिरिक्तानां भवदाज्ञापृथग्भूतत्वेन तेषां वादिनां यन्माता च भविष्यति वन्ध्या च भविष्यतीत्युपहासः। माता हि प्रसवधर्मिणी वनितोच्यते । वन्ध्या च तद्विपरीता । ततश्च वन्ध्या चेत्कथं माता माता चेत्कथं वन्ध्या । तदेवं मायाया अवास्तव्या अप्यर्थसहत्वेऽङ्गीक्रियमाणे प्रस्तुतवाक्यवत्स्पष्ट एव स्ववचनविरोधः । इति समासार्थः ॥

व्यासार्थस्त्वयम्। ते वादिन इदं प्रणिगदन्ति। तात्त्विकमात्मब्रह्मैवास्ति ।

सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचन ।
आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन ॥

इति समयात् । अयं तु प्रपञ्चो मिथ्यारूपः प्रतीयमानत्वात् यदेवं तदेवं यथा शुक्तिशकले कलधौतं तथा चायं तस्मात्तथा । तदेतद्वार्तम्। तथाहि । मिथ्यारूपत्वं तैः कीदृग्विवक्षितं किमत्यन्ता-

सत्त्वम् उतान्यस्यान्याकारतया प्रतीतत्वम् आहोस्विदनिर्वाच्यत्वम्। प्रथमपक्षेऽसत्ख्यातिप्रसङ्गः । द्वितीये विपरीतख्यातिस्वीकृतिः । तृतीये तु किमिदमनिर्वाच्यत्वम् । निःस्वभावत्वं चेन्निसः प्रतिषेधार्थत्वे स्वभावशब्दस्यापि भावाभावयोरन्यतरार्थत्वेऽसत्ख्यातिसत्ख्यात्यभ्युपगमप्रसङ्गः । भावप्रतिषेधेऽसत्ख्यातिरभावप्रतिषेधे सत्ख्यातिरिति। प्रतीत्यगोचरत्वं निःस्वभावत्वमिति चेदत्र विरोधः । स प्रपञ्चो हि न प्रतीयते चेत्कथं धर्मितयोपात्तः कथं च प्रतीयमानत्वं हेतुतयोपात्तं तथोपादाने वा कथं न प्रतीयते । यथा प्रतीयते न तथेति चेत् तर्हि विपरीतख्यातिरियमभ्युपगता स्यात् । किं चेयमनिर्वाच्यता प्रपञ्चस्य प्रत्यक्षबाधिता घटोयमित्याद्याकारं हि प्रत्यक्षं प्रपञ्चस्य सत्यतामेव व्यवस्यति । घटादिप्रतिनियतपदार्थपरिच्छेदात्मनस्तस्योत्पादात् । इतरेतरविविक्तवस्तूनामेव च प्रपञ्चशब्दवाच्यत्वात्। अथ प्रत्यक्षस्य विधायकत्वात्कथं प्रतिषेधे सामर्थ्यम्। प्रत्यक्षं हि इदमिति वस्तुस्वरूपं गृह्णाति नान्यत्स्वरूपं प्रतिषेधति ।

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्व आगमस्तेन प्रत्यक्षेण प्रबाध्यते ॥

इति वचनात् इति चेन्न । अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसंपत्तेः । पीतादिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति नान्यथा । केवलवस्तुस्वरूपप्रतिपत्तेरेवान्यप्रतिषेधप्रतिपत्तिरूपत्वात् । मुण्डभूतलग्रहणे घटाभावग्रहणवत् । तस्माद्यथा प्रत्यक्षं विधायकं प्रतिपन्नं तथा निषेधकमपि प्रतिपत्तव्यम् । अपि च विधायकमेव प्रत्यक्षमित्यङ्गीकृते यथा प्रत्यक्षेण विद्या विधीयते तथा किं नाविद्यापीति । तथा च द्वैतापत्तिः। ततश्च सुव्यवस्थितः प्रपञ्चः । तदमी वादिनोऽविद्याविवेकेन सन्मात्रं प्रत्यक्षात्प्रतियन्तोपि न निषेधकं तदिति ब्रुवाणाः कथं नोन्मत्ता इति सिद्धं प्रत्यक्ष-

बाधितः पक्ष इति ॥ अनुमानबाधितश्च । प्रपञ्चो मिथ्या न भवति असद्विलक्षणत्वात् आत्मवत् । प्रतीयमानत्वं च हेतुर्ब्रह्मात्मना व्यभिचारी । स हि प्रतीयते न च मिथ्या । अप्रतीयमानत्वे त्वस्य तद्विषयवचसामप्रवृत्तेर्मूकतैव तेषां श्रेयसी । साध्यविकलश्च दृष्टान्तः । शुक्तिशकलकलधौतेपि प्रपञ्चान्तर्गतत्वेन अनिर्वचनीयतायाः साध्यमानत्वात् । किं चेदमनुमानं प्रपञ्चाद्भिन्नमभिन्नं वा । यदि भिन्नं तर्हि सत्यमसत्यं वा । यदि सत्यं तद्वदेव प्रपञ्चस्यापि सत्यत्वं स्यात् । अद्वैतवादप्राकारे खण्डिपातात् । अथासत्यं तर्हि न किंचित्तेन साधयितुं शक्यम् । अवस्तुत्वात् । अभिन्नं चेत् पञ्चस्वभावतया तस्यापि मिथ्यारूपत्वापत्तिः । मिथ्यारूपं च तत्कथं स्वसाध्यसाधनायालम् ॥ एवं च प्रपञ्चस्यापि मिथ्यारूपत्वासिद्धेः कथं परमब्रह्मणस्तात्त्विकत्वं स्याद्यतो बाह्यार्थाभावो भवेदिति ॥

अथवा प्रकारान्तरेण सन्मात्रलक्षणस्य परमब्रह्मणः साधनं दूषणं चोपन्यस्यते । ननु परमब्रह्मण एवैकस्य परमार्थसतो विधिरूपस्य विद्यमानत्वात्प्रमाणविषयत्वम् । अपरस्य द्वितीयस्य कस्यचिदप्यभावात् । तथा हि । प्रत्यक्षं तदावेदकमस्ति । प्रत्यक्षं द्विधा भिद्यते । निर्विकल्पकसविकल्पकभेदात् । ततश्च निर्विकल्पकप्रत्यक्षात्सन्मात्रविषयात्तस्यैकस्यैव सिद्धिः । तथाचोक्तम् ।

अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ।

न च विधिवत्परस्परव्यावृत्तिरप्यध्यक्षत एव प्रतीयत इति द्वैतसिद्धिः । तस्य निषेधाविषयत्वात् । आहुर्विधातृ प्रत्यक्षं न निषेद्धृ इत्यादिवचनात् । यच्च सविकल्पकप्रत्यक्षं घटपटादिभेदसाधकं तदपि सत्तारूपेणान्वितानामेतेषां प्रकाशकत्वात् सत्ताऽद्वैतस्यैव साधकम् । सत्तायाश्च परमब्रह्मरूपत्वात् । तदुक्तं यदद्वैतं तद्ब्रह्मणो रूपमिति ॥

अनुमानादपि तत्सद्भावो विभाव्यत एव । तथा हि विधिरेव तत्त्वम् । प्रमेयत्वात् । यतः प्रमाणविषयभूतोऽर्थः प्रमेयः । प्रमाणानां च प्रत्यक्षानुमानागमोपमानार्थापत्तिसंज्ञकानां भावविषयत्वेनैव प्रवृत्तेः । तथा चोक्तम् ।

प्रत्यक्षाद्यवतारः स्याद्भावांशो गृह्यते यदा ।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षिते ॥

यच्चाभावाख्यं प्रमाणं तस्य प्रामाण्याभावान्न तत्प्रमाणम् । तद्विषयस्य कस्यचिदप्यभावात् । यस्तु प्रमाणपञ्चकविषयः स तु विधिरेव । तेनैव च प्रमेयत्वस्य व्याप्तत्वात् । सिद्धं प्रमेयत्वेन विधिरेव तत्त्वम् । यत्तु न विधिरूपं तन्न प्रमेयम् यथा खरविषाणम् । प्रमेयं चेदं निखिलं वस्तुतत्त्वम् । तस्माद्विधिरूपमेव । अतो वा तत्सिद्धिः । ग्रामारामादयः पदार्थाः प्रतिभासान्तःप्रविष्टाः । प्रतिभासमानत्वात् । यत्प्रतिभासते तत्प्रतिभासान्तःप्रविष्टं यथा प्रतिभासस्वरूपम् । प्रतिभासन्ते च ग्रामारामादयः पदार्थाः । तस्मात्प्रतिभासान्तःप्रविष्टाः ॥ आगमोऽपि परमब्रह्मण एव प्रतिपादकः समुपलभ्यते । पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति । यदेजति यन्नैजति । यद्दूरे यदन्तिके । यदन्तरस्य सर्वस्य यदुत सर्वस्यास्य बाह्यतः । इत्यादिः । श्रोतव्यो मन्तव्यो निदिध्यासितव्यः अनुमन्तव्य इत्यादिवेदवाक्यैरपि तत्सिद्धेः । कृत्रिमेणाप्यागमेन तस्यैव प्रतिपादनात् । उक्तं च ।

सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किंचन ।
आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन ॥

इति प्रमाणतस्तस्यैव सिद्धेः ॥ परमपुरुष एक एव तत्त्वम् । सकलभेदानां तद्विवर्तत्वात् । तथा हि सर्वे भावा ब्रह्मविवर्ताः । सत्त्वैकरूपेणान्वितत्वात् । यद्यद्रूपेणान्वितं तत्तदात्मकमेव यथा घटघटीशरावो-

दञ्चनादयो मृद्रूपेणैकेनान्विता मृद्विवर्ताः। सत्त्वैकरूपेणान्वितं च सकलं वस्तु। इति सिद्धं ब्रह्मविवर्तत्वं निखिलभेदानामिति॥

तदेतत्सर्वं मदिरारसास्वादगद्गदोद्गदितमिवाभासते। विचारासहत्वात्। सर्वं हि वस्तु प्रमाणसिद्धं न तु वाङ्मात्रेण। अद्वैतमते च प्रमाणमेव नास्ति। तत्सद्भावे द्वैतप्रसङ्गात्। अद्वैतसाधकस्य प्रमाणस्य द्वितीयस्य सद्भावात्। अथ मतं लोकप्रत्यायनाय तदपेक्षया प्रमाणमप्यभ्युपगम्यते। तदसत्। त्वन्मते लोकस्यैवासंभवात्। एकस्यैव नित्यनिरंशस्य परब्रह्मण एव सत्त्वात्॥ अथास्तु यथाकथंचित्प्रमाणमपि। तत्किं प्रत्यक्षमनुमानमागमो वा तत्साधकं प्रमाणमुररीक्रियते। न तावत्प्रत्यक्षम्। तस्य समस्तवस्तुजातगतभेदस्यैव प्रकाशकत्वात्। आबालगोपालं तस्यैव प्रतिभासनात्। यच्च निर्विकल्पकं प्रत्यक्षं तदावेदकमित्युक्तं तदपि न सम्यक्। तस्य प्रामाण्यानभ्युपगमात्। सर्वस्यापि प्रमाणतत्त्वस्य व्यवसायात्मकस्यैव विसंवादकत्वेन प्रामाण्योपपत्तेः। सविकल्पकेन तु प्रत्यक्षेण प्रमाणभूतेनैकस्यैव विधिरूपस्य परब्रह्मणः स्वप्नेऽप्यप्रतिभासनात्। यदप्युक्तम् आहुर्विधातृ प्रत्यक्षमित्यादि तदपि न पेशलम्। प्रत्यक्षेण ह्यनुवृत्तव्यावृत्ताकारात्मकवस्तुन एव प्रकाशनात्। एतच्च प्रागेव क्षुण्णम्। न ह्यनुस्यूतमेकमखण्डं सत्तामात्रं विशेषनिरपेक्षं सामान्यं प्रतिभासते येन यदद्वैतं तद्ब्रह्मणो रूपमित्याद्युक्तं शोभेत। विशेषनिरपेक्षस्य खरविषाणवदप्रतिभासनात्। तदुक्तम्।

निर्विशेषं हि सामान्यं भवेत्खरविषाणवत्।
सामान्यरहितत्वेन विशेषास्तद्वदेव हि॥

ततः सिद्धे सामान्यविशेषात्मन्यर्थे प्रमाणविषये कुत एवैकस्य परब्रह्मणः प्रमाणविषयत्वम्॥ यच्च प्रमेयत्वादित्यादित्यनुमानमुक्तं तदप्येतेनैवापास्तं बोद्धव्यम्। पक्षस्य प्रत्यक्षबाधितत्वेन हेतोः काला-

त्ययापदिष्टत्वात् । यच्च तत्सिद्धौ प्रतिभासमानत्वं साधनमुक्तं तदपि साधनाभासत्वेन न प्रकृतसाध्यसाधनायालम् । प्रतिभासमानत्वं हि निखिलभावानां स्वतः परतो वा । न तावत्स्वतः । घटपटमुकुटशकटादीनां स्वतः प्रतिभासमानत्वेनासिद्धेः । परतः प्रतिभासमानत्वं च परं विना नोपपद्यत इति । यच्च परमब्रह्मविवर्तवर्तित्वमखिलभेदानामित्युक्तं तदप्यन्वेत्रन्वीयमानद्वयाविनाभावित्वेन पुरुषाद्वैतं प्रतिबध्नात्येव । न च घटादीनां चैतन्यान्वयोप्यस्ति । मृदाद्यन्वयस्यैव तत्र दर्शनात् । ततो न किंचिदेतदपि । अतोनुमानादपि न तत्सिद्धिः । किं च पक्षहेतुदृष्टान्ता अनुमानोपायभूताः परस्परं भिन्ना अभिन्ना वा । भेदे द्वैतसिद्धिः । अभेदे त्वेकरूपतापत्तिः । तत्कथमेतेभ्योनुमानमात्मानमासादयति । यदि च हेतुमन्तरेणापि साध्यसिद्धिः स्यात्तर्हि द्वैतस्यापि वाङ्मात्रतः कथं न सिद्धिः । तदुक्तम् ।

हेतोरद्वैतसिद्धिश्चेद् द्वैतं स्याद्धेतुसाध्ययोः ।
हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम् ॥

पुरुष एवेदं सर्वमित्यादेः सर्वं वै खल्विदं ब्रह्मेत्यादेश्चागमादपि न तत्सिद्धिः । तस्यापि द्वैताविनाभावित्वेन अद्वैतं प्रति प्रामाण्यासंभवात् । वाच्यवाचकभावलक्षणस्य द्वैतस्यैव तत्रापि दर्शनात् । तदुक्तम् ।

कर्मद्वैतं फलद्वैतं लोकद्वैतं विरुध्यते ।
विद्याऽविद्याद्वयं न स्याद्बन्धमोक्षद्वयं तथा ॥

ततः कथमागमादपि तत्सिद्धिः ॥ ततो न पुरुषाद्वैतलक्षणमेकमेव प्रमाणस्य विषयः । इति सुव्यवस्थितः प्रपञ्चः । इति काव्यार्थः ॥ १३ ॥

अथ स्वाभिमतसामान्यविशेषोभयात्मकवाच्यवाचकभावसमर्थनपुरःसरं तीर्थान्तरीयप्रकल्पिततदेकान्तगोचरवाच्यवाचकभावनिरासद्वारेण तेषां प्रतिभावैभवाभावमाह ।

अनेकमेकात्मकमेव वाच्यं
द्वयात्मकं वाचकमप्यवश्यम् ।
अतोन्यथा वाचकवाच्यक्लृप्ता–
वतावकानां प्रतिभाप्रमादः ॥ १४ ॥

वाच्यमभिधेयं चेतनमचेतनं वस्तु । एवकारस्याप्यर्थत्वात् । सामान्यरूपतया एकात्मकमपि व्यक्तिभेदेनानेकम् अनेकरूपम् । अथ वाऽनेकरूपमप्येकात्मकमन्योन्यसंवलितत्वात् इत्थमपि व्याख्याने न दोषः । तथा वाचकमभिधायकं शब्दरूपं तदप्यवश्यं निश्चितं द्वयात्मकम् ।सामान्यविशेषोभयात्मकत्वात्।एकानेकात्मकमित्यर्थः । उभयत्र वाच्यलिङ्गत्वेऽप्यव्यक्तत्वान्नपुंसकत्वम् । अवश्यमितिपदं वाच्यवाचकयोरुभयोरप्येकानेकात्मकत्वं निश्चिन्वत्तदेकान्तं व्यवच्छिनत्ति । अत उपदर्शितप्रकारादन्यथा सामान्यविशेषैकान्तरूपेण प्रकारेण । वाचकवाच्यक्लृप्तौ वाच्यवाचकभावकल्पनायाम् । अतावकानाम् अत्वदीयानाम् अन्ययूथ्यानाम् । प्रतिभाप्रमादः प्रज्ञास्खलितम् । इत्यक्षरार्थः ॥ अत्र चाल्पस्वरत्वेन वाच्यपदस्य प्राग्निपाते प्राप्तेपि यदादौ वाचकग्रहणं तत्प्रायोऽर्थप्रतिपादनस्य शब्दाधीनत्वेन वाचकस्यार्च्यत्वज्ञापनार्थम् । तथा च शाब्दिकाः ।

न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इति ॥

भावार्थस्त्वेवम्।एके तीर्थिकाः सामान्यरूपमेव वाच्यतया अभ्युपग-

च्छन्ति। ते च द्रव्यास्तिकनयानुपातिनो मीमांसकभेदा अद्वैतवादिनः सांख्याश्च। केचिच्च विशेषरूपमेव वाच्यं निर्वचन्ति। ते च पर्यायास्तिकनयानुसारिणः सौगताः। अपरे च परस्परानिरपेक्षपदार्थपृथग्भूतसामान्यविशेषयुक्तं वस्तु वाच्यत्वेन निश्चिन्वते। ते च नैगमनयानुगामिनः काणादा आक्षपादाश्च। एतच्च पक्षत्रयमपि किंचिच्चर्च्यते॥ तथा हि संग्रहनयावलम्बिनो वादिनः प्रतिपादयन्ति। सामान्यमेव तत्त्वम्। ततः पृथग्भूतानां विशेषाणामदर्शनात्। तथा सर्वमेकम्। अविशेषेण सदितिज्ञानाभिधानानुवृत्तिलिङ्गानुमितसत्ताकत्वात्। तथा द्रव्यत्वमेव तत्त्वम्। ततोऽर्थान्तरभूतानां धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामनुपलब्धेः। किं च यैः सामान्यात्पृथग्भूता अन्योन्यव्यावृत्त्यात्मका विशेषाः कल्प्यन्ते तेषु विशेषत्वं विद्यते न वा। नो चेन्निःस्वभावताप्रसङ्गः। स्वरूपस्यैवाभावात्। अस्ति चेत्तर्हि तदेव सामान्यम्। यतः समानानां भावः सामान्यम्। विशेषरूपतया च सर्वेषां तेषामविशेषेण प्रतीतिः सिद्धैव। अपि च विशेषाणां व्यावृत्तिप्रत्ययहेतुत्वं लक्षणम्। व्यावृत्तिप्रत्यय एव विचार्यमाणो न घटते। व्यावृत्तिर्हि विवक्षितपदार्थे इतरपदार्थप्रतिषेधः। विवक्षितपदार्थश्च स्वस्वरूपव्यवस्थापनमात्रपर्यवसायी कथं पदार्थान्तरप्रतिषेधे प्रगल्भते। न च स्वरूपसत्त्वादन्यत्तत्र किमपि येन तन्निषेधः प्रवर्त्तते। तत्र च व्यावृत्तौ क्रियमाणायां स्वात्मव्यतिरिक्तविश्वत्रयवर्तिनोऽतीतवर्तमानानागताः पदार्थास्तस्माद्व्यावर्तनीयाः। ते च नाज्ञातस्वरूपा व्यावर्तयितुं शक्याः। ततश्चैकस्यापि विशेषस्य परिज्ञाने प्रमातुः सर्वज्ञत्वं स्यात्। न चैतत्प्रातीतिकं यौक्तिकं वा। व्यावृत्तिश्च निषेधः। स चाभावरूपत्वात्तुच्छः कथं प्रतीतिगोचरमञ्चति। खपुष्पवत्। तथा येभ्यो व्यावृत्तिस्ते असद्रूपा सद्रूपा वा। असद्रूपाश्चेत्तर्हि खरविषाणात्किं न व्यावृत्तिः। सद्रूपाश्चेत्सामान्यमेव। या चेयं व्यावृत्तिर्विशेषैः

क्रियते सा सर्वासु विशेषव्यक्तिष्वेका अनेका वा। अनेका चेत्तस्या अपि विशेषत्वापत्तिः। अनेकरूपत्वैकजीवितत्वाद्विशेषाणाम्। ततश्च तस्या अपि विशेषत्वान्यथानुपपत्तेर्व्यावृत्त्या भाव्यम्। व्यावृत्तेरपि च व्यावृत्तौ विशेषाणामभाव एव स्यात्। तत्स्वरूपभूताया व्यावृत्तेः प्रतिषिद्धत्वात्। अनवस्थापाताच्च। एका चेत्सामान्यमेव संज्ञान्तरेण प्रतिपन्नं स्यात्। अनुवृत्तिप्रत्ययलक्षणाव्यभिचारात्। किं चामी विशेषाः सामान्याद्भिन्ना अभिन्ना वा। भिन्नाश्चेन्मण्डूकजटाभारानुकाराः। अभिन्नार्थाऽचेत्तदेव तत्स्वरूपवत्। इति सामान्यैकान्तवादः॥ पर्यायनयान्वयिनस्तु भाषन्ते। विविक्ताः क्षणक्षयिणो विशेषा एव परमार्थः। ततो विष्वग्भूतस्य सामान्यस्याप्रतीयमानत्वात्। न हि गवादिव्यक्त्यनुभवकाले वर्णसंस्थानात्मकव्यक्तिरूपमपहायान्यत्किंचिदेकमनुयायि प्रतिभासते। तादृशस्यानुभवाभावात्। तथा च पठन्ति।

एतासु पञ्चस्ववभासिनीषु प्रत्यक्षबोधे स्फुटमङ्गुलीषु।
साधारणं रूपमवेक्षते यः शृङ्गं शिरस्यात्मन ईक्षते सः॥

एकाकारपरामर्शप्रत्ययस्तु स्वहेतुदत्तशक्तिभ्य एवोत्पद्यत इति न तेन सामान्यसाधनं न्याय्यम्। किं च यदिदं सामान्यं परिकल्प्यते तदेकमनेकं वा। एकमपि सर्वगतमसर्वगतं वा। सर्वगतं चेत्किं न व्यक्त्यन्तरालेषूपलभ्यते। सर्वगतैकत्वाभ्युपगमे च तस्य यथा गोत्वं सामान्यं गोव्यक्तीः क्रोडीकरोति एवं किं न घटपटादिव्यक्तीरपि। अविशेषात्। असर्वगतं चेद्विशेषरूपापत्तिरभ्युपगमबाधश्च। अथानेकम् गोत्वाश्वत्वघटत्वपटत्वादिभेदभिन्नत्वात् तर्हि विशेषा एव स्वीकृताः। अन्योन्यव्यावृत्तिहेतुत्वात्। न हि यद्गोत्वं तदश्वत्वात्मकमिति। अर्थक्रियाकारित्वं च वस्तुनो लक्षणम्। तच्च विशेषेष्वेव

स्फुटं प्रतीयते । न हि सामान्येन काचिदर्थक्रिया क्रियते । तस्य निष्क्रियत्वात्।वाहदोहादिकास्वर्थक्रियासु विशेषाणामेवोपयोगात्। तथेदं सामान्यं विशेषेभ्यो भिन्नमभिन्नं वा। भिन्नं चेदवस्तु। विशेषविश्लेषेणार्थक्रियाकारित्वाभावात् । अभिन्नं चेद्विशेषा एव तत्स्वरूपवत् । इति विशेषैकान्तवादः॥ नैगमनयानुगामिनस्त्वाहुः। स्वतन्त्रौ सामान्यविशेषौ। तथैव प्रमाणेन प्रतीतत्वात् । तथा हि सामान्यविशेषावत्यन्तं भिन्नौ । विरुद्धधर्माध्यासितत्वात् । यावेवं तावेवं यथा पाथःपावकौ । तथा चैतौ । तस्मात्तथा । सामान्यं हि गोत्वादि सर्वगतं तद्विपरीताश्च शबलशाबलेयादयो विशेषाः । ततः कथमेषामैक्यं युक्तम् । न सामान्यात्पृथग्विशेषस्योपलम्भ इति चेत् कथं तर्हि तस्योपलम्भ इति वाच्यम् । सामान्यव्याप्तस्येति चेत् न तर्हि स विशेषोपलम्भः। सामान्यस्यापि तेन ग्रहणात् । ततश्च तेन बोधेन विविक्तविशेषग्रहणाभावात् तद्वाचकं ध्वनिं तत्साध्यं च व्यवहारं न प्रवर्तयेत्प्रमाता । न चैतदस्ति । विशेषाभिधानव्यवहारयोः प्रवृत्तिदर्शनात् । तस्माद्विशेषमभिलषता तत्र च व्यवहारं प्रवर्त्तयता तद्ग्राहको बोधो विविक्तोऽभ्युपगन्तव्यः । एवं सामान्यस्थाने विशेषशब्दं विशेषस्थाने च सामान्यशब्दं प्रयुञ्जानेन सामान्येपि तद्ग्राहके बोधो विविक्तोऽङ्गीकर्तव्यः । तस्मात्स्वस्वग्राहिणि ज्ञाने पृथक्प्रतिभासमानत्वाद्द्वावपीतरेतरविशकलितौ । ततो न सामान्यविशेषात्मकत्वं वस्तुतो घटते । इति स्वतन्त्रसामान्यविशेषवादः ॥

तदेतत्पक्षत्रयमपि न क्षमते क्षोदम्।प्रमाणबाधितत्वात् ।सामान्यविशेषोभयात्मकस्यैव वस्तुनो निर्विगानमनुभूयमानत्वात् । वस्तुनो हि लक्षणमर्थक्रियाकारित्वम्। तच्चानेकान्तवाद एवाविकलं कलयन्ति परीक्षकाः। तथा हि यथा गौरित्युक्ते खुरककुत्सास्नालाङ्गूलविषाणाद्यवयवसंपन्नं वस्तुस्वरूपं सर्वव्यक्त्यनुयायि प्रतीयते तथा महि-

ष्यादिव्यावृत्तिरपि प्रतीयते। यत्रापि च शबला गौरित्युच्यते तत्रापि यथा विशेषप्रतिभासस्तथा गोत्वप्रतिभासोपि स्फुट एव। शबलेति-केवलविशेषणोच्चारणेपि अर्थात्प्रकरणाद्वा गोत्वमनुवर्त्तते । अपि च शबलत्वमपि नानारूपम्। तथा दर्शनात्। ततो वक्त्रा शबलेत्युक्ते क्रोडीकृतसकलशबलसामान्यं विवक्षितगोव्यक्तिगतमेव शबलत्वं व्यवस्थाप्यते । तदेवमाबालगोपालं प्रतीतिप्रसिद्धेपि वस्तुनः सामान्यविशेषात्मकत्वे तदुभयैकान्तवादः प्रलापमात्रम् । न हि क्वचित्कदाचित्केनचित्सामान्यं विशेषविनाकृतमनुभूयते विशेषा वा तद्विनाकृताः। केवलं दुर्नयप्रभावितमतिव्यामोहवशादेकमपलप्याऽन्यतरव्यवस्थापयन्ति बालिशाः। सोयमन्धगजन्यायः ॥ येपि च तदेकान्तपक्षोपनिपातिनः प्रागुक्ता दोषास्तेपि अनेकान्तवादप्रचण्डमुद्गरजर्जरितत्वान्नोच्छ्वसितुमपि क्षमाः ॥ स्वतन्त्रसामान्यविशेषवादिनस्त्वेवं प्रतिक्षेप्याः। सामान्यं प्रतिव्यक्ति कथंचिद्भिन्नम् । कथंचिदभिन्नम् । कथंचित्तदात्मकत्वात्। विसदृशपरिणामवत्। यथैव हि काचिद्व्यक्तिरुपलभ्यमानाद्व्यक्त्यन्तराद्विशिष्टा विसदृशपरिणामदर्शनादवतिष्ठते तथा सदृशपरिणामात्मकसामान्यदर्शनात्समानेति। तेन समानो गौरयम्। सोऽनेन समान इति प्रतीतेः। न चास्य व्यक्तिस्वरूपादभिन्नत्वात्सामान्यरूपताव्याघातः। यतो रूपादीनामपि व्यक्तिस्वरूपादभिन्नत्वमस्ति न चैतेषां गुणरूपताव्याघातः। कथंचिद्व्यतिरेकस्तु रूपादीनामिव सदृशपरिणामस्याप्यस्त्येव। पृथग्व्यपदेशादिभाक्त्वात्। विशेषा अपि नैकान्तेन सामान्यात्पृथग्भवितुमर्हन्ति। यतो यदि सामान्यं सर्वगतं सिद्धं भवेत् तदा तेषामसर्वगतत्वेन ततो विरुद्धधर्माध्यासः स्यात्। न च तस्य तत्सिद्धम्। प्रागुक्तयुक्त्या निराकृतत्वात्। सामान्यस्य विशेषाणां च कथंचित्परस्पराव्यतिरेकेणैकानेकरूपतया व्यवस्थितत्वात्। विशेषेभ्योऽव्यतिरिक्तत्वाद्धि सामान्यमप्य-

नेकमिष्यते सामान्यात्तु विशेषाणामव्यतिरेकात्तेप्येकरूपा इति ॥ एकत्वं च सामान्यस्य संग्रहनयार्पणात्सर्वत्र विज्ञेयम् । प्रमाणार्पणात्तस्य कथंचिद्विरुद्धधर्माध्यासितत्वम् । सदृशपरिणामरूपस्य विसदृशपरिणामवत् कथंचित्प्रतिव्यक्ति भेदात् । एवं चासिद्धं सामान्यविशेषयोः सर्वथाविरुद्धधर्माध्यासितत्वम् । कथंचिद्विरुद्धधर्माध्यासितत्वं चेद्विवक्षितं तदास्मत्कक्षाप्रवेशः। कथंचिद्विरुद्धधर्माध्यासस्य कथंचिद्भेदाविनाभूतत्वात्। पाथःपावकदृष्टान्तोपि साध्यसाधनविकलः । तयोरपि कथंचिदेव विरुद्धधर्माध्यासितत्वेन भिन्नत्वेन च स्वीकरणात्। पयस्त्वपावकत्वादिना हि तयोर्विरुद्धधर्माध्यासो भेदश्च। द्रव्यत्वादिना पुनस्तद्वैपरीत्यमिति। तथा च कथं न सामान्यविशेषात्मकत्वं वस्तुनो घटत इति ॥ ततः सुष्ठूक्तं वाच्यमेकमनेकरूपमिति ॥

एवं वाचकमपि शब्दाख्यं द्वयात्मकम् सामान्यविशेषात्मकम्। सर्वशब्दव्यक्तिष्वनुयायि शब्दत्वमेकं शाङ्खशार्ङ्गतीव्रमन्दोदात्तानुदात्तस्वरितादिविशेषभेदादनेकम् । शब्दस्य हि सामान्यविशेषात्मकत्वं पौद्गलिकत्वाद्व्यक्तमेव । तथाहि पौद्गलिकः शब्दः । इन्द्रियार्थत्वात् रूपादिवत्। यच्चास्य पौद्गलिकत्वनिषेधाय स्पर्शशून्याश्रयत्वात् अतिनिबिडप्रदेशे प्रवेशनिर्गमयोरप्रतिघातात् पूर्वं पश्चाच्चावयवानुपलब्धेः सूक्ष्ममूर्तद्रव्यान्तराप्रेरकत्वात् गगनगुणत्वाच्चेति पञ्चहेतवो यौगैरुपन्यस्तास्ते हेत्वाभासाः। तथा हि शब्दपर्यायस्याश्रयो भाषावर्गणा न पुनराकाशम्।तत्र च स्पर्शो निर्णीयत एव । यथा शब्दाश्रयः स्पर्शवान् ।अनुवातप्रतिवातयोर्विप्रकृष्टनिकटशरीरिणोपलभ्यमानानुपलभ्यमानेन्द्रियार्थत्वात् । तथाविधगन्धाधारद्रव्यपरमाणुवत्। इत्यसिद्धः प्रथमः । द्वितीयस्तु गन्धद्रव्येण व्यभिचारादनैकान्तिकः। वर्त्यमानजात्यकस्तूरिकादिगन्धद्रव्यं हि पिहितद्वारापवरकस्यान्तर्विशति बहिश्च निर्याति न चापौद्गलिकम्।अथ तत्र सूक्ष्मरन्ध्र-

संभवान्नातिनिबिडत्वमतस्तत्र तत्प्रवेशनिष्क्रमौ । कथमन्यथोद्घाटितद्वारावस्थायामिव न तदेकार्णवत्वम् । सर्वथा नीरन्ध्रे तु प्रदेशे न तयोः संभव इति चेत् तर्हि शब्देऽप्येतत्समानमित्यसिद्धो हेतुः । तृतीयस्तु तडिल्लतोल्कादिभिरनैकान्तिकः । चतुर्थोऽपि तथैव । गन्धद्रव्यविशेषसूक्ष्मरजोधूमादिभिर्व्यभिचारात् । न हि गन्धद्रव्यादिकमपि नासायां निविशमानं तद्विवरद्वारदेशोद्भिन्नश्मश्रुप्रेरकं दृश्यते । पञ्चमः पुनरसिद्धः । तथाहि न गगनगुणः शब्दः । अस्मदादिप्रत्यक्षत्वात् । रूपादिवत् । इति सिद्धः पौद्गलिकत्वात्सामान्यविशेषात्मकः शब्द इति ॥ न च वाच्यम् आत्मन्यपौद्गलिकेऽपि कथं सामान्यविशेषात्मकत्वं निर्विवादमनुभूयत इति । यतः संसार्यात्मनः प्रतिप्रदेशमनन्तानन्तकर्मपरमाणुभिः सह वह्नितापितघनकुट्टितनिर्विभागपिण्डीभूतसूचीकलापवत् लोलीभावमापन्नस्य कथंचित्पौद्गलिकत्वाभ्यनुज्ञानादिति । यद्यपि स्याद्वादवादिनां पौद्गलिकमपौद्गलिकं च सर्वं वस्तु सामान्यविशेषात्मकं तथाप्यपौद्गलिकेषु धर्माधर्माकाशकालेषु तदात्मकत्वमर्वाग्दृशां न तथाप्रतीतिविषयमायातीति पौद्गलिकेषु पुनस्तत्साध्यमानं तेषां सुश्रद्धानमित्यप्रस्तुतमपि शब्दस्य पौद्गलिकत्वमत्र सामान्यविशेषात्मकत्वसाधनायोपन्यस्तमिति । अत्रापि नित्यशब्दवादिसंमतः शब्दैकत्वैकान्तोऽनित्यशब्दवाद्यभिमतः शब्दानेकत्वैकान्तश्च प्राग्दर्शितदिशा प्रतिक्षेप्यः । अथवा वाच्यस्य घटादेरर्थस्य सामान्यविशेषात्मकत्वे तद्वाचकस्य ध्वनेरपि तत्त्वम् । शब्दार्थयोः कथंचित्तादात्म्याभ्युपगमात् । यदाहुर्भद्रबाहुस्वामिपादाः ।

अभिहाणं अभिहेयाउ होइ भिण्णं अभिण्णं च ।
खुरअग्गिमोयगुच्चारणम्मि जम्हा उ वयणसवणाणं ॥
नवि छेओ नवि दाहो न पूरणं तेण भिन्नं तु ।

जम्हा य मोयगुच्चारणम्मि तत्थेव पच्चओ होइ ॥
न य होइ स अन्नत्थे तेण अभिन्नं तदत्थाओ ।

एतेन

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि ॥

इति प्रत्युक्तम् । अर्थाभिधानप्रत्ययास्तुल्यनामधेया इति वचनात् । शब्दस्य ह्येतदेव तत्त्वं यदभिधेयं याथात्म्येनासौ प्रतिपादयति । स च तत्तथाप्रतिपादयन् वाच्यस्वरूपपरिणामपरिणत एव वक्तुं शक्तो नान्यथा । अतिप्रसङ्गात् । घटाभिधानकाले पटाद्यभिधानस्य प्राप्तेरिति ॥

अथवा भङ्ग्यन्तरेण सकलं काव्यमिदं व्याख्यायते । वाच्यं वस्तु घटादिकम् । एकात्मकमेव एकरूपमेव सत् अनेकम् अनेकस्वरूपम् । अयमर्थः । प्रमाता तावत्प्रमेयं लक्षणेन निश्चिनोति । तच्च सजातीयविजातीयव्यवच्छेदादात्मलाभं लभते । यथा घटस्य सजातीया मृन्मयपदार्था विजातीयाश्च पटादयः । तेषां व्यवच्छेदस्तल्लक्षणम् । पृथुबुध्नोदराद्याकारः कम्बुग्रीवो जलधारणादिक्रियासमर्थः पदार्थविशेषो घट इत्युच्यते । तेषां च सजातीयानां स्वरूपं तत्र बुद्ध्यारोप्य व्यवच्छिद्यते । अन्यथा प्रतिनियततत्स्वरूपपरिच्छेदानुपपत्तेः । सर्वभावानां हि भावाभावात्मकं स्वरूपम् । एकान्तभावात्मकत्वे वस्तुनो वैस्वरूप्यं स्यात् । एकान्ताभावात्मकत्वे च निःस्वभावता स्यात् । तस्मात्स्वरूपेण सत्त्वात्पररूपेण चासत्त्वाद्भावाभावात्मकं वस्तु । यदाह ।

सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्त्वं स्यात्स्वरूपस्याप्यसंभवः ॥

ततश्चैकस्मिन् घटे सर्वेषां घटव्यतिरिक्तपदार्थानामभावरूपेण वृत्तेर-

नेकात्मकत्वं घटस्य सूपपादम् । एवं चैकस्मिन्नर्थे ज्ञाते सर्वेषामर्थानां ज्ञानम् । सर्वपदार्थपरिच्छेदमन्तरेण तन्निषेधात्मन एकस्य वस्तुनो विविक्ततया परिच्छेदासंभवात् । आगमोऽप्येवमेव व्यवस्थितः ।

जे एगं जाणइ से सव्वं जाणइ । जे सव्वं जाणइ से एगं जाणइ ।

तथा

एको भावः सर्वथा येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा एको भावः सर्वथा तेन दृष्टः ॥

ये तु सौगताः परासत्त्वं नाङ्गीकुर्वते तेषां घटादेः सर्वात्मकत्वप्रसङ्गः । तथा हि यथा घटस्य स्वरूपादिनापि सत्त्वं तथा यदि पररूपादिनापि स्यात् तथा च सति स्वरूपादिसत्त्ववत्पररूपादिसत्त्वप्रसक्तेः कथं न सर्वात्मकत्वं भवेत् । परासत्त्वेन तु प्रतिनियतोऽसौ सिध्यति । अथ न नाम नास्ति परासत्त्वं किं तु स्वसत्त्वमेव तदिति चेत् अहो वैदग्धी । न खलु यदेव सत्त्वं तदेवासत्त्वं भवितुमर्हति । विधिप्रतिषेधरूपतया विरुद्धधर्माध्यासेनानयोरैक्यायोगात् । अथ युष्मत्पक्षेऽप्येवं विरोधस्तदवस्थ एवेति चेत् अहो वाचाटता देवानांप्रियस्य । न हि वयं येनैव प्रकारेण सत्त्वं तेनैवासत्त्वं येनैवासत्त्वं तेनैव सत्त्वमभ्युपेमः किं तु स्वरूपद्रव्यक्षेत्रकालभावैः सत्त्वं पररूपद्रव्यक्षेत्रकालभावैस्त्वसत्त्वम् तदा क्व विरोधावकाशः ॥ यौगास्तु प्रगल्भन्ते सर्वथापृथग्भूतपरस्पराभावाभ्युपगममात्रेणैव पदार्थप्रतिनियमसिद्धेः किं तेषामसत्त्वात्मकत्वकल्पनयेति । तदसत् । यदा हि पटाद्यभावरूपो घटो न भवति तदा घटो घटादिरेव स्यात् यथा च घटाभावाद्भिन्नत्वाद् घटस्य घटरूपता तथा पटादेरपि स्याद् । घटाभावाद्भिन्नत्वादेव । इत्यलं विस्तरेण ॥ एवं वाचकमपि शब्दरूपं द्व्यात्मकम् । एकात्मकमपि सदनेकमित्यर्थः । यथोक्तन्यायेन शब्दस्यापि भावाभावात्मकत्वात् । अथ वा एकविषयस्यापि वाचक-

स्यानेकविषयत्वोपपत्तेः । यथा किल घटशब्दः संकेतवशात्पृथुबुध्नोदराद्याकारवति पदार्थे प्रवर्तते वाचकतया तथा देशकालाद्यपेक्षया तद्वशादेव पदार्थान्तरेष्वपि च तथा प्रवर्तमानः केन वार्यते । भवन्ति हि वक्तारो योगिनः शरीरं प्रति घट इति । संकेतानां पुरुषेच्छाधीनतयाऽनियतत्वात् । तथा चौरशब्दोन्यत्र तस्करे रूढोपि दाक्षिणात्यानामोदने प्रसिद्धः । यथा च कुमारशब्दः पूर्वदेशे आश्विनमासे रूढः । एवं कर्कटीशब्दादयोपि तत्तद्देशापेक्षया योन्यादिवाचका ज्ञेयाः । कालापेक्षया पुनर्यथा जैनानां प्रायश्चित्तविधौ धृतिश्रद्धासंहननादिमति प्राचीनकाले षड्गुरुशब्देन शतमशीत्यधिकमुपवासानामुच्यते स्म सांप्रतकाले तु तद्विपरीते तेनैव षड्गुरुशब्देनोपवासत्रयमेव संकेत्यते जीतकल्पव्यवहारानुसारात् । शास्त्रापेक्षया तु यथा पुराणेषु द्वादशीशब्देनैकादशी त्रिपुरार्णवे चालिशब्देन मदिराभिषक्तं मैथुनशब्देन मधुसर्पिषोर्ग्रहणमित्यादि । न चैवं सङ्केतस्यैवार्थप्रत्यायने प्राधान्यम् । स्वाभाविकसामर्थ्यसाचिव्यादेव तस्य तत्र प्रवृत्तेः । सर्वशब्दानां सर्वार्थप्रत्यायनशक्तियुक्तत्वाद्यत्र च देशकालादौ पदार्थप्रतिपादनशक्तिसहकारी सङ्केतस्तत्र तमर्थं प्रतिपादयति । तथा च निर्जितदुर्जयपरप्रवादाः श्रीदेवसूरिपादाः । स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः । अत्र शक्तिपदार्थसमर्थनं ग्रन्थान्तरादवसेयम् ॥ अतोऽन्यथेत्यादि उत्तरार्द्धं पूर्ववत् । प्रतिभाप्रमादस्तु तेषां सदसदेकान्ते वाच्यस्य प्रतिनियतार्थविषयत्वे च वाचकस्योक्तयुक्त्या दोषसद्भावाद् व्यवहारानुपपत्तेः ॥ तदयं समुदायार्थः । सामान्यविशेषात्मकस्य भावाभावात्मकस्य च वस्तुनः सामान्यविशेषात्मको भावाभावात्मकश्च ध्वनिर्वाचक इति । अन्यथा प्रकारान्तरैः पुनर्वाच्यवाचकभावव्यवस्थामातिष्ठमानानां प्रतिभैव प्रमाद्यति न

तु तद्भणितयो युक्तिस्पर्शमात्रमपि सहन्ते । कानि तानि वाच्यवाचकभावप्रकारान्तराणि परवादिनामिति चेदेते ब्रूमः । अपोह एव शब्दार्थ इत्येके ।

अपोहः शब्दलिङ्गाभ्यां न वस्तुविधिनोच्यते ॥

इति वचनात् । अपरे च सामान्यमात्रमेव शब्दानां गोचरः । तस्य क्वचित्प्रतिपन्नस्यैकरूपतया सर्वत्र संकेतविषयतोपपत्तेः । न पुनर्विशेषाः। तेषामानन्त्यतः कार्त्स्न्येनोपलब्धुमशक्यतया तद्विषयतानुपपत्तेः । विधिवादिनस्तु विधिरेव वाक्यार्थोऽप्रवृत्तप्रवर्तनस्वभावत्वात्तस्येत्याचक्षते । विधिरपि तत्तद्वादिविप्रतिपत्त्याऽनेकप्रकारः । तथाहि वाक्यरूपः शब्द एव प्रवर्तकत्वाद्विधिरित्येके । तद्व्यापारो भावनापरपर्यायो विधिरित्यन्ये । नियोग इत्यपरे । प्रैषादय इत्येके । तिरस्कृततदुपाधिप्रवर्तनामात्रमित्यन्ये। एवं फलतदभिलाषकर्मादयोपि वाच्याः। एतेषां निराकरणं सपूर्वोत्तरपक्षं न्यायकुमुदचन्द्रादवसेयमिति काव्यार्थः ॥ १४ ॥

इदानीं सांख्याभिमतप्रकृतिपुरुषादितत्त्वानां विरोधावरुद्धत्वं ख्यापयन् तद्बालिशताविलसितानामपरिमितत्वं दर्शयति ।

चिदर्थशून्या च जडा च बुद्धिः
शब्दादितन्मात्रजमम्बरादि ।
न बन्धमोक्षौ पुरुषस्य चेति
कियज्जडैर्न ग्रथितं विरोधि ॥ १५ ॥

चित् चैतन्यशक्तिरात्मस्वरूपभूता अर्थशून्या विषयपरिच्छेदविरहिता अर्थाध्यवसायस्य बुद्धिव्यापारत्वादित्येका कल्पना । बुद्धिश्च महत्तत्त्वाख्या जडानवबोधरूपा इति द्वितीया । अम्बरादि व्योमप्रभृति भूतपञ्चकं शब्दादितन्मात्रजम् शब्दादीनि पञ्चतन्मा-

त्राणि सूक्ष्मसंज्ञानि तेभ्यो जातमुत्पन्नं शब्दादितन्मात्रजम् इति तृतीया। अत्र चशब्दो गम्यः। पुरुषस्य च प्रकृतिविकृत्यनात्मकस्यात्मनो न बन्धमोक्षौ किं तु प्रकृतेरेव। तथा च कापिलाः।

तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥

तत्र बन्धः प्राकृतिकादिः। मोक्षः पञ्चविंशतितत्त्वज्ञानपूर्वकोऽपवर्ग इति चतुर्थी। इतिशब्दस्य प्रकारार्थत्वादेवंप्रकारमन्यदपि। विरोधीति विरुद्धं पूर्वापरविरोधादिदोषाघ्रातम्। जडैर्मूर्खैस्तत्त्वावबोधविधुरधीभिः कापिलैः कियन्न ग्रथितं कियन्न स्वशास्त्रेषूपनिबद्धम्। कियदित्यसूयागर्भम्। तत्प्ररूपितविरुद्धार्थानामानन्त्येनेयत्ताऽनवधारणात्। इति संक्षेपार्थः॥

व्यासार्थस्त्वयम्। सांख्यमते किल दुःखत्रयाभिहतस्य पुरुषस्य तदपघातहेतुतत्त्वजिज्ञासा उत्पद्यते। आध्यात्मिकमाधिदैविकमाधिभौतिकं चेति दुःखत्रयम्। तत्राध्यात्मिकं द्विविधं शारीरं मानसं च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहेर्ष्याविषयादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यं दुःखं द्वेधा आधिभौतिकमाधिदैविकंचेति। तत्राधिभौतिकं मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसग्रहाद्यावेशहेतुकम्। अनेन दुःखत्रयेण रजःपरिणामभेदेन बुद्धिवर्तिना चेतनाशक्तेः प्रतिकूलतयाऽभिसंबन्धः अभिघातः। तत्त्वानि च पञ्चविंशतिः। तद्यथा अव्यक्तमेकं महदहंकारपञ्चतन्मात्रैकादशेन्द्रियपञ्चमहाभूतभेदात् त्रयोविंशतिविधं व्यक्तं पुरुषश्चिद्रूप इति। तथा चेश्वरकृष्णः।

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥

प्रीत्यप्रीतिविषादात्मकानां लाघवोपष्टम्भगौरवधर्माणां परस्परोपकारिणां त्रयाणां गुणानां सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः । प्रधानमव्यक्तमित्यनर्थान्तरम् । तच्चानादिमध्यान्तमनवयवं साधारणमशब्दमस्पर्शमरूपमरसमगन्धमव्ययम् । प्रधानाद्बुद्धिर्महदित्यपरपर्यायोत्पद्यते । योऽयमध्यवसायो गवादिषु प्रतिपत्तिः एवमेतत् नान्यथा गौरेवायं नाश्वः स्थाणुरेष नायं पुरुष इत्येषा बुद्धिः । तस्यास्त्वष्टौ रूपाणि धर्मज्ञानवैराग्यैश्वर्यरूपाणि चत्वारि सात्त्विकानि अधर्मादीनि तु तत्प्रतिपक्षभूतानि चत्वारि तामसानि । बुद्धेरहंकारः । स चाभिमानात्मकः । अहं शब्देऽहं स्पर्शेऽहं रूपेऽहं गन्धेऽहं रसेऽहं स्वामी अहमीश्वरः असौ मया हतः ससत्त्वोहममुं हनिष्यामि इत्यादिप्रत्ययरूपः । तस्मात्पञ्चतन्मात्राणि शब्दतन्मात्रादीन्यविशेषरूपाणि सूक्ष्मपर्यायवाच्यानि । शब्दतन्मात्राद्धि शब्द एवोपलभ्यते न पुनरुदात्तानुदात्तस्वरितकम्पितषड्जादिभेदाः । षड्जादयः शब्दविशेषादुपलभ्यन्ते । एवं स्पर्शरूपरसगन्धतन्मात्रेष्वपि योजनीयमिति । तत एव चाहङ्कारादेकादशेन्द्रियाणि च । तत्र चक्षुः श्रोत्रं घ्राणं रसनं त्वगिति पञ्चबुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थाः पञ्च कर्मेन्द्रियाणि एकादशं मन इति । पञ्चतन्मात्रेभ्यश्च पञ्चमहाभूतानि उत्पद्यन्ते । तद्यथा शब्दतन्मात्रादाकाशं शब्दगुणं शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहिताद्गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथ्वी जायत इति । पुरुषस्तु––

अमूर्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः ।
अकर्ता निर्गुणः सूक्ष्म आत्मा कापिलदर्शने ॥

इति । अन्धपङ्गुवत् प्रकृतिपुरुषयोः संयोगः । चिच्छक्तिश्च विषयपरिच्छेदशून्या । यत इन्द्रियद्वारेण सुखदुःखादयो विषया बुद्धौ प्रतिसंक्रामन्ति बुद्धिश्चोभयमुखदर्पणाकारा ततस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते । ततः सुख्यहं दुःख्यहम् इत्युपचारः । आत्मा हि स्वं बुद्धेरव्यतिरिक्तमभिमन्यते । आह च पतञ्जलिः । शुद्धोपि पुरुषः प्रत्ययं बौद्धमनुपश्यति तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासते इति । मुख्यतस्तु बुद्धेरेव विषयपरिच्छेदः । तथा च वाचस्पतिः । सर्वो व्यवहर्ता आलोच्य नन्वहमत्राधिकृत इत्यभिमत्य कर्तव्यमेतन्मयेति अध्यवस्यति ततश्च प्रवर्त्तत इति लोकतः सिद्धम् । तत्र कर्तव्यमिति योयं निश्चयश्चितिसन्निधानापन्नचैतन्याया बुद्धेः सोऽध्यवसायो बुद्धेरसाधारणो व्यापार इति । चिच्छक्तिसन्निधानाच्चाचेतनापि बुद्धिश्चेतनावतीवाभासते । वादमहार्णवोप्याह । बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति तदेव भोक्तृत्वमस्य नत्वात्मनो विकारापत्तिः इति । तथा चासुरिः ।

विविक्ते दृक्परिणतौ बुद्धौ भोगोस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोम्भसि ॥

विन्ध्यवासी त्वेवं भोगमाचष्टे ।

पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम् ।
मनः करोति सांनिध्यादुपाधिः स्फटिकं यथा ॥

न च वक्तव्यं पुरुषश्चेदगुणोऽपरिणामी कथमस्य मोक्षः । मुचेर्बन्धनविश्लेषार्थत्वात्सवासनक्लेशकर्माशयानां च बन्धनसमाम्नातानां पुरुषेऽपरिणामिन्यसंभवात् । अत एव नास्य प्रेत्यभावापरनामा संसारोस्ति निष्क्रियत्वादिति । यतः प्रकृतिरेव नानापुरुषाश्रया सती बध्यते संसरति मुच्यते च न पुरुष इति बन्ध-

मोक्षसंसाराः पुरुषे उपचर्यन्ते । यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तत्फलस्य कोशलाभादेः स्वामिनि संबन्धात् तथा भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषे संबन्ध इति ॥

तदेतदखिलमालजालम् । चिच्छक्तिश्च विषयपरिच्छेदशून्या चेति परस्परविरुद्धं वचः । चिती संज्ञाने । चेतनं चित्यते वानयेति चित् । सा चेत्स्वपरपरिच्छेदात्मिका नेष्यते तदा चिच्छक्तिरेव सा न स्याद् । घटवत् । न चामूर्तायाश्चिच्छक्तेर्बुद्धौ प्रतिबिम्बोदयो युक्तः। तस्य मूर्तधर्मत्वात्। न च तथा परिणाममन्तरेण प्रतिसंक्रमोपि युक्तः । कथंचित्सक्रियाकताव्यतिरेकेण प्रकृत्युपधानेप्यन्यथात्वानुपपत्तेः । अप्रच्युतप्राचीनरूपस्य च सुखदुःखादिभोगव्यपदेशानर्हत्वात्। तत्प्रच्यवे च प्राक्तनरूपत्यागेनोत्तररूपाध्यासिततया सक्रियत्वापत्तिः । स्फटिकादावपि तथा परिणामेनैव प्रतिबिम्बोदयसमर्थनात् । अन्यथा कथमन्धोपलादौ न प्रतिबिम्बः। तथा परिणामाभ्युपगमे च बलादायातं चिच्छक्तेः कर्तृत्वं साक्षाद्भोक्तृत्वं च । अथ अपरिणामिनी भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुभवतीति पतञ्जलिवचनादौपचारिक एवायं प्रतिसंक्रम इति चेत् तर्हि उपचारस्तत्त्वचिन्तायामनुपयोगीति प्रेक्षावतामनुपादेय एवायम् । तथा च प्रतिप्राणिप्रतीतं सुखदुःखादिसंवेदनं निराश्रयमेव स्यात्। न चेदं बुद्धेरुपपन्नम्। तस्या जडत्वेनाभ्युपगमात्। अत एव जडा च बुद्धिरित्यपि विरुद्धम्। न हि जडस्वरूपायां बुद्धौ विषयाध्यवसायः साध्यमानः साधीयस्तां दधाति। ननूक्तमचेतनापि बुद्धिश्चिच्छक्तिसांनिध्याच्चेतनावतीवावभासत इति। सत्यमुक्तमयुक्तं तूक्तम्। न हि चैतन्यवति पुरुषादौ प्रतिसंक्रान्ते दर्पणस्य चैतन्यापत्तिश्चैतन्याचैतन्ययोरपरावर्तिस्वभाव-

त्वेन शक्रेणाप्यन्यथाकर्तुमशक्यत्वात् । किं चाचेतनापि चेतनावतीव प्रतिभासत इति इवशब्देनारोपो ध्वन्यते । न चारोपोर्थक्रियासमर्थः । न खल्वतिकोपनत्वादिना समारोपिताग्नित्वो माणवकः कदाचिदपि मुख्याग्निसाध्यां दाहपाकाद्यर्थक्रियां कर्तुमीश्वरः। इति चिच्छक्तेरेव विषयाध्यवसायो घटते न जडरूपाया बुद्धेरिति ॥ अत एव धर्माद्यष्टरूपताद्यपि तस्या वाङ्मात्रमेव। धर्मादीनामात्मधर्मत्वात् । अत एव चाहंकारोपि न बुद्धिजन्यो युज्यते । तस्याभिमानात्मकत्वेनात्मधर्मस्याचेतनादुत्पादायोगात् ॥ अम्बरादीनां च शब्दादितन्मात्रजत्वं प्रतीतिपराहतत्वेनैव विहितोत्तरम् । अपि च सर्ववादिभिस्तावदविगानेन गगनस्य नित्यत्वमङ्गीक्रियते। अयं च शब्दतन्मात्रात्तस्याविर्भावमुद्भावयन्नित्यैकान्तवादिनां च धुरि आसनं न्यासयन्नसंगतप्रलापीव प्रतिभाति ।न च परिणामिकारणं स्वकार्यस्य गुणो भवितुमर्हतीति शब्दगुणमाकाशमित्यादि वाङ्मात्रम् ॥ वागादीनां चेन्द्रियत्वमेव न युज्यते ।इतरासाध्यकार्यकारित्वाभावात् । परप्रतिपादनग्रहणविहरणमलोत्सर्गादिकार्याणामितरावयवैरपि साध्यत्वोपलब्धेः। तथापि तत्त्वकल्पन इन्द्रियसंख्या न व्यवतिष्ठते। अन्याङ्गोपाङ्गादीनामपीन्द्रियत्वप्रसङ्गात् ॥ यच्चोक्तं नानाश्रयायाः प्रकृतेरेव बन्धमोक्षौ संसारश्च न पुरुषस्येति तदप्यसारम् । अनादिभवपरंपरानुबद्धया प्रकृत्या सह यः पुरुषस्य विवेकाग्रहणलक्षणोऽविष्वग्भावः स एव चेन्न बन्धस्तदा को नामान्यो बन्धः स्यात् । प्रकृतिः सर्वोत्पत्तिमतां निमित्तमिति च प्रतिपद्यमानेनायुष्मता संज्ञान्तरेण कर्मैव प्रतिपन्नम् ।तस्यैवैवंस्वरूपत्वात् अचेतनत्वाच्च ॥ यस्तु प्राकृतिकवैकारिकदाक्षिणभेदात्त्रिविधो बन्धः । तद्यथा प्रकृतावात्मज्ञानाद्ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः।ये विकारानेव भूतेन्द्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तेषां वैकारिकः। इष्टा-

पूर्त्तैर्दाक्षिणः । पुरुषतत्त्वानभिज्ञो हीष्टापूर्तिकारी कामोपहतमना बध्यत इति ।

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो येभिनन्दन्ति मूढाः ।
नाकस्य पृष्ठे ते सुकृतेन भूत्वा इमं लोकं हीनतरं वा विशन्ति ॥

इति वचनात् । स त्रिविधोपि कल्पनामात्रम् । कथंचिन्मिथ्यादर्शनाविरतिप्रमादकषाययोगेभ्योऽभिन्नस्वरूपत्वेन कर्मबन्धहेतुष्वेवान्तर्भावात् । बन्धसिद्धौ च सिद्धस्तस्यैव निर्बाधः संसारः । बन्धमोक्षयोश्चैकाधिकरणत्वाद्य एव बद्धः स एव मुच्यत इति पुरुषस्यैव मोक्षः । आबालगोपालं तथाप्रतीतेः । प्रकृतिपुरुषविवेकदर्शनात्प्रवृत्तेरुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानं मोक्ष इति चेत् न । प्रवृत्तिस्वभावायाः प्रकृतेरौदासीन्यायोगात् । अथ पुरुषार्थनिबन्धना तस्याः प्रवृत्तिः । विवेकख्यातिश्च पुरुषार्थः । तस्यां जातायां निवर्तते । कृतकार्यत्वात् ।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥

इति वचना । इति चेत् नैवम् । तस्या अचेतनाया विमृश्यकारित्वाभावात् । यथेयं कृतेपि शब्दाद्युपलम्भे पुनस्तदर्थं प्रवर्त्तते तथा विवेकख्यातौ कृतायामपि पुनस्तदर्थं प्रवर्तिष्यते । प्रवृत्तिलक्षणस्य स्वभावस्यानपेतत्वात् । नर्तकीदृष्टान्तस्तु स्वेष्टविघातकारी । यथा हि नर्तकी नृत्यं पारिषदेभ्यो दर्शयित्वा निवृत्तापि पुनस्तत्कुतूहलात्प्रवर्तते तथा प्रकृतिरपि पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः कथं न प्रवर्ततामिति । तस्मात्कृत्स्नकर्मक्षये पुरुषस्यैव मोक्ष इति प्रतिपत्तव्यम् ॥ एवमन्यासामपि तत्कल्पनानां तमोमोहमहामोहतामिस्रान्धतामिस्रभेदात्पञ्चधाविद्यास्मितारागद्वेषाभिनिवेशरूपो विपर्ययः । ब्राह्मप्राजापत्यसौम्यैन्द्रगान्धर्वयक्षराक्ष-

सपैशाचभेदादष्टविधो दैवः सर्गः। पशुमृगपक्षिसरीसृपस्थावरभेदात्पञ्चविधस्तैर्यग्योनः। ब्राह्मणत्वाद्यवान्तरभेदाविवक्षया चैकविधो मानुष इति चतुर्दशधा भूतसर्गः। बाधिर्यकुष्ठितान्धत्वजडताऽजिघ्रतामूकताकौण्यपङ्गुत्वक्लैब्योदावर्तमत्ततारूपैकादशेन्द्रियवधतुष्टिनवकविपर्ययसिद्ध्यष्टकविपर्ययलक्षणसप्तदशबुद्धिवधभेदादष्टाविंशतिधा शक्तिः। प्रकृत्युपादानकालभोगाख्याः अम्भःसलिलौघवृष्ट्यपरपर्यायवाच्याश्चतस्र आध्यात्मिक्यः। शब्दादिविषयोपरतयश्चार्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मानः पञ्च बाह्यास्तुष्टयः।ताश्च पारसुपारपारापारानुत्तमाम्भउत्तमाम्भःशब्दव्यपदेश्याः। इति नवधा तुष्टिः। त्रयो दुःखविघाता इति मुख्यास्तिस्रः सिद्धयः प्रमोदमुदितमोदमानाख्याः। तथाध्ययनं शब्द ऊहः सुहृत्प्राप्तिर्दानमिति दुःखविघातोपायतया गौण्यः पञ्च तारसुतारतारतारररम्यकसदामुदिताख्याः। इत्येवमष्टधा सिद्धिः। धृतिश्रद्धासुखविविदिषाविज्ञप्तिभेदात्पञ्च कर्मयोनयः। इत्यादीनां संवरप्रतिसंवरादीनां च तत्त्वकौमुदीगौडपादभाष्यादिप्रसिद्धानां विरुद्धत्वमुद्भावनीयमिति काव्यार्थः॥ १५॥

इदानीं ये प्रमाणादेकान्तेनाभिन्नं प्रमाणफलमाहुः ये च बाह्यार्थप्रतिक्षेपेण ज्ञानाद्वैतमेवास्तीति ब्रुवते तन्मतस्य विचार्यमाणत्वे विशरारुतामाह।

न तुल्यकालः फलहेतुभावो
हेतौ विलीने न फलस्य भावः।
न संविदद्वैतपथेऽर्थसंवि-
द्विलूनशीर्णं सुगतेन्द्रजालम्॥ १६॥

बौद्धाः किल प्रमाणात्तत्फलमेकान्तेनाभिन्नं मन्यन्ते । तथा च तत्सिद्धान्तः । उभयत्र तदेव ज्ञानं प्रमाणं फलम् । अधिगमरूपत्वात् । उभयत्रेति प्रत्यक्षेऽनुमाने च तदेव ज्ञानं प्रत्यक्षानुमानलक्षणं फलं कार्यम् । कुतः । अधिगमरूपत्वात् इति परिच्छेदरूपत्वात् । तथा हि परिच्छेदरूपमेव ज्ञानमुत्पद्यते । न च परिच्छेदादृतेऽन्यज्ज्ञानफलम् । अभिन्नाधिकरणत्वात् । इति सर्वथा न प्रत्यक्षानुमानाभ्यां भिन्नं फलमस्तीति ॥ एतच्च न समीचीनं यतो यद्यस्मादेकान्तेनाभिन्नं तत्तेन सहैवोत्पद्यते यथा घटेन घटत्वम् । तैश्च प्रमाणफलयोः कार्यकारणभावोऽभ्युपगम्यते । प्रमाणं कारणं फलं कार्यमिति । स चैकान्ताभेदे न घटते । न हि युगपदुत्पद्यमानयोस्तयोः सव्येतरगोविषाणयोरिव कार्यकारणभावो युक्तः । नियतप्राक्कालभावित्वात्कारणस्य । नियतोत्तरकालभावित्वात्कार्यस्य । एतदेवाह न तुल्यकालः फलहेतुभाव इति । फलं कार्यं हेतुः कारणं तयोर्भावः स्वरूपं कार्यकारणभावः । स तुल्यकालः समानकालो न युज्यत इत्यर्थः । अथ क्षणान्तरितत्वात्तयोः क्रमभावित्वं भविष्यतीत्याशङ्क्याह । हेतौ विलीने न फलस्य भाव इति । हेतौ कारणे प्रमाणलक्षणे विलीने क्षणिकत्वादुत्पत्त्यनन्तरमेव निरन्वयं विनष्टे फलस्य प्रमाणकार्यस्य न भावः सत्ता । निर्मूलत्वात् । विद्यमाने हि फलहेतावस्येदं फलमिति प्रतीयते नान्यथा । अतिप्रसङ्गात् । किं च हेतुफलभावः संबन्धः स च द्विष्ठ एव स्यात् । न चानयोः क्षणक्षयैकदीक्षितो भवान्संबन्धं क्षमते । ततः कथमयं हेतुः इदं फलमिति प्रतिनियता प्रतीतिः । एकस्य ग्रहणेऽप्यन्यस्याग्रहणे तदसंभवात् ।

द्विष्ठसंबन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयोः स्वरूपग्रहणे सति संबन्धवेदनम् ॥

इति वचनात् । यदपि धर्मोत्तरेणाऽर्थसारूप्यमस्य प्रमाणं तद्वशा-

दर्थप्रतीतिसिद्धेरिति न्यायबिन्दुसूत्रं विवृण्वता भणितं नीलनिर्भासं हि विज्ञानं यतस्तस्मान्नीलस्य प्रतीतिरवसीयते येभ्यो हि चक्षुरादिभ्यो ज्ञानमुत्पद्यते न तद्वशात्तज्ज्ञानं नीलस्य संवेदनं शक्यतेऽवस्थापयितुम् नीलसदृशं त्वनुभूयमानं नीलस्य संवेदनमवस्थाप्यते न चात्रजन्यजनकभावनिबन्धनः साध्यसाधनभावो येनैकस्मिन्वस्तुनि विरोधः स्यात् अपि तु व्यवस्थाप्यव्यवस्थापकभावेन तत एकस्य वस्तुनः किंचिद्रूपं प्रमाणं किंचित्प्रमाणफलं न विरुध्यते व्यवस्थापनहेतुर्हि सारूप्यं तस्य ज्ञानस्य व्यवस्थाप्यं च नीलसंवेदनरूपमित्यादि तदप्यसारम्। एकस्य निरंशस्य ज्ञानलक्षणस्य व्यवस्थाप्यव्यवस्थापकत्वलक्षणस्वभावद्वयायोगात्। व्यवस्थाप्यव्यवस्थापकभावस्यापि च संबन्धत्वेन द्विवृत्तित्वात् एकस्मिन्नसंभवात्। किं चार्थसारूप्यमर्थाकारता तच्च निश्चयरूपमनिश्चयरूपं वा। निश्चयरूपं चेत्तदेव व्यवस्थापकमस्तु। किमुभयकल्पनया। अनिश्चितं चेत् स्वयमव्यवस्थितं कथं नीलादिसंवेदनव्यवस्थापने समर्थम्। अपि च केयमर्थाकारता। किमर्थग्रहणपरिणामः आहोस्विदर्थाकारधारित्वम्। नाद्यः। सिद्धसाधनात्। द्वितीयस्तु ज्ञानस्य प्रमेयाकारानुकरणाज्जडत्वापत्त्यादिदोषाघ्रातः। तन्न प्रमाणादेकान्तेन फलस्याभेदः साधीयान्। सर्वथातादात्म्ये हि प्रमाणफलयोर्न व्यवस्था। तद्भावविरोधात्। न हि सारूप्यमस्य प्रमाणमधिगतिः फलमिति सर्वथातादात्म्ये सिद्ध्यति। अतिप्रसङ्गात्। ननु प्रमाणस्यासारूप्यव्यावृत्तिः सारूप्यम् अनधिगतिव्यावृत्तिरधिगतिरिति व्यावृत्तिभेदादेकस्यापि प्रमाणफलव्यवस्थेति चेत् नैवम्। स्वभावभेदमन्तरेणान्यव्यावृत्तिभेदस्याप्यनुपपत्तेः। कथं च प्रमाणस्य फलस्य चाप्रमाणाफलव्यावृत्त्या प्रमाणफलव्यवस्थावत्प्रमाणान्तरफलान्तरव्या-

वृत्त्याप्यप्रमाणत्वस्याफलत्वस्य च व्यवस्था न स्यात् । विजातीयादिव सजातीयादपि व्यावृत्तत्वाद्वस्तुनः । तस्मात्प्रमाणात्फलं कथंचिद्भिन्नमेवैष्टव्यम् । साध्यसाधनभावेन प्रतीयमानत्वात् । ये हि साध्यसाधनभावेन प्रतीयेते ते परस्परं भिद्येते । यथा कुठारच्छिदिक्रिये इति ॥ एवं यौगाभिप्रेतः प्रमाणात्फलस्यैकान्तभेदोपि निराकर्तव्यः । तस्यैकप्रमातृतादात्म्येन प्रमाणात्कथंचिदभेदव्यवस्थितेः । प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेः । यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्षते चेति सर्वव्यवहारिभिरस्खलितमनुभवात् । इतरथा स्वपरयोः प्रमाणफलव्यवस्थाविप्लवः प्रसज्यत इत्यलम् ॥

अथवा पूर्वार्द्धमिदमन्यथा व्याख्येयम् । सौगताः किलेत्थं प्रमाणयन्ति । सर्वं सत् क्षणिकम् । यतः सर्वं तावत् घटादिकं वस्तु मुद्गरादिसंनिधौ नाशं गच्छद्दृश्यते तत्र येन स्वरूपेणान्त्यावस्थायां घटादिकं विनश्यति तच्चैतत्स्वरूपमुत्पन्नमात्रस्य विद्यते तदानीमुत्पादानन्तरमेव तेन नष्टव्यमिति व्यक्तमस्य क्षणिकत्वम् । अथेदृश एव स्वभावस्तस्य हेतुतो जातो यत्कियन्तमपि कालं स्थित्वा विनश्यति । एवं तर्हि मुद्गरादिसंनिधानेपि एष एव तस्य स्वभाव इति पुनरप्यनेन तावन्तमेव कालं स्थातव्यम् इति नैवं विनश्येदिति । सोयमदित्सोर्वणिजः प्रतिदिनं पत्रलिखितश्वस्तनदिनभणनन्यायः । तस्मात्क्षणद्वयस्थायित्वेनाप्युत्पत्तौ प्रथमक्षणवत् द्वितीयेपि क्षणे क्षणद्वयस्थायित्वात्पुनरपरक्षणद्वयमवतिष्ठेत । एवं तृतीयेपि क्षणे तत्स्वभावत्वान्नैव विनश्येदिति । स्यादेतत् । स्थावरमेव तत्स्वहेतोर्जातं परं बलेन विरोधकेन मुद्गरादिना विनाश्यत इति । तदसत् । कथं पुनरेतद्घटिष्यते । न च तद्विनश्यति स्थावरत्वात् विनाशश्च तस्य विरोधिना बलेन क्रियत इति ।

न ह्येतत्संभवति । जीवति च देवदत्तो मरणं चास्य भवतीति । अथ विनश्यति तर्हि कथमविनश्वरं तद्वस्तु स्वहेतोर्जातमिति । न हि म्रियते चामरणधर्मा चेति युज्यते वक्तुम् । तस्मादविनश्वरत्वे कदाचिदपि नाशायोगात् दृष्टत्वाच्च नाशस्य नश्वरमेव तद्वस्तु स्वहेतोरुपजातमेवाङ्गीकर्तव्यम् । तस्मादुत्पन्नमात्रमेव विनश्यति । तथा च क्षणक्षयित्वं सिद्धं भवति । प्रयोगस्त्वेवम् । यद्विनश्वररूपं तदुत्पत्तेरनन्तरानवस्थायि यथान्त्यक्षणवर्तिघटस्य स्वरूपम् विनश्वरस्वरूपं च रूपादिकमुदयकाले इति स्वभावहेतुः । यदि क्षणक्षयिणो भावाः कथं तर्हि स एवायमिति प्रत्यभिज्ञा स्यात् । उच्यते । निरन्तरसदृशापरापरोत्पादादविद्यानुबन्धाच्च पूर्वक्षणविनाशकाल एव तत्सदृशं क्षणान्तरमुदयते तेनाकारविलक्षणत्वाभावादव्यवधानाच्चात्यन्तोच्छेदेऽपि स एवायमित्यभेदाध्यवसायी प्रत्ययः प्रसूयते । अत्यन्तभिन्नेष्वपि लूनपुनरुत्पन्नकुशकाशकेशादिषु दृष्ट एवायं स एवायमिति प्रत्ययस्तथेहापि किं न संभाव्यते । तस्मात्सर्वं सत् क्षणिकमिति सिद्धम् ॥ अत्र च पूर्वक्षणउपादानकारणं उत्तरक्षण उपादेयमिति पराभिप्रायमङ्गीकृत्याह न तुल्यकाल इत्यादि । ते विशकलितमुक्तावलीकल्पा निरन्वयविनाशिनः पूर्वक्षणा उत्तरक्षणान् जनयन्तः किं स्वोत्पत्तिकाल एव जनयन्ति उत क्षणान्तरे । न तावदाद्यः । समकालभाविनोर्युवतिकुचयोरिवोपादानोपादेयभावाभावात् । अतः साधूक्तम् न तुल्यकालः फलहेतुभाव इति । न च द्वितीयः । तदानीं निरन्वयविनाशेन पूर्वक्षणस्य नष्टत्वादुत्तरक्षणजनने कुतः संभावनापि । न चानुपादानस्योत्पत्तिर्दृष्टा । अतिप्रसङ्गात् । इति सुष्ठु व्याहृतं हेतौ विलीने न फलस्य भाव इति ॥ पदार्थस्त्वनयोः पादयोः प्रागेवोक्तः । केवलमत्र फलमुपादेयं हेतुरुपादानं तद्भाव उपादानोपादेयभाव इत्यर्थः ॥ यच्च क्षणिकत्वस्था-

फनाय मोक्षाकरगुप्तेनानन्तरमेव प्रलपितं तत् स्याद्वादवादे निरवकाशमेव। निरन्वयनाशवर्जं कथंचितिसिद्धसाधनात्। प्रतिक्षणं पर्यायनाशस्यानेकान्तवादिभिरभ्युपगमात् । यदप्यभिहितं न ह्येतत्संभवति जीवति च देवदत्तो मरणं चास्य भवतीति तदपि संभवादेव न स्याद्वादवादिनां क्षतिमावहति। यतो जीवनं प्राणधारणं मरणं चायुर्दलिकक्षयस्ततो जीवतोपि देवदत्तस्य प्रतिसमयमायुर्दलिकानामुदीर्णानां क्षयादुपपन्नमेव मरणम्। न च वाच्यमन्त्यावस्थायामेव कृत्स्नायुर्दलिकक्षयात् तत्रैव मरणव्यपदेशो युक्त इति। तस्यामप्यवस्थायां न्यक्षेण तत्क्षयाभावात्। तत्रापि ह्यवशिष्टानामेव तेषां क्षयो न पुनस्तत्क्षण एव युगपत्सर्वेषाम्। इति सिद्धं गर्भादारभ्य प्रतिक्षणं मरणम्। इत्यलं प्रसङ्गेन ॥

अथवाऽपरथा व्याख्या। सौगतानां किलार्थेन ज्ञानं जन्यते तच्च ज्ञानं तमेव स्वोत्पादकमर्थं गृह्णातीति। नाकारणं विषय इति वचनात्। ततश्चार्थः कारणं ज्ञानं च कार्यमिति। एतच्च न चारु। यतो यस्मिन् क्षणेऽर्थस्य स्वरूपसत्ता तस्मिन्नद्यापि ज्ञानं नोत्पद्यते। तस्य तदा स्वोत्पत्तिमात्रव्यग्रत्वात् । यत्र च क्षणे ज्ञानं समुत्पन्नं तत्रार्थोऽतीतः। पूर्वापरकालभावानियतश्च कार्यकारणभावः। क्षणातिरिक्तं चावस्थानं नास्ति। ततः कथं ज्ञानस्योत्पत्तिः। कारणस्य विलीनत्वात्। तद्विलये च ज्ञानस्य निर्विषयतानुषज्यते। कारणस्यैव युष्मन्मते तद्विषयत्वात्। निर्विषयं च ज्ञानमप्रमाणमेवाकाशकेशज्ञानवत् । ज्ञानसहभाविनश्चार्थक्षणस्य न ग्राह्यत्वम्। तस्याकारणत्वात्। अत आह न तुल्यकाल इत्यादि। ज्ञानार्थयोः फलहेतुभावः कार्यकारणभावः तुल्यकालो न घटते। ज्ञानसहभाविनोऽर्थक्षणस्य ज्ञानानुत्पादकत्वात्। युगपद्भाविनोः कार्यकारणभावायोगात्। अथ प्राचोऽर्थक्षणस्य ज्ञानोत्पादकत्वं भविष्यति। तन्न।

यत आह हेतौ इत्यादि । हेतौ अर्थरूपे ज्ञानकारणे विलीने क्षणिकत्वान्निरन्वयं विनष्टे न फलस्य ज्ञानलक्षणकार्यस्य भाव आत्मलाभः स्यात् । जनकस्यार्थक्षणस्यातीतत्वान्निर्मूलमेव ज्ञानोत्थानं स्यात् । जनकस्यैव च ग्राह्यत्वे इन्द्रियाणामपि ग्राह्यत्वापत्तिः। तेषामपि ज्ञानजनकत्वात् । न चान्वयव्यतिरेकाभ्यामर्थस्य ज्ञानहेतुत्वं दृष्टम् । मृगतृष्णादौ जलाभावेपि जलज्ञानोत्पादात् । अन्यथा तत्प्रवृत्तेरसंभवात् । भ्रान्तं तज्ज्ञानमिति चेत् ननु भ्रान्ताभ्रान्तविचारः स्थिरीभूय क्रियतां त्वया । सांप्रतं प्रतिपद्यस्व तावदनर्थजमपि ज्ञानम् । अन्वयेनार्थस्य ज्ञानहेतुत्वं दृष्टमेवेति चेत् न। न हि तद्भावे भावलक्षणोऽन्वय एव हेतुफलभावनिश्चयनिमित्तम् । अपि तु तदभावेऽभावलक्षणो व्यतिरेकोपि । स चोक्तयुक्त्या नास्त्येव । योगिनां चातीतानागतार्थग्रहणे किमर्थस्य निमित्तत्वम् । तयोरसत्त्वात् ।

ण णिहाणगया भग्गा पुंजो णत्थि अणागए ।
णिव्वुया णेव चिट्ठन्ति आरग्गे सरिसोवमा ॥

इति वचनात् । निमित्तत्वे चार्थक्रियाकारित्वेन सत्त्वादतीतानागतत्वक्षतिः। न च प्रकाश्यादात्मलाभ एव प्रकाशकस्य प्रकाशकत्वम् । प्रदीपादेर्घटादिभ्योऽनुत्पन्नस्यापि तत्प्रकाशकत्वात्। जनकस्यैव च ग्राह्यत्वाभ्युपगमे स्मृत्यादेः प्रमाणस्याप्रामाण्यप्रसङ्गः । तस्यार्थाजन्यत्वात् । न च स्मृतिर्न प्रमाणम् । अनुमानप्राणभूतत्वात् साध्यसाधनसंबन्धस्मरणपूर्वकत्वात्तस्य । जनकमेव चेद्ग्राह्यं तदा स्वसंवेदनस्य कथं ग्राहकत्वम् । तस्य हि ग्राह्यं स्वरूपमेव। न च तेन तज्जन्यते। स्वात्मनि क्रियाविरोधात् । तस्मात्स्वसामग्रीप्रभवयोर्घटप्रदीपयोरिवार्थज्ञानयोः प्रकाश्यप्रकाशकभावसंभवान्न ज्ञाननिमित्तत्वमर्थस्य । नन्वर्थाजन्यत्वे ज्ञानस्य कथं प्रतिनियतकर्मव्यवस्था । तदुत्पत्तितदाकारताभ्यां हि सोपपद्यते । तस्मादनुत्पन्नस्यातदाका-

रस्य च ज्ञानस्य सर्वार्थान्प्रत्यविशेषात्सर्वग्रहणं प्रसज्येत। नैवम्। तदुत्पत्तिमन्तरेणाप्यावरणक्षयोपशमलक्षणया योग्यतयैव प्रतिनियतार्थप्रकाशकत्वोपपत्तेः। तदुत्पत्तावपि च योग्यतावश्यमेष्टव्या। अन्यथाऽशेषार्थसांनिध्ये तत्तदर्थसांनिध्येपि कुतश्चिदेवार्थात् कस्यचिदेव ज्ञानस्य जन्मेति कौतस्कुतोऽयं विभागः। तदाकारता त्वर्थाकारसंक्रान्त्या तावदनुपपन्ना। अर्थस्य निराकारत्वप्रसङ्गात्। ज्ञानस्य साकारत्वप्रसङ्गाच्च। अर्थेन च मूर्तेनामूर्तस्य ज्ञानस्य कीदृशं सादृश्यमित्यर्थविशेषग्रहणपरिणाम एव साभ्युपेया। ततः

अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम्।
तस्मात्प्रमेयाधिगतेः प्रमाणं मेयरूपता॥

इति यत्किञ्चिदेतत्। अपि च व्यस्ते समस्ते वैते ग्रहणकारणं स्याताम्। यदि व्यस्ते तदा कपालाद्यक्षणो घटान्त्यक्षणस्य जलचन्द्रो वा नभश्चन्द्रस्य ग्राहकः प्राप्नोति। यथासंख्यं तदुत्पत्तेस्तदाकारत्वाच्च। अथ समस्ते तर्हि घटोत्तरक्षणः पूर्वघटक्षणस्य ग्राहकः प्रसजति। तयोरुभयोरपि सद्भावात्। ज्ञानरूपत्वे सत्येते ग्रहणकारणमिति चेत् तर्हि समानजातीयज्ञानस्य समनन्तरज्ञानग्राहकत्वं प्रसज्येत। तयोर्जन्यजनकभावसद्भावात्। तन्न योग्यतामन्तरेणान्यद्ग्रहणकारणं पश्याम इति॥

अथोत्तरार्द्धं व्याख्यातुमुपक्रम्यते। तत्र च बाह्यार्थनिरपेक्षं ज्ञानाद्वैतमेव ये बौद्धविशेषा मन्वते तेषां प्रतिक्षेपः।तन्मतं चेदम्। ग्राह्यग्राहकादिकलङ्कानाङ्कितं निष्प्रपञ्चं ज्ञानमात्रं परमार्थसत्। बाह्यार्थस्तु विचारमेव न क्षमते। तथाहि। कोऽयं बाह्यार्थः। किं परमाणुरूपः स्थूलावयविरूपो वा। न तावत्परमाणुरूपः। प्रमाणाभावात्। प्रमाणं हि प्रत्यक्षमनुमानं वा। न तावत्प्रत्यक्षं तत्साधनबद्धकक्षम्। तद्धि योगिनां स्यात् अस्मदादीनां वा।

नाद्यम् । अत्यन्तविप्रकृष्टतया श्रद्धामात्रगम्यत्वात् । न द्वितीयम् । अनुभवबाधितत्वात् । न हि वयमयं परमाणुरयं परमाणुरिति स्वप्नेपि प्रतीमः । स्तम्भोऽयं कुम्भोऽयमित्येवमेव नः सदैव संवेदनोदयात् । नाप्यनुमानेन तत्सिद्धिः । अणूनामतीन्द्रियत्वेन तैः सह अविनाभावस्य क्वापि लिङ्गे ग्रहीतुमशक्यत्वात् । किं चामी नित्या अनित्या वा स्युः । नित्याश्चेत् क्रमेणार्थक्रियाकारिणो युगपद्वा । न क्रमेण । स्वभावभेदेनानित्यत्वापत्तेः । न युगपद् । एकक्षण एव कृत्स्नार्थक्रियाकरणात् क्षणान्तरे तदभावादसत्त्वापत्तिः । अनित्याश्चेत् क्षणिकाः कालान्तरस्थायिनो वा । क्षणिकाश्चेत् सहेतुका निर्हेतुका वा । निर्हेतुकाश्चेत् नित्यं सत्त्वमसत्त्वं वा स्यात् । निरपेक्षत्वात् । अपेक्षातो हि कादाचित्कत्वम् । सहेतुकाश्चेत् किं तेषां स्थूलं किंचित्कारणं परमाणवो वा । न स्थूलम् । परमाणुरूपस्यैव बाह्यार्थस्याङ्गीकृतत्वात् । न च परमाणवः । ते हि सन्तोऽसन्तः सदसन्तो वा स्वकार्याणि कुर्युः । सन्तश्चेत् किमुत्पत्तिक्षण एव क्षणान्तरे वा । नोत्पत्तिक्षणे । तदानीमुत्पत्तिमात्रव्यग्रत्वात्तेषाम् । अथ

भूतिर्येषां क्रिया सैव कारणं सैव चोच्यते ।

इति वचनात् भवनमेव तेषामपरोत्पत्तौ कारणमिति चेत् एवं तर्हि रूपाणवो रसाणूनां ते च तेषामुपादानं स्युः । उभयत्र भवनाविशेषात् । न च क्षणान्तरे । नष्टत्वात् । अथासन्तस्ते तदुत्पादकाः । तर्हि एकं स्वसत्ताक्षणमपहाय सदा तदुत्पत्तिप्रसङ्गः । तदसत्त्वस्य सर्वदाऽविशेषात् । सदसत्पक्षस्तु

प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न सः ।

इति वचनाद्विरोधाघ्रात एव । तन्नाणवः क्षणिकाः । नापि कालान्तरस्थायिनः । क्षणिकपक्षसदृक्षयोगक्षेमत्वात् । किं चामी कियत्कालस्थायिनोपि किमर्थक्रियापराङ्मुखास्तत्कारिणो वा ।

आद्ये खपुष्पवदसत्त्वापत्तिः । उदग्विकल्पे किमसद्रूपं सद्रूपमुभयरूपं वा ते कार्यं कुर्युः । असद्रूपं चेच्छशविषाणादेरपि किं न करणम् । सद्रूपं चेत् सतोपि करणेऽनवस्था । तृतीयभेदस्तु प्राग्वद्विरोधदुर्गन्धः । तन्नाणुरूपोऽर्थः सर्वथा घटते ॥

नापि स्थूलावयविरूपः । एकपरमाण्वसिद्धौ कथमनेकतत्सिद्धिः । तदभावे च तत्प्रचयरूपः स्थूलावयवी वाङ्मात्रम् । किं चायमनेकावयवाधार इष्यते । ते चावयवा यदि विरोधिनः तर्हि नैकः स्थूलावयवी । विरुद्धधर्माध्यासात् । अविरोधिनश्चेत्प्रतीतिबाधः । एकस्मिन्नेव स्थूलावयविनि चलाचलरक्तारक्तावृतानावृतादिविरुद्धावयवानामुपलब्धेः । अपि चासौ तेषु वर्तमानः कार्त्स्न्येनैकदेशेन वा वर्तते । कार्त्स्न्येन वृत्तावेकस्मिन्नेवावयवे परिसमाप्तत्वादनेकावयववृत्तित्वं न स्यात् । प्रत्यवयवं कार्त्स्न्येन वृत्तौ चावयविबहुत्वापत्तेः । एकदेशेन वृत्तौ च तस्य निरंशत्वाभ्युपगमबाधः । सांशत्वे वा तेंऽशास्ततो भिन्ना अभिन्ना वा । भिन्नत्वे पुनरप्यनेकांशवृत्तेरेकस्य कार्त्स्न्यैकदेशविकल्पानतिक्रमादनवस्था । अभिन्नत्वे न केचिदंशाः स्युः । इति नास्ति बाह्योऽर्थः कश्चित् । किन्तु ज्ञानमेवेदं सर्वं नीलाद्याकारेण प्रतिभाति । बाह्यार्थस्य जडत्वेन प्रतिभासायोगात् । यथोक्तम् ।

स्वाकारबुद्धिजनका दृश्या नेन्द्रियगोचराः ।

अलङ्कारकारेणाप्युक्तम् ।

यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते ।
न चेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते ॥

यदि बाह्योऽर्थो नास्ति ॥ किंविषयस्तर्ह्ययं घटपटादिप्रतिभास इति चेत् ननु निरालम्बन एवायमनादिवितथवासनाप्रवर्तितः । निर्विषयत्वात् । आकाशकेशज्ञानवत् स्वप्नज्ञानवद्वेति । अत एवोक्तम्

नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात्स्वयं सैव प्रकाशते ॥
बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ।
वासनालुठितं चित्तमर्थाभासं प्रवर्तते ॥

इति ॥

तदेतत्सर्वमवद्यम् । ज्ञानमिति हि क्रियाशब्दः।ततो ज्ञायतेऽनेनेति ज्ञानं ज्ञप्तिर्वा ज्ञानमिति। अस्य च कर्मणा भाव्यम् । निर्विषयाया ज्ञप्तेरघटनात् । न चाकाशकेशादौ निर्विषयमपि दृष्टं ज्ञानमिति वाच्यम् । तस्याप्येकान्तेन निर्विषयत्वाभावात् । न हि सर्वथाऽगृहीतसत्यकेशज्ञानस्य तत्प्रतीतिः । स्वप्नज्ञानमप्यनुभूतदृष्टाद्यर्थविषयत्वान्न निरालम्बनम् । तथा च महाभाष्यकारः ।

अणुहूयदिट्ठचिंतिय सुयपयइवियारदेवयाणूवा ।
सुमिणस्स निमित्ताइं पुण्णं पावं च णाभावो ॥

यश्च ज्ञानविषयः स बाह्योर्थः । भ्रान्तिरियमिति चेत् चिरं जीव । भ्रान्तिर्हि मुख्येऽर्थे क्वचिद्दृष्टे सति करणापाटवादिना अन्यत्र विपर्यस्तग्रहणे प्रसिद्धा । यथा शुक्तौ रजतभ्रान्तिः । अर्थक्रियासमर्थेऽपि वस्तुनि यदि भ्रान्तिरुच्यते तर्हि प्रलीना भ्रान्ताभ्रान्तव्यवस्था । तथा च सत्यमेतद्वचः ।

आशामोदकतृप्ता ये ये चास्वादितमोदकाः ।
रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यते ॥

न चामून्यर्थदूषणानि स्याद्वादिनां बाधां विदधते । परमाणुरूपस्य स्थूलावयविरूपस्य चार्थस्याङ्गीकृतत्वात् । यच्च परमाणुपक्षखण्डनेऽभिहितं प्रमाणाभावादिति तदसत् । तत्कार्याणां घटादीनां प्रत्यक्षत्वे तेषामपि कथंचित्प्रत्यक्षत्वं योगिप्रत्यक्षेण च साक्षात्प्रत्यक्षत्वमवसेयम् । अनुपलब्धिस्तु सौक्ष्म्यात् । अनुमानादपि तत्सि-

द्धिः। यथा सन्ति परमाणवः स्थूलावयविनिष्पत्त्यन्यथानुपपत्तेरित्यन्तर्व्याप्तिः । न चाणुभ्यः स्थूलोत्पाद इत्येकान्तः । स्थूलादपि सूत्रपटलादेः स्थूलस्य पटादेः प्रादुर्भावविभावनात् । आत्माकाशादेरपुद्गलत्वकक्षीकाराच्च । यत्र पुनरणुभ्यस्तदुत्पत्तिस्तत्र तत्तत्कालादिसामग्रीसव्यपेक्षक्रियावशात्प्रादुर्भूतं संयोगातिशयमपेक्ष्येयमवितथैव। यदपि किं चायमनेकावयवाधार इत्यादि न्यगादि तत्रापि कथंचिद्विरोध्यनेकावयवाविष्वग्भूतवृत्तिरवयव्यभिधीयते । तत्र च यद्विरोध्यनेकावयवाधारतायां विरुद्धधर्माध्यासनमभिहितं तत्कथंचिदुपेयत एव तावत्।अवयवात्मकस्य तस्यापि कथंचिदनेकरूपत्वात्। यच्चोपन्यस्तम् अपि चासौ तेषु वर्तमानः कार्त्स्न्येनैकदेशेन वा वर्ततेत्यादि तत्रापि विकल्पद्वयानभ्युपगम एवोत्तरम् । अविष्वग्भावेनावयविनोऽवयवेषु वृत्तेः स्वीकारात्। किं च यदि बाह्योऽर्थो नास्ति किमिदानीं नियताकारं प्रतीयते। नीलमेतदिति विज्ञानाकारोऽयमिति चेत् न। ज्ञानाद्बहिर्भूतस्य संवेदनात्। ज्ञानाकारत्वे त्वहं नीलमिति प्रतीतिः स्यात् न त्विदं नीलमिति । ज्ञानानां प्रत्येकमाकारभेदात् कस्यचिदहमिति प्रतिभासः कस्यचिन्नीलमेतदिति चेत् न। नीलाद्याकारवदहमित्याकारस्य व्यवस्थितत्वाभावात्। तथा च यदेकेनाहमिति प्रतीयते तदेवापरेण त्वमिति प्रतीयते। नीलाद्याकारस्तु व्यवस्थितः सर्वैरप्येकरूपतया ग्रहणात् । भक्षितहृत्पूरादिभिस्तु यद्यपि नीलादिकं पीतादितया गृह्यते तथापि तेन न व्यभिचारः। तस्य भ्रान्तत्वात्। स्वयं स्वस्य संवेदनेऽहमिति प्रतिभासत इति चेत् ननु किं परस्यापि संवेदनमस्ति । कथमन्यथा स्वशब्दस्य प्रयोगः । प्रतियोगिशब्दो ह्ययं परमपेक्षमाण एव प्रवर्तते । स्वरूपस्यापि भ्रान्त्या भेदप्रतीतिरिति चेत् हन्त प्रत्यक्षेण प्रतीतो भेदः कथं न वास्तवः । भ्रान्तं प्रत्यक्षमिति चेत् ननु कुत

एतत् । अनुमानेन ज्ञानार्थयोरभेदसिद्धेरिति चेत् किं तदनुमानमिति पृच्छामः । यद्येन सह नियमेनोपलभ्यते तत्ततो न भिद्यते यथा सच्चन्द्रादसच्चन्द्रः । नियमेनोपलभ्यते च ज्ञानेन सहार्थः इति व्यापकानुपलब्धिः । प्रतिषेध्यस्य ज्ञानार्थयोर्भेदस्य व्यापकः सहोपलम्भानियमःतस्यानुपलब्धिः। भिन्नयोर्नीलपीतयोर्युगपदुपलम्भनियमाभावात् । इत्यनुमानेन तयोरभेदसिद्धिरिति चेत् न । संदिग्धानैकान्तिकत्वेनास्यानुमानाभासत्वात् । ज्ञानं हि स्वपरसंवेदनम्। तत् परसंवेदनतामात्रेणैव नीलं गृह्णाति स्वसंवेदनतामात्रेणैव च नीलबुद्धिम् । तदेवमनयोर्युगपद्ग्रहणात्सहोपलम्भनियमोऽस्ति अभेदश्च नास्ति इति सहोपलम्भनियमरूपस्य हेतोर्विपक्षाद्व्यावृत्तेः संदिग्धत्वात् संदिग्धानैकान्तिकत्वम् । असिद्धश्च सहोपलम्भनियमः । नीलमेतदिति बहिर्मुखतयाऽर्थेनुभूयमाने तदानीमेवान्तरस्य नीलानुभवस्याननुभवात् इति कथं प्रत्यक्षस्यानुमानेन ज्ञानार्थयोरभेदसिद्ध्या भ्रान्तत्वम् । अपि च प्रत्यक्षस्य भ्रान्तत्वेनाबाधितविषयत्वादनुमानस्यात्मलाभः लब्धात्मके चानुमाने प्रत्यक्षस्य भ्रान्तत्वमित्यन्योन्याश्रयदोषोऽपि दुर्निवारः। अर्थाभावे च नियतदेशाधिकरणा प्रतीतिः कुतः। न हि तत्र विवक्षितदेशेऽयमारोपयितव्यो नान्यत्रेत्यस्ति नियमे हेतुः । वासनानियमात्तदारोपनियम इति चेत् न। तस्या अपि तद्देशनियमकारणाभावात्।सति ह्यर्थसद्भावे यद्देशोऽर्थस्तद्देशोऽनुभवस्तद्देशा च तत्पूर्विका वासना । बाह्यार्थाभावे तु तस्याः किंकृतो देशनियमः । अथास्ति तावदारोपनियमः। न च कारणविशेषमन्तरेण कार्यविशेषो घटते बाह्यश्चार्थो नास्ति तेन वासनानामेव वैचित्र्यं तत्र हेतुः। इति चेत् तद्वासनावैचित्र्यं बोधाकारादन्यदनन्यद्वा । अनन्यचेत् बोधाकारस्यैकत्वात्कस्तासां परस्परतो विशेषः । अन्यचेत् अर्थे कः प्रद्वेषः येन सर्वलोकप्रतीतिरपह्नू-

यते । तदेवं सिद्धो ज्ञानार्थयोर्भेदः । तथा च प्रयोगः । विवादाध्यासितं नीलादि ज्ञानाद्यतिरिक्तम्। विरुद्धधर्माध्यस्तत्वात्। विरुद्धधर्माध्यासश्च ज्ञानस्य शरीरान्तः अर्थस्य च बहिः । ज्ञानस्यापरकाले अर्थस्य च पूर्वकाले वृत्तिमत्त्वात् । ज्ञानस्य आत्मनः सकाशादर्थस्य स्वकारणेभ्य उत्पत्तेः । ज्ञानस्य प्रकाशरूपत्वादर्थस्य च जडरूपत्वादिति । । अतो न ज्ञानाद्वैतेऽभ्युपगम्यमाने बहिरनुभूयमानार्थप्रतीतिः कथमपि संगतिमङ्गति । न च दृष्टमपह्नोतुं शक्यम् इति । अत एवाह स्तुतिकारः न संविदद्वैतपथेऽर्थसंविद् इति । सम्यग् अवैपरीत्येन विद्यतेअवगम्यते वस्तुस्वरूपमनयेति संवित्। स्वसंवेदनपक्षे तु संवेदनं संवित् ज्ञानं तस्या अद्वैतम् । द्वयोर्भावो द्विता द्वितैव द्वैतं प्रज्ञादित्वात् स्वार्थिकेऽणि । न द्वैतमद्वैतम् । बाह्यार्थप्रतिक्षेपादेकत्वम्। संविदद्वैतं ज्ञानमेवैकं तात्त्विकं न बाह्योऽर्थ इत्यभ्युपगम इत्यर्थः।तस्य पन्थाः मार्गः संविदद्वैतपथः तस्मिन् ज्ञानाद्वैतवादपक्ष इति यावत् । किमित्याह । नार्थसंवित् । येयं बहिर्मुखतयाऽर्थप्रतीतिः साक्षादनुभूयते सा न घटते इत्युपस्कारः । एतच्चानन्तरमेव भावितम् । एवंस्थिते सति किमित्याह । विलूनशीर्णं सुगतेन्द्रजालमिति । सुगतो मायापुत्रः तस्य संबन्धि तेन परिकल्पितं क्षणक्षयादिवस्तुजातम् । इन्द्रजालमिवेन्द्रजालम् । मतिव्यामोहविधातृत्वात् । सुगतेन्द्रजालं सर्वमिदं विलूनशीर्णम् । पूर्वं विलूनं पश्चात् शीर्णं विलूनशीर्णम् । यथा किंचित्तृणस्तम्बादि विलूनमेव शीर्यते विनश्यति एवं तत्कल्पितमिन्द्रजालं तृणप्रायं धारालयुक्तिशस्त्रिकया छिन्नं सद्विशीर्यत इति ॥ अथ वा यथा निपुणेन्द्रजालिककल्पितमिन्द्रजालमवास्तवतत्तद्वस्त्वद्भुततोपदर्शनेन तथाविधबुद्धिदुर्विदग्धं जनं विप्रतार्य पश्चादिन्द्रधनुरिव निरवयवं विलूनशीर्णतां कलयति तथा सुगतपरिकल्पितं तत्तत्प्रमाणतत्फलाभेदक्षणक्षयज्ञानार्थहेतुकतत्त्वज्ञानाद्वैता-

भ्युपगमादि सर्वं प्रमाणानभिज्ञं लोकं व्यामोहयमानमपि युक्त्या विचार्यमाणं विशरारुतामेव सेवत इति। अत्र च सुगतशब्द उपहासार्थः। सौगता हि शोभनं गतं ज्ञानमस्येति सुगत इत्युशन्ति । ततश्चाहो तस्य शोभनज्ञानता येनेत्थमयुक्तियुक्तमुक्तमिति काव्यार्थः॥१६॥

अथ तत्त्वव्यवस्थापकप्रमाणादिचतुष्टयव्यवहारापलापिनः शून्यवादिनः सौगतजातीयांस्तत्कक्षीकृतपक्षसाधकस्य प्रमाणस्याङ्गीकारानङ्गीकारलक्षणपक्षद्वयेपि तदभिमतार्थासिद्धिप्रदर्शनपूर्वकमुपहसन्नाह ।

विना प्रमाणं परवन्न शून्यः
स्वपक्षसिद्धेः पदमश्नुवीत ।
कुप्येत्कृतान्तः स्पृशते प्रमाण-
महो सुदृष्टं त्वदसूयिदृष्टम् ॥ १७ ॥

शून्यः शून्यवादी प्रमाणं प्रत्यक्षादिकं विना अन्तरेण स्वपक्षसिद्धेः स्वाभ्युपगतशून्यवादनिष्पत्तेः पदं प्रतिष्ठां नाश्नुवीत न प्राप्नुयात्। किंवत् परवत् इतरप्रामाणिकवत्। वैधर्म्येणायं दृष्टान्तः। यथा इतरे प्रामाणिकाः प्रमाणेन साधकतमेन स्वपक्षसिद्धिमश्नुवते एवं नायम् । अस्य मते प्रमाणप्रमेयादिव्यवहारस्यापारमार्थिकत्वात्। सर्व एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिभावेन न बहिःसदसत्त्वमपेक्षते इत्यादिवचनात् । अप्रमाणकश्च शून्यवादाभ्युपगमः कथमिव प्रेक्षावतामुपादेयो भविष्यति । प्रेक्षावत्त्वव्याहतिप्रसङ्गात् । अथ चेत्स्वपक्षसंसिद्धये किमपि प्रमाणमयमङ्गीकुरुते तत्रायमुपालम्भः कुप्येदित्यादि । प्रमाणं प्रत्यक्षाद्यन्यतमत्स्पृशते आश्रयमाणाय प्रकरणादस्मै शून्यवादिने कृतान्तः तत्सिद्धान्तः कुप्येत् कोपं कुर्यात् सिद्धान्तबाधः स्यादित्यर्थः। यथा

किल सेवकस्य विरुद्धवृत्त्या कुपितो नृपतिः सर्वस्वमपहरति एवं तत्सिद्धान्तोपि शून्यवादविरुद्धं प्रमाणभावमङ्गीकुर्वाणस्य तस्य सर्वस्वभूतं सम्यग्वादित्वमपहरति । किं च स्वागमोपदेशेनैव तेन वादिना शून्यवादः प्ररूप्यते इति स्वीकृतमागमस्य प्रामाण्यमिति कुतस्तस्य स्वपक्षसिद्धिः । प्रमाणाङ्गीकरणात् । किं च प्रमाणं प्रमेयं विना न भवतीति प्रमाणानङ्गीकरणे प्रमेयमपि विशीर्णम् । ततश्चास्य मूकतैव युक्ता न पुनः शून्यवादोपन्यासाय तुण्डताण्डवडम्बरम् । शून्यवादस्यापि प्रमेयत्वात् । अत्र च स्पृशिधातुं कृतान्तशब्दं च प्रयुञ्जानस्य सूरेरयमभिप्रायः । यद्यसौ शून्यवादी दूरे प्रमाणस्य सर्वथाङ्गीकारः यावत्प्रमाणस्पर्शमात्रपि विधत्ते तदा तस्मै कृतान्तो यमराजः कुप्येत् । तत्कोपो हि मरणफलः । ततश्च स्वसिद्धान्तविरुद्धमसौ प्रमाणयन्निग्रहस्थानापन्नत्वान्मृत एवेति । एवं सति अहो इत्युपहासप्रशंसायाम् तुभ्यमसूयन्ति गुणेषु दोषानाविष्कुर्वन्तीत्येवंशीलास्त्वदसूयिनः तन्त्रान्तरीयाः तैर्दृष्टं मत्यज्ञानचक्षुषा निरीक्षितम् अहो सुदृष्टं साधुदृष्टम् । विपरीतलक्षणयोपहासान्न सम्यग्दृष्टमित्यर्थः । अत्रासूयधातोस्ताच्छीलिकणक्प्राप्तावपि बाहुलकाण्णिन् । असूयाऽस्त्येषामित्यसूयिनः त्वय्यसूयिनः त्वदसूयिनः इति मत्वर्थीयान्तं वा । त्वदसूयुदृष्टमिति पाठेपि न किंचिदचारु । असूयुशब्दस्योदन्तस्योदयनाद्यैर्न्यायतात्पर्यपरिशुद्ध्यादौ मत्सरिणि प्रयोगादिति ॥

इह शून्यवादिनामयमभिसंधिः । प्रमाता प्रमेयं प्रमाणं प्रमितिरिति तत्त्वचतुष्टयं परपरिकल्पितमवस्त्वेव । विचारासहत्वात् । तुरङ्गशृङ्गवत् । तत्र प्रमाता तावदात्मा तस्य च प्रमाणग्राह्यत्वाभावादभावः । तथा हि न प्रत्यक्षेण तत्सिद्धिः । इन्द्रियगोचरातिक्रान्तत्वात् । यत्तु अहंकारप्रत्ययेण तस्य मानसप्रत्यक्षत्वसाधनं

तदप्यनैकान्तिकम् । तस्याहं गौरः श्यामो वेत्यादौ शरीराश्रयतयाप्युपपत्तेः । किं च यद्ययमहंकारप्रत्यय आत्मगोचरः स्यात्तदा न कादाचित्कः स्यात् । आत्मनः सदा सन्निहितत्वात् । कादाचित्कं हि ज्ञानं कदाचित्कारणपूर्वकं दृष्टं यथा सौदामनीज्ञानमिति । नाप्यनुमानेन । अव्यभिचारिलिङ्गाग्रहणात् । आगमानां च परस्परविरुद्धार्थवादिनां नास्त्येव प्रामाण्यम् । तथा हि एकेन कथमपि कश्चिदर्थो व्यवस्थापितोऽभियुक्ततरेणापरेण स एवान्यथा व्यवस्थाप्यते। स्वयमव्यवस्थितप्रामाण्यानां च तेषां कथमन्यव्यवस्थापने सामर्थ्यम् । इति नास्ति प्रमाता ॥ प्रमेयं च बाह्योऽर्थः स चानन्तरमेव बाह्यार्थप्रतिक्षेपक्षणे निर्लोठितः ॥ प्रमाणं च स्वपरावभासिज्ञानम् । तच्च प्रमेयाभावे कस्य ग्राहकमस्तु । निर्विषयत्वात् । किं चैतदर्थसमकालं तद्भिन्नकालं वा तद्ग्राहकं कल्प्येत । आद्यपक्षे त्रिभुवनवर्तिनोपि पदार्थास्तत्रावभासेरन् । समकालत्वाविशेषात् । द्वितीये तु निराकारं साकारं वा तत्स्यात् । प्रथमे प्रतिनियतपदार्थपरिच्छेदानुपपत्तिः । द्वितीये तु किमयमाकारो व्यतिरिक्तोऽव्यतिरिक्तो वा ज्ञानात् । अव्यतिरेके ज्ञानमेवायं तथा च निराकारपक्षदोषः । व्यतिरेके यद्ययं चिद्रूपः तदानीमाकारोपि वेदकः स्यात् । तथा चायमपि निराकारः साकारो वा तद्वेदको भवेत् । इत्यावर्तनेनानवस्था । अथाचिद्रूपः किमज्ञातो ज्ञातो वा तज्ज्ञापकः स्यात् । प्राचीने विकल्पे चैत्रस्येव मैत्रस्यापि तज्ज्ञापकोऽसौ स्यात् । तदुत्तरे तु निराकारेण साकारेण वा ज्ञानेन तस्यापि ज्ञानं स्यात् । इत्याद्यावृत्तावनवस्थैवेति ॥ इत्थं प्रमाणाभावे तत्फलरूपा प्रमितिः कुतस्तनी । इति सर्वशून्यतैव परं तत्त्वमिति । तथा च पठन्ति ।

यथा यथा विचार्यन्ते विशीर्यन्ते तथा तथा ।
यदेतत्स्वयमर्थेभ्यो रोचते तत्र के वयम् ॥

इति पूर्वपक्षः। विस्तरतस्तु प्रमाणखण्डनं तत्त्वोपप्लवसिंहादवलोकनीयम् ॥

अत्र प्रतिविधीयते । ननु यदिदं शून्यवादव्यवस्थापनाय देवानांप्रियेण वचनमुपन्यस्तं तच्छून्यमशून्यं वा । शून्यं चेत् सर्वोपाख्याविरहितत्वात्खपुष्पेणेव नामेन किंचित्साध्यते निषिध्यते वा । ततश्च निष्प्रतिपक्षा प्रमाणादितत्त्वचतुष्टयीव्यवस्था । अशून्यं चेत् प्रलीनस्तपस्वी शून्यवादः । भवद्वचनेनैव सर्वशून्यताया व्यभिचारात् । तत्रापि निष्कण्टकैव सा भगवती । तथापि प्रामाणिकसमयपरिपालनार्थं किञ्चित्तत्साधनं दूष्यते । तत्र यत्तावदुक्तं प्रमातुः प्रत्यक्षेण न सिद्धिरिन्द्रियगोचरातिक्रान्तत्वात् इति तत्सिद्धसाधनम् । यत्पुनरहंप्रत्ययेन तस्य मानसप्रत्यक्षत्वमनैकान्तिकमित्युक्तं तदसिद्धम् । अहं सुखी अहं दुःखीत्यन्तर्मुखस्य प्रत्ययस्य आत्मालम्बनतयैवोपपत्तेः । तथा चाहुः ।

सुखादि चेत्यमानं हि स्वतन्त्रं नानुभूयते ।
मतुबर्थानुवेधात्तु सिद्धं ग्रहणमात्मनः ॥
इदं सुखमिति ज्ञानं दृश्यते न घटादिवत् ।
अहं सुखीति तु ज्ञप्तिरात्मनोऽपि प्रकाशिका ॥

यत्पुनरहं गौरः अहं श्याम इत्यादिबहिर्मुखः प्रत्ययः स खल्वात्मोपकारकत्वेन लक्षणया शरीरे प्रयुज्यते । यथा प्रियभृत्येऽहमिति व्यपदेशः । यच्चाहंप्रत्ययस्य कादाचित्कत्वं तत्रेयं वासना । आत्मा तावदुपयोगलक्षणः । स च साकारानाकारोपयोगयोरन्यतरस्मिन्नियमेनोपयुक्त एव भवति । अहंप्रत्ययोऽपि चोपयोगविशेष एव । तस्य च कर्मक्षयोपशमवैचित्र्यादिन्द्रियानिन्द्रियालोकविषयादिनिमित्तसव्यपेक्षतया प्रवर्तमानस्य कादाचित्कत्वमुपपन्नमेव । यथा बीजं सत्यामप्यङ्कुरोपजननशक्तौ पृथिव्युदकादिसहकारिकारणकलाप-

समवहितमेवाङ्कुरं जनयति नान्यथा । न चैतावता तस्याङ्कुरोत्पादने कादाचित्केऽपि तदुत्पादनशक्तिरपि कादाचित्की । तस्याः कथंचिन्नित्यत्वात् । एवमात्मनः सदा सन्निहितत्वेऽप्यहंप्रत्ययस्य कादाचित्कत्वम् । यदप्युक्तं तस्याव्यभिचारि लिङ्गं किमपि नोपलभ्यते इति तदप्यसारम् । साध्याविनाभाविनोऽनेकस्य लिङ्गस्य तत्रोपलब्धेः । तथा हि । रूपाद्युपलब्धिः सकर्तृका । क्रियात्वात् । छिदिक्रियावत् । यश्चास्याः कर्ता स आत्मा । न चात्र चक्षुरादीनां कर्तृत्वम् । तेषां कुठारादिवत् करणत्वेनास्वतन्त्रत्वात् । करणत्वं चैषां पौद्गलिकत्वेनाचेतनत्वात् । परप्रेर्यत्वात् । प्रयोक्तृव्यापारनिरपेक्षप्रवृत्त्यभावात् । यदीन्द्रियाणामेव कर्तृत्वं स्यात्तदा तेषु विनष्टेषु पूर्वानुभूतार्थस्मृतेर्मया दृष्टं स्पृष्टम् आघ्रातम् आस्वादितं श्रुतमिति प्रत्ययानामेककर्तृकत्वप्रतिपत्तेश्च कुतः संभवः । किंच इन्द्रियाणां स्वस्वविषयनियतत्वेन रूपरसयोः साहचर्यप्रतीतौ न सामर्थ्यम् । अस्ति च तथाविधफलादे रूपग्रहणानन्तरं तत्सहचरितरसानुस्मरणम् । दन्तोदकसंप्लवान्यथानुपपत्तेः । तस्मादुभयोर्गवाक्षयोरन्तर्गतः प्रेक्षक इव द्वाभ्यामिन्द्रियाभ्यां रूपरसयोर्दर्शी कश्चिदेकोऽनुमीयते । तस्मात्करणान्येतानि । यश्चैषां व्यापारयिता स आत्मा । तथा साधनोपादानपरिवर्जनद्वारेण हिताहितप्राप्तिपरिहारसमर्था चेष्टा प्रयत्नपूर्विका । विशिष्टक्रियात्वात् । रथक्रियावत् । शरीरं च प्रयत्नवदधिष्ठितम् । विशिष्टक्रियाश्रयत्वात् रथवत् यश्चास्याधिष्ठाता स आत्मा । सारथिवत् । तथात्रैव पक्षे इच्छापूर्वकविकृतवाय्वाश्रयत्वात् । भस्त्रावत् । वायुश्च प्राणापानादिश्चास्याधिष्ठाता स आत्मा । भस्त्राध्मापयितृवत् । तथा अत्रैव पक्षे इच्छाधीननिमेषोन्मेषवदवयवयोगित्वात् । दारुयन्त्रवत् । तथा शरीरस्य वृद्धिक्षतभग्नसंरोहणं च प्रयत्नवत्कृतम् । वृद्धिक्षतभग्नसंरोहणत्वात् । गृहवृद्धिक्षतभग्नसंरो-

हणवत् । वृक्षादिगतेन वृद्ध्यादिना व्यभिचार इति चेत् न । तेषामपि एकेन्द्रियजन्तुत्वेन सात्मकत्वात् । यश्चैषां कर्ता स आत्मा । गृहपतिवत् । वृक्षादीनां च सात्मकत्वमाचाराङ्गादेरवसेयम् । किंचिद्वक्ष्यते च । तथा प्रेर्यं मनः । अभिमतविषयसंबन्धनिमित्तक्रियाश्रयत्वात् । दारकहस्तगतगोलकवत् । यश्चास्य प्रेरकः स आत्मा इति । तथा आत्मचेतनक्षेत्रज्ञजीवपुरुषादयः पर्याया न निर्विषयाः । पर्यायत्वात् । घटकुटकलशादिपर्यायवत् । व्यतिरेके षष्ठभूतादि । यश्चैषां विषयः स आत्मा । तथा अस्त्यात्मा । असमस्तपर्यायवाच्यत्वात् । यो यः साङ्केतिकशुद्धपर्यायवाच्यः स सोऽस्तित्वं न व्यभिचरति । यथा घटादि । व्यतिरेके खरविषाणनभोम्भोरुहादयः । तथा सुखादीनि द्रव्याश्रितानि गुणत्वात् रूपवत् । योऽसौ गुणी स आत्मा । इत्यादिलिङ्गानि । तस्मादनुमानतोऽप्यात्मा सिद्धः ॥ आगमानां च येषां पूर्वापरविरुद्धार्थत्वं तेषामप्रामाण्यमेव । यस्त्वाप्तप्रणीत आगमः स प्रमाणमेव । कषच्छेदतापलक्षणोपाधित्रयविशुद्धत्वात् । कषादीनां च स्वरूपं पुरस्ताद्वक्ष्यामः । न च वाच्यमाप्तः क्षीणसर्वदोषः तथाविधं चाप्तत्वं कस्यापि नास्तीति । यतो रागादयः कस्यचिदत्यन्तमुच्छिद्यन्ते । अस्मदादिषु तदुच्छेदप्रकर्षापकर्षोपलम्भात् । सूर्याद्यावरकजलदपटलवत् । तथा चाहुः ।

देशतो नाशिनो भावा दृष्टा निखिलनश्वराः ।
मेघपङ्क्त्यादयो यद्वदेवं रागादयो मताः ॥

इति । यस्य च निरवयवतयैते विलीनाः स एवाप्तो भगवान् सर्वज्ञः । अथानादित्वाद्रागादीनां कथं प्रक्षय इति चेन्न । उपायतस्तद्भावात् । अनादेरपि सुवर्णमलस्य क्षारमृत्पुटपाकादिना विलयोपलम्भात् । तद्वदेवानादीनामपि रागादिदोषाणां प्रतिपक्षभूतरत्नत्रया-

भ्यासेन विलयोपपत्तेः । क्षीणदोषस्य च केवलज्ञानाव्यभिचारात्सर्वज्ञत्वम् । तत्सिद्धिस्तु ज्ञानतारतम्यं क्वचिद्विश्रान्तं तारम्यत्वात् आकाशपरिमाणतारतम्यवत् । तथा सूक्ष्मान्तरितदूरार्थाः कस्यचित्प्रत्यक्षा अनुमेयत्वात् क्षितिधरकन्धराधिकरणधूमध्वजवत् । एवं चन्द्रसूर्योपरागादिसूचकज्योतिर्ज्ञानाविसंवादान्यथानुपपत्तिप्रभृतयोपि हेतवो वाच्याः । तदेवमाप्तेन सर्वविदा प्रणीत आगमः प्रमाणमेव । तदप्रामाण्यं हि प्रणायकदोषनिबन्धनम् ।

रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम् ।
यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात् ॥

इति वचनात् । प्रणेतुश्च निर्दोषत्वमुपपादितमेवेति सिद्ध आगमादप्यात्मा । एगे आया इत्यादिवचनात् ॥ तदेवं प्रत्यक्षानुमानागमैः सिद्धः प्रमाता ॥

प्रमेयं चानन्तरमेव बाह्यार्थसाधने साधितम् । तत्सिद्धौ च प्रमाणं ज्ञानं प्रमेयाभावे कस्य ग्राहकमस्तु निर्विषयत्वादिति प्रलापमात्रम् । करणमन्तरेण क्रियासिद्धेरयोगात् । लवनादिषु तथादर्शनात् । यच्चात्र समकालमित्याद्युक्तं तत्र विकल्पद्वयमपि स्वीक्रियत एव । अस्मदादिप्रत्यक्षं हि समकालार्थाकलनकुशलम् । स्मरणमतीतार्थस्य ग्राहकम् । शब्दानुमाने च त्रैकालिकस्याप्यर्थस्य परिच्छेदके । निराकारं चैतद्द्वयमपि । न चातिप्रसङ्गः । स्वज्ञानावरणवीर्यान्तरायक्षयोपशमविशेषवशादेवास्य नैयत्येन प्रवृत्तेः । शेषविकल्पानामस्वीकार एव तिरस्कारः ॥

प्रमितिस्तु प्रमाणस्य फलं स्वसंवेदनसिद्धैव । न ह्यनुभवेप्युपदेशापेक्षा । फलं च द्विधा । आनन्तर्यपारंपर्यभेदात् । तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् । पारंपर्येण केवलज्ञानस्य तावत् फलमौदासीन्यम् । शेषप्रमाणानां तु हानोपादानोपेक्षा-

बुद्धयः ॥ इति सुव्यवस्थितं प्रमात्रादिचतुष्टयम् ॥

ततश्च

नासन्न सन्न सदसन्न चाप्यनुभयात्मकम् ।
चतुष्कोटिविनिर्मुक्तं तत्त्वमाध्यात्मिका विदुः ॥

इत्युन्मत्तभाषितम् ॥ किं चेदं प्रमात्रादीनामवास्तवत्वं शून्यवादिना वस्तुवृत्त्या तावदेष्टव्यम् । तच्चासौ प्रमाणादभिमन्यते अप्रमाणाद्वा । न तावदप्रमाणात् । तस्याकिंचित्करत्वात् । अथ प्रमाणात् । तन्न । अवास्तवत्वग्राहकं प्रमाणं सांवृतमसांवृतं वा स्यात् । यदि सांवृतं कथं तस्मादवास्तवाद्वास्तवस्य शून्यवादस्य सिद्धिः । तथा तदसिद्धौ च वास्तव एव समस्तोपि प्रमात्रादिव्यवहारः प्राप्तः । अथ तद्ग्राहकं प्रमाणं स्वयमसांवृतम् । तर्हि क्षीणा प्रमात्रादिव्यवहारावास्तवत्वप्रतिज्ञा । तेनैव व्यभिचारात् । तदेवं पक्षद्वयेपि इतो व्याघ्र इतस्तटीति न्यायेन व्यक्त एव परमार्थतः स्वाभिमतसिद्धिविरोधः ॥ इति काव्यार्थः ॥ १७ ॥

अधुना क्षणिकवादिन ऐहिकामुष्मिकव्यवहारानुपपन्नार्थसमर्थनमविमृश्यकारितं दर्शयन्नाह ।

कृतप्रणाशाकृतकर्मभोग-
भवप्रमोक्षस्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ-
न्नहो महासाहसिकः परस्ते ॥ १८ ॥

कृतप्रणाशदोषमकृतकर्मभोगदोषं भवभङ्गदोषं प्रमोक्षभङ्गदोषं स्मृतिभङ्गदोषमित्येतान् । साक्षादित्यनुभवासिद्धान् । उपेक्ष्य अनादृत्य । साक्षात्कुर्वन्नपि गजनिमीलिकामवलम्बमानः । क्षणभङ्गम् उदया-

नन्तरविनाशरूपक्षणक्षयिताम् । इच्छन् प्रतिपद्यमानः। ते तव । परः प्रतिपक्षः वैनाशिकः सौगत इत्यर्थः । अहो महासाहसिकः । सहसा अविमर्शात्मकेन बलेन वर्तते साहसिकः । भाविनमनर्थमविभाव्य यः प्रवर्तते स एवमुच्यते । महांश्चासौ साहसिकश्च महासाहसिकः अत्यन्तमविमृश्य प्रवृत्तिकारी । इति मुकुलितार्थः ॥

विवृतार्थस्त्वयम्। बौद्धा बुद्धिक्षणपरंपरामात्रमेवात्मानमामनन्ति न पुनर्मौक्तिककणनिकरानुस्यूतैकसूत्रवत्तदन्वयिनमेकम्।तन्मते येन ज्ञानक्षणेन सदनुष्ठानमसदनुष्ठानं वा कृतं तस्य निरन्वयविनाशान्न तत्फलोपभोगः यस्य च फलोपभोगस्तेन तत्कर्म न कृतमिति प्राच्यज्ञानक्षणस्य कृतप्रणाशः स्वकृतकर्मफलानुपभोगात् उत्तरज्ञानक्षणस्य चाकृतकर्मभोगः स्वयमकृतस्य कर्मणः फलोपभोगादिति । अत्र कर्मशब्दः उभयत्रापि योज्यः । तेन कृतप्रणाश इत्यस्य कृतकर्मप्रणाश इत्यर्थो द्रष्टव्यः।बन्धानुलोम्याच्चेत्थमुपन्यासः।।तथा भवभङ्गदोषः।भव आजवीभावलक्षणः संसारः तस्य भङ्गो विलोपः स एव दोषः क्षणिकवादे प्रसज्यते । परलोकाभावप्रसङ्ग इत्यर्थः । परलोकिनः कस्यचिदभावात् । परलोको हि पूर्वजन्मकृतकर्मानुसारेण भवति। तच्च प्राचीनज्ञानक्षणानां निरन्वयं नाशात् केन नामोपभुज्यतां जन्मान्तरे। यच्च मोक्षाकरगुप्तेन यच्चित्तं तच्चित्तान्तरं प्रतिसंधत्ते यथेदानीन्तनं चित्तं चित्तं च मरणकालभावि इति भवपरंपरासिद्धये प्रमाणमुक्तं तद्व्यर्थम् । चित्तक्षणानां निरवशेषनाशिनां चित्तान्तरप्रतिसंधानायोगात् । द्वयोरवस्थितयोर्हि प्रतिसंधानमुभयानुगामिना केनचित्क्रियते । यश्चानयोः प्रतिसंधाता स तेन नाभ्युपगम्यते। स ह्यात्माऽन्वयी। न च प्रतिसंधत्ते इत्यस्य जनयतीत्यर्थः । कार्यहेतुप्रसङ्गात् । तेन वादिनाऽस्य हेतोः स्वभावहेतुत्वेनोक्तत्वात् । स्वभावहेतुश्च तादात्म्ये सति भवति । भिन्नकालभाविनोश्च-

चित्तचित्तान्तरयोः कुतस्तादात्म्यम् । युगपद्भाविनोश्च प्रतिसंधेयप्रतिसंधायकत्वाभावापत्तिः । युगपद्भावित्वेऽविशिष्टेपि किमत्र नियामकं यदेकः प्रतिसंधायकोऽपरश्च प्रतिसंधेय इति । अस्तु वा प्रतिसंधानस्य जननमर्थः । सोप्यनुपपन्नः । तुल्यकालत्वे हेतुफलभावस्याभावात् । भिन्नकालत्वे च पूर्वचित्तक्षणस्य विनष्टत्वात् उत्तरचित्तक्षणः कथमुपादानमन्तरेणोत्पद्यताम्। इति यत्किंचिदेतत्॥ तथा प्रमोक्षभङ्गदोषः। प्रकर्षेणापुनर्भावेन कर्मबन्धनान्मुक्तिः प्रमोक्षः तस्यापि भङ्गः प्राप्नोति । तन्मते तावदात्मैव नास्ति कः प्रेत्य सुखीभवनार्थं यतिष्यते । ज्ञानक्षणोपि संसारी कथमपरज्ञानक्षणसुखीभवनाय घटिष्यते । न हि दुःखी देवदत्तो यज्ञदत्तसुखाय चेष्टमानो दृष्टः। क्षणस्य तु दुःखं स्वरसनाशित्वात्तेनैव सार्धं दध्वंसे। संतानस्तु न वास्तवः कश्चित् । वास्तवत्वे तु आत्माभ्युपगमप्रसङ्गः। अपि च बौद्धा निखिलवासनोच्छेदे विगतविषयाकारोपप्लवविशुद्धज्ञानोत्पादो मोक्ष इत्याहुस्तच्च न घटते। कारणाभावादेव तदनुपपत्तेः। भावनाप्रचयो हि तस्य कारणमिष्यते। स च स्थिरैकाश्रयाभावाद्विशेषानाधायकः प्रतिक्षणमपूर्ववदुपजायमानो निरन्वयविनाशी गगनलङ्घनाभ्यासवदनासादितप्रकर्षो न स्फुटाभिज्ञानजननाय प्रभवतीत्यनुपपत्तिरेव तस्य। समलचित्तक्षणानां स्वाभाविक्याः सदृशारम्भणशक्तेरसदृशारम्भं प्रत्यशक्तेश्चाकस्मादनुच्छेदात् । किं च समलचित्तक्षणाः पूर्वं स्वरसपरिनिर्वाणाः अयमपूर्वो जातः संतानश्चैको न विद्यते बन्धमोक्षौ चैकाधिकरणौ न विषयभेदेन वर्तेते तत्कस्येयं मुक्तिर्य एतदर्थं प्रयतते । अयं हि मोक्षशब्दो बन्धनविच्छेदपर्यायः । मोक्षश्च तस्यैव घटते यो बद्धः । क्षणक्षयवादे त्वन्यः क्षणो बद्धः क्षणान्तरस्य मुक्तिरिति मोक्षाभावः प्राप्नोति ॥ तथा स्मृतिभङ्गदोषः । तथा

हि पूर्वबुद्ध्यानुभूतेऽर्थे नोत्तरबुद्धीनां स्मृतिः संभवति । ततोऽन्यत्वात् । संतानान्तरबुद्धिवत् । न ह्यन्यदृष्टोऽर्थोऽन्येन स्मर्यते । अन्यथा एकेन दृष्टोऽर्थः सर्वैः स्मर्येत । स्मरणाभावे च कौतस्कुती प्रत्यभिज्ञाप्रसूतिः । तस्याः स्मरणानुभवोभयसंभवत्वात् । पदार्थप्रेक्षणप्रबुद्धप्राक्तनसंस्कारस्य हि प्रमातुः स एवायमित्याकारेणेयमुत्पद्यते । अथ स्यादयं दोषो यद्यविशेषेणान्यदृष्टमन्यः स्मरतीत्युच्यते । किंत्वन्यत्वेपि कार्यकारणभावादेव च स्मृतिः । भिन्नसंतानबुद्धीनां तु कार्यकारणभावो नास्ति तेन संतानान्तराणां स्मृतिर्न भवति । न चैकसांतानिकीनामपि बुद्धीनां कार्यकारणभावो नास्ति येन पूर्वबुद्ध्यनुभूतेर्थे तदुत्तरबुद्धीनां स्मृतिर्न स्यात् । तदप्यनवदातम् । एवमपि अन्यत्वस्य तदवस्थत्वात् । न हि कार्यकारणभावाभिधानेपि तदपगतम् । क्षणिकत्वेन सर्वासां भिन्नत्वात् । न हि कार्यकारणभावात्स्मृतिरित्यत्रोभयप्रसिद्धोस्ति दृष्टान्तः । अथ

यस्मिन्नेव हि संताने आहिता कर्मवासना ।
फलं तत्रैव संधत्ते कर्पासे रक्तता यथा ॥

इति कर्पासरक्ततादृष्टान्तोस्तीति चेत् तदसाधीयः । साधनदूषणयोरसंभवात् । तथा हि अन्वयाद्यसंभवान्न साधनम् । न हि कार्यकारणभावो यत्र तत्र स्मृतिः कर्पासे रक्ततावदित्यन्वयः संभवति । नापि यत्र न स्मृतिस्तत्र न कार्यकारणभाव इति व्यतिरेकोस्ति । असिद्धत्वाद्यनुद्भावनाच्च न दूषणम् । न हि ततोन्यत्वादित्यस्य हेतोः कर्पासे रक्ततावदित्यनेन कश्चिद्दोषः प्रतिपाद्यते । किंच यद्यन्यत्वेपि कार्यकारणभावेन स्मृतेरुत्पत्तिरिष्यते तदा शिष्याचार्यादिबुद्धीनामपि कार्यकारणभावसद्भावेन स्मृत्यादिः स्यात् । अथ नायं प्रसङ्गः एकसंतानत्वे सतीतिविशेषणादिति चेत्

तदप्ययुक्तम्। भेदाभेदपक्षाभ्यां तस्योपक्षीणत्वात्। क्षणपरंपरातस्तस्याभेदे हि क्षणपरंपरैव सा। तथा च संतान इति न किंचिदतिरिक्तमुक्तं स्यात्। भेदे त्वपारमार्थिकः पारमार्थिको वाऽसौ स्यात्। अपारमार्थिकत्वेऽस्य तदेव दूषणम्। अकिंचित्करत्वात्। पारमार्थिकत्वे स्थिरो वा स्यात् क्षणिको वा। क्षणिकत्वे संतानानिर्विशेष एवायमिति किमनेन स्तेनभीतस्य स्तेनान्तरशरणस्वीकरणानुकरणिना। स्थिरश्चेत् आत्मैव संज्ञाभेदतिरोहितः प्रतिपन्नः। इति न स्मृतिर्घटते क्षणक्षयवादिनाम्। तदभावे चानुमानस्यानुत्थानमित्युक्तं प्रागेव। अपि च स्मृतेरभावे निहितप्रत्युन्मार्गणप्रत्यर्पणादिव्यवहारा विशीर्येरन्।

इत्येकनवते कल्पे शक्त्या मे पुरुषो हतः।
तेन कर्मविपाकेन पादे विद्धोस्मि भिक्षवः॥

इति वचनस्य च का गतिः। एवमुत्पत्तिरुत्पादयति स्थितिः स्थापयति जरा जर्जरयति विनाशो नाशयति इति चतुःक्षणिकं वस्तु प्रतिजानाना अपि प्रतिक्षेप्याः। क्षणचतुष्कानन्तरमपि निहितप्रत्युन्मार्गणादिव्यवहाराणां दर्शनात्॥ तदेवमनेकदोषापातेपि यः क्षणभङ्गमभिप्रैति तस्य महत् साहसमिति काव्यार्थः ॥१८॥

अथ ताथागताः क्षणक्षयपक्षे सर्वव्यवहारानुपपत्तिं परैः सद्भावितामाकर्ण्येत्थं प्रतिपादयिष्यन्ति। यत्सर्वपदार्थानां क्षणिकत्वेपि वासनाबललब्धजन्मना ऐक्याध्यवसायेन ऐहिकामुष्मिकव्यवहारप्रवृत्तेः कृतप्रणाशादिदोषा निरवकाशा एवेति। तदाकूतं परिहर्तुकामस्तत्कल्पितवासनायाः क्षणपरंपरातो भेदाभेदानुभयलक्षणे पक्षत्रयेऽप्यघटमानत्वं दर्शयन् स्वाभिप्रेतभेदाभेदस्याद्वादमकामयमानानपि तानङ्गीकारयितुमाह।

सा वासना सा क्षणसंततिश्च
नाभेदभेदानुभयैर्घटेते ।
ततस्तटादर्शिशकुन्तपोत-
न्यायात्त्वदुक्तानि परे श्रयन्तु ॥ १९ ॥

सा शाक्यपरिकल्पिता त्रुटितमुक्तावलीकल्पानां परस्परविशकलितानां क्षणानामन्योन्यानुस्यूतप्रत्ययजनिका एकसूत्रस्थानीया संतानापरपर्याया वासना । वासनेति पूर्वज्ञानजनितामुत्तरज्ञाने शक्तिमाहुः । सा च क्षणसंततिस्तद्दर्शनप्रसिद्धा प्रदीपकलिकावन्नवनवोत्पद्यमानाऽपरापरसदृशक्षणपरंपरा । एते द्वे अपि अभेदभेदानुभयैर्न घटेते ॥ न तावदभेदेन तादात्म्येन ते घटेते । तयोर्हि अभेदे वासना वा स्यात् क्षणपरंपरा वा । न द्वयम् । यद्धि यस्मादभिन्नं न ततः पृथगुपलभ्यते यथा घटात् घटस्वरूपम् । केवलायां वासनायामन्वयिस्वीकारः। वास्याभावे च किं तया वासनीयमस्तु । इति तस्या अपि न स्वरूपमवतिष्ठते । क्षणपरंपरामात्राङ्गीकरणे च प्राञ्च एव दोषाः ॥ न च भेदेन ते युज्येते। सा हि भिन्ना वासना क्षणिका स्यादक्षणिका वा । क्षणिका चेत् तर्हि क्षणेभ्यस्तस्याः पृथक्कल्पनं व्यर्थम् । अक्षणिका चेदन्वयिपदार्थाभ्युपगमेनागमबाधः । तथा च पदार्थान्तराणां क्षणिकत्वकल्पनाप्रयासो व्यसनमात्रम् ॥ अनुभयपक्षेणापि न घटेते । स हि कदाचिदेवं ब्रूयात् नाहं वासनायाः क्षणश्रेणितोऽभेदं प्रतिपद्ये न च भेदं किं त्वनुभयमिति। तदप्यनुचितम्। भेदाभेदयोर्विधिनिषेधरूपयोरेकतरप्रतिषेधेऽन्यतरस्यावश्यं विधिभावादन्यतरपक्षाभ्युपगमः । तत्र च प्रागुक्त एव दोषः । अथवाऽनुभयरूपत्वेऽवस्तुत्वप्रसङ्गः । भेदाभेदलक्षणपक्षद्वयव्यतिरिक्तस्य मार्गान्तरस्यानस्तित्वात्। अनार्हतानां हि

वस्तुना भिन्नेन वा भाव्यमभिन्नेन वा। तदुभयातीतस्य वन्ध्यास्तनन्धयप्रायत्वात् । एवं विकल्पत्रयेपि क्षणपरंपरावासनयोरनुपपत्तौ पारिशेष्याद्भेदाभेदपक्ष एव कक्षीकरणीयः । न च प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न सः इति वचनादत्रापि दोषतादवस्थ्यमिति वाच्यम्।कुक्कुटसर्पनरसिंहादिवज्जात्यन्तरत्वादनेकान्तपक्षस्य । नन्वार्हतानां वासनाक्षणपरंपरयोरङ्गीकार एव नास्ति तत्कथं तदाश्रयभेदाभेदचिन्ता चरितार्था इति चेन्नैवम् । स्याद्वादवादिनामपि हि प्रतिक्षणं नवनवपर्यायपरंपरोत्पत्तिरभिमतैव ।तथा च क्षणिकत्वम्। अतीतानागतवर्तमानपर्यायपरंपरानुसंधायकं चान्वयि द्रव्यम्।तच्च वासनेतिसंज्ञान्तरभागपि अभिमतमेव। न खलु नामभेदाद्वादः कोपि कोविदानाम्। सा च प्रतिक्षणोत्पादिष्णुपर्यायपरंपरा अन्वयिद्रव्यात् कथंचिद्भिन्ना कथंचिदभिन्ना। तथा तदपि तस्याः स्याद्भिन्नं स्यादभिन्नम्। इति पृथक्प्रत्ययव्यपदेशविषयत्वाद्भेदः। द्रव्यस्यैव च तथा तथा परिणमनादभेदः। एतच्च सकलादेशविकलादेशव्याख्याने पुरस्तात्प्रपञ्चयिष्यामः ॥

अपि च बौद्धमते वासनापि तावन्न घटते इति निर्विषया तत्र भेदादिविकल्पचिन्ता। तल्लक्षणं हि पूर्वक्षणेनोत्तरक्षणस्य वास्यता। न चास्थिराणां भिन्नकालतयाऽन्योन्यासंबद्धानां च तेषां वास्यवासकभावो युज्यते । स्थिरस्य संबद्धस्य च वस्त्रादेर्मृगमदादिना वास्यत्वं दृष्टमिति । अथ पूर्वचित्तसहजाच्चेतनाविशेषात्पूर्वशक्तिविशिष्टं चित्तमुत्पद्यते सोऽस्यशक्तिविशिष्टचित्तोत्पादो वासना । तथा हि पूर्वचित्तं रूपादिविषयं प्रवृत्तिविज्ञानं यत् तत् षड्विधम् । पञ्च रूपादिविज्ञानान्यविकल्पकानि षष्ठं च विकल्पविज्ञानम् । तेन सह जातः समानकालश्चेतनाविशेषोऽहंकारास्पदमालयविज्ञानम् । तस्मात्पूर्वशक्तिविशिष्टचित्तोत्पादो वासनेति । तदपि न । अस्थि-

रत्वाद्वासकेनासंबन्धाच्च । यश्चासौ चेतनाविशेषः पूर्वचित्तसहभावी स न वर्तमाने चेतस्युपकारं करोति । वर्तमानस्याशक्यापनेयोपनेयत्वेनाविकार्यत्वात् । तद्धि यथाभूतं जायते तथाभूतं विनश्यतीति । नाप्यनागत उपकारं करोति । तेन सहासंबद्धत्वात् । असंबद्धं च न भावयतीत्युक्तम् । तस्मात् सौगतमते वासनापि न घटते । अत्र च स्तुतिकारेणाभ्युपेत्यापि तामन्वयिद्रव्यस्थापनाय भेदाभेदादिचर्चा विरचितेति भावनीयम् ॥

अथोत्तरार्धव्याख्या । तत इति ॥ पक्षत्रयेपि दोषसद्भावात् त्वदुक्तानि भवद्वचनानि भेदाभेदस्याद्वादसंवादपूतानि परे कुतीर्थ्याः प्रकरणान्मायासूनवीयाः श्रयन्तु आद्रियन्ताम् । अत्रोपमानमाह तटादर्शीत्यादि । तटं न पश्यतीति तटादर्शी यः शकुन्तपोतः पक्षिशावकः तस्य न्यायः उदाहरणं तस्मात् । यथा किल कथमप्यपारपारावारान्तःपतितः काकादिशकुनिशावको बहिर्निर्जिगमिषया प्रवहणकूपस्तम्भादेस्तटप्राप्तये मुग्धतयोड्डीनः समन्ताज्जलैकार्णवमेवावलोकयंस्तटमदृष्ट्वैव निर्वेदाद्व्यावृत्य तदेव कूपस्तम्भादिस्थानमाश्रयते गत्यन्तराभावादेवं तेपि कुतीर्थ्याः प्रागुक्तपक्षत्रयेपि वस्तुसिद्धिमनासादयन्तस्त्वदुक्तमेव चतुर्थं भेदाभेदपक्षमनिच्छयापि कक्षीकुर्वाणास्त्वच्छासनमेव प्रतिपद्यन्ताम् । न हि स्वस्य बलविकलतामाकलय्य बलीयसः प्रभोः शरणाश्रयणं दोषपोषाय नीतिशालिनाम् । त्वदुक्तानीति बहुवचनं सर्वेषामपि तन्त्रान्तरीयाणां पदे पदेऽनेकान्तवादप्रतिपत्तिरेव यथावस्थितपदार्थप्रतिपादनौपयिकं नान्यादिति ज्ञापनार्थम् । अनन्तधर्मात्मकस्य सर्वस्य वस्तुनः सर्वनयात्मकेन स्याद्वादेन विना यथावद्ग्रहीतुमशक्यत्वात् । इतरथान्धगजन्यायेन पल्लवग्राहिताप्रसङ्गात् ॥ श्रयन्तीति वर्तमानान्तं केचित्पठन्ति तथा-

प्यदोषः ॥ अत्र च समुद्रस्थानीयः संसारः । पोतसमानं त्वच्छासनम् । कूपस्तम्भसंनिभः स्याद्वादः । पक्षिपोतोपमा वादिनः । ते च स्वाभिमतपक्षप्ररूपणोड्डयनेन मुक्तिलक्षणतटप्राप्तये कृतप्रयत्ना अपि तस्मादिष्टार्थसिद्धिमपश्यन्तो व्यावृत्य स्याद्वादरूपकूपस्तम्भालङ्कृततावकीनशासनप्रवहणोपसर्पणमेव यदि शरणीकुर्वते तदा तेषां भवार्णवाद्बहिर्निष्क्रमणमनोरथः सफलतां कलयति नापरथेति काव्यार्थः ॥ १९ ॥

एवं क्रियावादिनां प्रावादुकानां कतिपयकुग्रहनिग्रहं विधाय सांप्रतमक्रियावादिनां लौकायतिकानां मतं सर्वाधमत्वादन्ते उपन्यस्यन् तन्मतमूलस्य प्रत्यक्षप्रमाणस्यानुमानादिप्रमाणान्तरानङ्गीकारेऽकिञ्चित्करत्वप्रदर्शनेन तेषां प्रज्ञायाः प्रमादमादर्शयति ।

विनानुमानेन पराभिसंधि-
मसंविदानस्य तु नास्तिकस्य ।
न सांप्रतं वक्तुमपि क्व चेष्टा
क्व दृष्टमात्रं च हहा प्रमादः ॥ २० ॥

प्रत्यक्षमेवैकं प्रमाणमिति मन्यते चार्वाकः । तत्र संनह्यते ॥ अनु पश्चाद् लिङ्गसंबन्धग्रहणस्मरणानन्तरं मीयते परिच्छिद्यते देशकालस्वभावविप्रकृष्टोर्थोनेन ज्ञानविशेषेणेत्यनुमानम् । प्रस्तावात् स्वार्थानुमानम् । तेनानुमानेन लैङ्गिकप्रमाणेन विना पराभिसंधिं पराभिप्रायम् असंविदानस्य सम्यगजानानस्य । तुशब्दः पूर्ववादिभ्यो भेदद्योतनार्थः । पूर्वेषां वादिनामास्तिकतया विप्रतिपत्तिस्थानेषु क्षोदः कृतः नास्तिकस्य तु वक्तुमपि नौचिती कुत एव तेन सह क्षोद इति तुशब्दार्थः । नास्ति परलोकः पुण्यं पापमिति वा मतिरस्य ।

नास्तिकास्तिकदैष्टिकम् इति निपातनान्नास्तिकः। तस्य नास्तिकस्य लौकायतिकस्य । वक्तुमपि न सांप्रतम् वचनमप्युच्चारयितुं नोचितम् । ततस्तूष्णींभाव एवास्य श्रेयान् । दूरे प्रामाणिकपरिषदि प्रविश्य प्रमाणोपन्यासगोष्ठी । वचनं हि परप्रत्यायनाय प्रतिपाद्यते । परेण चाप्रतिपित्सितमर्थं प्रतिपादयन्नासौ सतामवधेयवचनो भवत्युन्मत्तवत् । ननु कथमिव तूष्णीकतैवास्य श्रेयसी यावता चेष्टाविशेषादिना प्रतिपाद्यस्याभिप्रायमनुमाय सुकरमेवानेन वचनोच्चारणमित्याशङ्क्याह क्व चेष्टा क्व दृष्टमात्रं च इति । क्वेति बृहदन्तरे । चेष्टा इङ्गितम् । पराभिप्रायरूपस्यानुमेयस्य लिङ्गम् । क्व च दृष्टमात्रम् । दर्शनं दृष्टम् । भावे क्तः। दृष्टमेव दृष्टमात्रम् प्रत्यक्षमात्रम् । तस्य लिङ्गनिरपेक्षप्रवृत्तित्वात् । अत एव दूरमन्तरमेतयोः । न हि प्रत्यक्षेणातीन्द्रियाः परचेतोवृत्तयः परिज्ञातुं शक्याः । तस्यैन्द्रियकत्वात् । मुखप्रसादादिचेष्टया तु लिङ्गभूतया पराभिप्रायस्य निश्चये अनुमानप्रमाणमनिच्छतोपि तस्य बलादापतितम् । तथा हि । मद्वचनश्रवणाभिप्रायवानयं पुरुषः । तादृग्मुखप्रसादादिचेष्टाऽन्यथानुपपत्तेरिति । अतश्च हहा प्रमादः । हहा इति खेदे । अहो तस्य प्रमादः प्रमत्तता यदनुभूयमानमप्यनुमानं प्रत्यक्षमात्राङ्गीकारेणापह्नुते । अत्र संपूर्वस्य वेत्तेरकर्मकत्व एवात्मनेपदम् अत्र तु कर्मास्ति तत्कथमत्रानश् । अत्रोच्यते । अत्र संवेदितुं शक्तः संविदान इति कार्यम् । वयःशक्तिशीले इति शक्तौ शानविधानात् । ततश्चायमर्थः । अनुमानेन विना पराभिसंहितं सम्यग्वेदितुमशक्तस्येति । एवं परबुद्धिज्ञानान्यथानुपपत्त्याऽयमनुमानं हठादङ्गीकारितः । तथा प्रकारान्तरेणाप्ययमङ्गीकारयितव्यः। तथा हि । चार्वाकः काश्चिज्ज्ञानव्यक्तीः संवादित्वेनाव्यभिचारिणीरुपलभ्यान्याश्च विसंवादित्वेन व्यभिचारिणीः पुनः

कालान्तरे तादृशीतराणां ज्ञानव्यक्तीनामवश्यं प्रमाणतेतरते व्यवस्थापयेत् । न च संनिहितार्थबलेनोत्पद्यमानं पूर्वापरपरामर्शशून्यं प्रत्यक्षं पूर्वापरकालभाविनीनां ज्ञानव्यक्तीनां प्रामाण्याप्रामाण्यव्यवस्थापकं निमित्तमुपलक्षयितुं क्षमते । न चायं स्वप्रतीतिगोचराणामपि ज्ञानव्यक्तीनां परं प्रति प्रामाण्यमप्रामाण्यं वा व्यवस्थापयितुं प्रभवति । तस्माद्यथादृष्टज्ञानव्यक्तिसाधर्म्यद्वारेणेदानीन्तनज्ञानव्यक्तीनां प्रामाण्याप्रामाण्यव्यवस्थापकं परप्रतिपादकं च प्रमाणान्तरमनुमानरूपमुपासीत । परलोकादिनिषेधश्च न प्रत्यक्षमात्रेण शक्यः कर्तुम् । संनिहितमात्रविषयत्वात्तस्य । परलोकादिकं चाप्रतिषिध्य नायं सुखमास्ते प्रमाणान्तरं च नेच्छतीति डिम्भहेवाकः ॥ किंच प्रत्यक्षस्याप्यर्थाव्यभिचारादेव प्रामाण्यम् । कथमितरथा स्नानपानावगाहनाद्यर्थक्रियाऽसमर्थे मरुमरीचिकानिचयचुम्बिनि जलज्ञाने न प्रामाण्यम् । तच्च अर्थप्रतिबद्धलिङ्गशब्दद्वारा समुन्मज्जतोरनुमानागमयोरप्यर्थाव्यभिचारादेव किं नेष्यते । व्यभिचारिणोरप्यनयोर्दर्शनादप्रामाण्यमिति चेत् । प्रत्यक्षस्यापि तिमिरादिदोषान्निशीथिनीनाथयुगलावलम्बिनोऽप्रमाणस्य दर्शनात्सर्वत्राप्रामाण्यप्रसङ्गः । प्रत्यक्षाभासं तदिति चेत् इतरत्रापि तुल्यमेतदन्यत्र पक्षपातात् । एवं च प्रत्यक्षमात्रेण वस्तुव्यवस्थानुपपत्तेः । तन्मूला जीवपुण्यापुण्यपरलोकनिषेधादिवादा अप्रमाणमेव ॥ एवं नास्तिकाभिमतो भूतचिद्वादोपि निराकार्यः । तथा च द्रव्यालङ्कारकार उपयोगवर्णने । न चायं भूतधर्मः । सत्त्वकठिनत्वादिवत् मद्याङ्गेषु भ्रम्यादिमदशक्तिवद्वा प्रत्येकमनुपलम्भात् । अनभिव्यक्तावात्मासिद्धिः । कायाकारपरिणतेभ्यस्तेभ्यः स उत्पद्यत इति चेत् कायपरिणामोपि तन्मात्रभावी न कादाचित्कः । अन्यस्त्वात्मैव स्यात् । अहेतुत्वे न देशादि-

नियमः । मृतादपि च स्यात् । शोणिताद्युपाधिः सुप्तादावप्यस्ति। न च सतस्तस्योत्पत्तिः । भूयोभूयः प्रसङ्गात् । अलब्धात्मनश्च प्रसिद्धमर्थक्रियाकारित्वं विरुध्येत । असतः सकलशक्तिविकलस्य कथमुत्पत्तौ कर्तृत्वम् । अन्यस्यापि प्रसङ्गात् । तन्न भूतकार्यमुपयोगः । कुतस्तर्हि सुप्तोत्थितस्य तदुदयः । असंवेदनेन चैतन्यस्याभावात् । न । जाग्रदवस्थानुभूतस्य स्मरणात् । असंवेदनं तु निद्रोपघातात् । कथं तर्हि कायविकृतौ चैतन्यविकृतिः । नैकान्तः । श्वित्रादिना कश्मलवपुषोपि बुद्धिशुद्धेः। अविकारे च भावनाविशेषतः प्रीत्यादिभेददर्शनात्।शोकादिना बुद्धिविकृतौ कायविकारादर्शनाच्च। परिणामिना विना च न कार्योत्पत्तिः । न च भूतान्येव तथा परिणमन्ति । विजातीयत्वात् । काठिन्यादेरनुपलम्भात् । अणव एवेन्द्रियग्राह्यत्वरूपां स्थूलतां प्रतिपद्यन्ते तज्जात्यादि चोपलभ्यते । तन्न भूतानां धर्मः फलं वा उपयोगः । तथा भवांश्च यदाक्षिपति तदस्य लक्षणम् । स चात्मा स्वसंविदितः । भूतानां तथाभावे बहिर्मुखं स्यात् । गौरोऽहमित्यादि तु नान्तर्मुखम् । बाह्यकरणजन्यत्वात् ।। अनभ्युपगतानुमानप्रामाण्यस्य चात्मनिषेधोपि दुर्लभः ।

धर्मः फलं च भूतानामुपयोगा भवेद्यदि ।
प्रत्येकमुपलम्भः स्यादुत्पादो वा विलक्षणात् ।।

इति काव्यार्थः ।

एवमुक्तयुक्तिभिरेकान्तवादप्रतिक्षेपमाख्याय सांप्रतमनाद्यविद्यावासनाप्रवासितसन्मतयः प्रत्यक्षोपलक्ष्यमाणमप्यनेकान्तवादं येवमन्यन्ते तेषामुन्मत्ततामाविर्भावयन्नाह ।

प्रतिक्षणोत्पादविनाशयोगि-
स्थिरैकमध्यक्षमपीक्षमाणः ।

जिन त्वदाज्ञामवमन्यते यः
स वातकी नाथ पिशाचकी वा ॥२१॥

प्रतिक्षणं प्रतिसमयम्। उत्पादेन उत्तराकारस्वीकाररूपेण विनाशेन च पूर्वाकारपरिहारलक्षणेन युज्यत इत्येवंशीलं प्रतिक्षणोत्पादविनाशयोगि। किं तत्। स्थिरैकं कर्मतापन्नम्। स्थिरमुत्पादविनाशयोरनुयायित्वात्त्रिकालवर्ति यदेकं द्रव्यं स्थिरैकम्। एकशब्दोत्र साधारणवाची। उत्पादे विनाशे च तत्साधारणम्। अन्वयिद्रव्यत्वात्। यथा चैत्रमैत्रयोरेका जननी साधारणेत्यर्थः। इत्थमेव हि तयोरेकाधिकरणता। पर्यायाणां कथंचिदनेकत्वेपि तस्य कथंचिदेकत्वात्। एवं त्रयात्मकं वस्त्वध्यक्षमपीक्षमाणः प्रत्यक्षमवलोकयन्नपि। हे जिन रागादिजैत्र। त्वदाज्ञाम् आ सामस्त्येनानन्तधर्मविशिष्टतया ज्ञायन्ते अवबुद्ध्यन्ते जीवाजीवादयः पदार्था यया साज्ञा आगमः शासनम् तवाज्ञा त्वदाज्ञा तां त्वदाज्ञां भवत्प्रणीतस्याद्वादमुद्राम्। यः कश्चिदविवेक्यवमन्यते अवजानाति। जात्यपेक्षमेकवचनम् अवज्ञया वा। स पुरुषपशुः वातकी पिशाचकी वा। वातो रोगविशेषोऽस्यास्तीति वातकी वातकीव वातकी वातूल इत्यर्थः। एवं पिशाचकीव पिशाचकी भूताविष्ट इत्यर्थः। अत्र वाशब्दः समुच्चयार्थ उपमानार्थो वा। स पुरुषापसदो वातकिपिशाचकिभ्यामधिरोहति तुलामित्यर्थः। वातातीसारपिशाचात्कश्चान्तः इत्यनेन मत्वर्थीयः कश्चान्तः। एवं पिशाचकीत्यपि। यथा किल वातेन पिशाचेन वाक्रान्तवपुर्वस्तुतत्त्वं साक्षात्कुर्वन्नपि तदावेशवशादन्यथा प्रतिपद्यते एवमयमप्येकान्तवादापस्मारपरवश इति॥

अत्र च जिनेति साभिप्रायम्। रागादिजेतृत्वाद्धि जिनः। ततश्च यः किल विगलितदोषकालुष्यतयावधेयवचनस्यापि तत्रभवतः

शासनमवमन्यते तस्य कथं नोन्मत्ततेति भावः। नाथ हे स्वामिन्। अलब्धस्य सम्यग्दर्शनादेर्लम्भकतया लब्धस्य च तस्यैव निरतिचारपरिपालनोपदेशदायितया च योगक्षेमकरत्वोपपत्तेर्नाथः। तस्यामन्त्रणम्।

वस्तुतत्त्वं चोत्पादव्ययध्रौव्यात्मकम्। तथा हि। सर्वं वस्तु द्रव्यात्मना नोत्पद्यते विपद्यते वा। परिस्फुटमन्वयदर्शनात्। लूनपुनर्जातनखादिष्वन्वयदर्शनेन व्यभिचार इति न वाच्यम्। प्रमाणेन बाध्यमानस्यान्वयस्यापरिस्फुटत्वात्। न च प्रस्तुतोन्वयः प्रमाणविरुद्धः। सत्यप्रत्यभिज्ञानसिद्धत्वात्।

सर्वव्यक्तिषु नियतं क्षणे क्षणेऽन्यत्वमथ च न विशेषः।
सत्योश्चित्यपचित्योराकृतिजातिव्यवस्थानात्॥

इति वचनात्। ततो द्रव्यात्मना स्थितिरेव सर्वस्य वस्तुनः। पर्यायात्मना तु सर्वं वस्तूत्पद्यते विपद्यते च। अस्खलितपर्यायानुभवसद्भावात्। न चैवं शुक्ले शङ्खे पीतादिपर्यायानुभवेन व्यभिचारः। तस्य स्खलद्रूपत्वात्। न खलु सोस्खलद्रूपो येन पूर्वाकारविनाशाजहद्वृत्तोत्तराकारोत्पादाविनाभावी भवेत्। न च जीवादौ वस्तुनि हर्षामर्षौदासीन्यादिपर्यायपरंपरानुभवः स्खलद्रूपः। कस्यचिद् बाधकस्याभावात्। ननूत्पादादयः परस्परं भिद्यन्ते न वा। यदि भिद्यन्ते कथमेकं वस्तु त्र्यात्मकम्। न भिद्यन्ते चेत् तथापि कथमेकं त्रयात्मकम्। तथा च।

यद्युत्पादादयो भिन्नाः कथमेकं त्रयात्मकम्।
अथोत्पादादयोऽभिन्नाः कथमेकं त्रयात्मकम्॥

इति चेत्। तदयुक्तम्। कथंचिद्भिन्नलक्षणत्वेन तेषां कथंचिद्भेदाभ्युपगमात्। तथा हि। उत्पादविनाशध्रौव्याणि स्याद्भिन्नानि भिन्नलक्षणत्वात् रूपादिवदिति। न च भिन्नलक्षणत्वम-

सिद्धम् । असत आत्मलाभः सतः सत्तावियोगो द्रव्यरूपतयानुवर्तनं च खलूत्पादादीनां परस्परमसङ्कीर्णानि लक्षणानि सकललोकसाक्षिकाण्येव ॥ न चामी भिन्नलक्षणा अपि परस्परानपेक्षाः खपुष्पवदसत्त्वापत्तेः । तथाहि । उत्पादः केवलो नास्ति । स्थितिविगमरहितत्वात् कूर्मरोमवत् । तथा विनाशः केवलो नास्ति । स्थित्युत्पत्तिरहितत्वात् तद्वत् । एवं स्थितिः केवला नास्ति । विनाशोत्पादशून्यत्वात् तद्वदेव । इत्यन्योन्यापेक्षाणामुत्पादादीनां वस्तुनि सत्त्वं प्रतिपत्तव्यम् । तथा चोक्तम् ।

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।
अगोरसव्रतो नोभे तस्माद्वस्तु त्रयात्मकम् ॥

इति काव्यार्थः ॥

अथान्ययोगव्यवच्छेदस्य प्रस्तुतत्वादास्तां तावत्साक्षाद्भवान् भवदीयप्रवचनावयवा अपि परतीर्थिकतिरस्कारबद्धकक्षा इत्याशयवान् स्तुतिकारः स्याद्वादव्यवस्थापनाय प्रयोगमुपन्यस्यन् स्तुतिमाह ।

अनन्तधर्मात्मकमेव तत्त्व-
मतोन्यथा सत्त्वमसूपपादम् ।
इति प्रमाणान्यपि ते कुवादि-
कुरङ्गसंत्रासनसिंहनादाः ॥ २२ ॥

तत्त्वं परमार्थभूतं वस्तु जीवाजीवलक्षणमनन्तधर्मात्मकमेव । अनन्तास्त्रिकालविषयत्वादपरिमिता ये धर्माः सहभाविनः क्रमभाविनश्च पर्यायास्त एवात्मा स्वरूपं यस्य तदनन्त-

धर्मात्मकम् । एवकारः प्रकारान्तरव्यवच्छेदार्थः । अत एवाह अतोन्यथा इत्यादि । अतोन्यथा उक्तप्रकारवैपरीत्येन । सत्त्वं वस्तुतत्त्वम् । असूपपादम् सुखेनोपपाद्यते घटनाकोटिसंटङ्कमारोप्यत इति सूपपादम् न तथा असूपपादं दुर्घटमित्यर्थः । अनेन साधनं दर्शितम् । तथाहि । तत्त्वमिति धर्मि । अनन्तधर्मात्मकत्वं साध्यो धर्मः । सत्त्वान्यथानुपपत्तेरिति हेतुः । अन्यथानुपपत्त्येकलक्षणत्वाद्धेतोः । अन्तर्व्याप्त्यैव साध्यस्य सिद्धत्वादृष्टान्तादिभिर्न प्रयोजनम् । यदनन्तधर्मात्मकं न भवति तत्सदपि न भवति यथा वियदिन्दीवरमिति केवलव्यतिरेकी हेतुः । साधर्म्यदृष्टान्तानां पक्षकुक्षिनिक्षिप्तत्वेनान्वयायोगात् । अनन्तधर्मात्मकत्वं चात्मनि तावत्साकारानाकारोपयोगिता कर्तृत्वं भोक्तृत्वं प्रदेशाष्टकनिश्चलता अमूर्तत्वमसंख्यातप्रदेशात्मकता जीवत्वमित्यादयः सहभाविनो धर्माः । हर्षविषादशोकसुखदुःखदेवनरनारकतिर्यक्त्वादयस्तु क्रमभाविनः । धर्मास्तिकायादिष्वप्यसंख्येयप्रदेशात्मकत्वं गत्याद्युपग्रहकारित्वं मत्यादिज्ञानविषयत्वं तत्तदवच्छेदकावच्छेद्यत्वमवस्थितत्वमरूपित्वमेकद्रव्यत्वं निष्क्रियत्वमित्यादयः । घटे पुनरामत्वं पाकजरूपादिमत्त्वं पृथुबुध्नोदरत्वं कम्बुग्रीवत्वं जलादिधारणाहरणसामर्थ्यं मत्यादिज्ञानज्ञेयत्वं नवत्वं पुराणत्वमित्यादयः । एवं सर्वपदार्थेष्वपि नानानयमताभिज्ञेन शाब्दानार्थांश्च पर्यायान्प्रतीत्य वाच्यम् ॥

अत्र चात्मशब्देनानन्तेष्वपि धर्मेष्वनुवृत्तिरूपमन्वयिद्रव्यं ध्वनितम् । ततश्च उत्पादव्ययध्रौव्ययुक्तं सत् इति व्यवस्थितम् । एवं तावदर्थेषु । शब्देष्वपि उदात्तानुदात्तस्वरितविवृतसंवृतघोषवदघोषताल्पप्राणमहाप्राणतादयस्तत्तदर्थप्रत्यायनशक्त्यादयश्चावसेयाः । अस्य हेतोरसिद्धविरुद्धानैकान्तिकत्वादिकण्टकोद्धारः

स्वयमभ्यूह्यः । इत्येवमुल्लेखशेखराणि ते तव प्रमाणान्यपि न्यायोपपन्नसाधनवाक्यान्यपि । आस्तां तावत्साक्षात्कृतद्रव्यपर्यायनिकायो भवान् । तावदेतान्यपि कुवादिकुरङ्गसंत्रासनसिंहनादाः कुवादिनः कुत्सितवादिनः । एकांशग्राहकनयानुयायिनोन्यतीर्थिकाः त एव संसारवनगहनवसनव्यसनितया कुरङ्गा मृगास्तेषां सम्यक्त्रासने सिंहनादा इव सिंहनादाः। यथा सिंहस्य नादमात्रमप्याकर्ण्य कुरङ्गास्त्रासमासूत्रयन्ति तथा भवत्प्रणीतैवंप्रकारप्रमाणवचनान्यपि श्रुत्वा कुवादिनस्त्रस्नुतामश्नुवते । प्रतिवचनप्रदानकातरतां बिभ्रतीति यावत् । एकैकं त्वदुपज्ञं प्रमाणमन्ययोगव्यवच्छेदकमित्यर्थः ॥

अत्र प्रमाणानीति बहुवचनमेवंजातीयानां प्रमाणानां भगवच्छासने आनन्त्यज्ञापनार्थम् । एकैकस्य सूत्रस्य सर्वोदधिसलिलसर्वसरिद्वालुकानन्तगुणार्थत्वात् । तेषां च सर्वेषामपि सर्वविन्मूलतया प्रमाणत्वात् । अथवा इत्यादिबहुवचनान्ता गणस्य संसूचका भवन्तीति न्यायात् इतिशब्देन प्रमाणबाहुल्यसूचनात् पूर्वार्धे एकस्मिन्नपि प्रमाणे उपन्यस्ते उचितमेव बहुवचनम् ॥ इति काव्यार्थः ॥

अनन्तरमनन्तधर्मात्मकत्वं वस्तुनि साध्यं मुकुलितमुक्तम् । तदेव सप्तभङ्गीप्ररूपणद्वारेण प्रपञ्चयन् भगवतो निरतिशयं वचनातिशयं च स्तुवन्नाह ।

अपर्ययं वस्तु समस्यमान-
मद्रव्यमेतच्च विविच्यमानम् ।
आदेशभेदोदितसप्तभङ्ग-
मदीदृशस्त्वं बुधरूपवेद्यम् ॥२३॥

समस्यमानं संक्षेपेणोच्यमानं वस्तु अपर्ययम् अविवक्षितपर्यायम्। वसन्ति गुणपर्याया अस्मिन्निति वस्तु धर्माधर्माकाशपुद्गल-कालजीवलक्षणं द्रव्यषट्कम् । अयमभिप्रायः। यदैकमेव वस्त्वात्म-घटादिकं चेतनाचेतनं सतामपि पर्यायाणामविवक्षया द्रव्यरूपमेव वक्तुमिष्यते तदा संक्षेपेणाभ्यन्तरीकृतसकलपर्यायनिकायत्वलक्षणेनाभिधीयमानत्वादपर्ययमित्युपदिश्यते। केवलद्रव्यरूपमेवेत्यर्थः। यथात्मायं घटोयमित्यादि। पर्यायाणां द्रव्यानतिरेकात् । अत एव द्रव्यास्तिकनयाः शुद्धसंग्रहादयो द्रव्यमात्रमेवेच्छन्ति । पर्यायाणां तदविष्वग्भूतत्वात् । पर्ययः पर्यवः पर्यायः इत्यनर्थान्तरम् । अद्रव्यमित्यादि। चः पुनरर्थे। स च पूर्वस्माद्विशेषद्योतने भिन्नक्रमश्च। विविच्यमानं चेति विवेकेन पृथग्रूपतयोच्यमानम् । पुनरेतद्वस्तु अद्रव्यमेव । अविवक्षितान्वयिद्रव्यं केवलपर्यायरूपमित्यर्थः ॥

यदा ह्यात्मा ज्ञानदर्शनादीन्पर्यायानाधिकृत्य प्रतिपर्यायं विचार्यते तदा पर्याया एव प्रतिभासन्ते न पुनरात्माख्यं किमपि द्रव्यम् । एवं घटोपि कुण्डलौष्ठपृथुबुध्नोदरपूर्वापरादिभागाद्यवयवापेक्षया विविच्यमानः पर्याया एव न पुनर्घटाख्यं तदतिरिक्तं वस्तु। अत एव पर्यायास्तिकनयानुपातिनः पठन्ति ।

भागा एव हि भासन्ते संनिविष्टास्तथा तथा ।
तद्वान्नैव पुनः कश्चिन्निर्भागः संप्रतीयते ॥

इति । ततश्च द्रव्यपर्यायोभयात्मकत्वेपि वस्तुनो द्रव्यनयार्पणया पर्यायनयानर्पणया च द्रव्यरूपता पर्यायनयार्पणया द्रव्यनयानर्पणया च पर्यायरूपता उभयनयार्पणया च तदुभयरूपता । अत एवाह वाचकमुख्यः अर्पितानर्पितसिद्धेः इति । एवंविधं द्रव्यपर्यायात्मकं वस्तु त्वमेव अदीदृशः त्वमेव दर्शितवान् । नान्य इति काक्वावधारणावगतिः ॥

नन्वन्याभिधानप्रत्यययोग्यं द्रव्यमनन्याभिधानप्रत्ययविषयाश्च पर्यायाः तत्कथमेकमेव वस्तूभयात्मकमित्याशङ्क्य विशेषणद्वारेण परिहरति आदेशभेदेत्यादि । आदेशभेदेन सकलादेशविकलादेशलक्षणेनादेशद्वयेनोदिताः प्रतिपादिताः सप्तसंख्या भङ्गा वचनप्रकारा यस्मिन् वस्तुनि तत्तथा । ननु यदि भगवता त्रिभुवनबन्धुना निर्विशेषतया सर्वेभ्य एवंविधं वस्तुतत्त्वमुपदर्शितं तर्हि किमर्थं तीर्थान्तरीयाः तत्र विप्रतिपद्यन्त इत्याह बुधरूपवेद्यमिति । बुध्यन्ते यथावस्थितं वस्तुतत्त्वं सारेतरविषयविभागविचारणया इति बुधाः । प्रकृष्टा बुधा बुधरूपाः नैसर्गिकाधिगमिकान्यतरसम्यग्दर्शनविशदीकृतज्ञानशालिनः प्राणिनः । तैरेव वेदितुं शक्यं वेद्यं परिच्छेद्यम् । न पुनः स्वस्वशास्त्रतत्त्वाभ्यासपरिपाकशाणानिशातबुद्धिभिरप्यन्यैः । तेषामनादिमिथ्यादर्शनवासनादूषितमतितया यथास्थितवस्तुतत्त्वानवबोधेन बुधरूपत्वाभावात् । तथा चागमः ।

सदसदविसेसणाउ भवहेउजहिच्छिओवलंभाउ ।
णाणफलाभावाउ मिच्छादिट्ठिस्स अण्णाणं ॥ १ ॥

अत एव तत्परिगृहीतं द्वादशाङ्गमपि मिथ्याश्रुतमामनन्ति । तेषामुपपत्तिनिरपेक्षं यदृच्छया वस्तुतत्त्वोपलम्भसंरम्भात् । सम्यग्दृष्टिपरिगृहीतं तु मिथ्याश्रुतमपि सम्यक्श्रुततया परिणमति सम्यग्दृशाम् । सर्वविदुपदेशानुसारिप्रवृत्तितया मिथ्याश्रुतोक्तस्याप्यर्थस्य यथावस्थितविधिनिषेधविषयतयोन्नयनात् । तथा हि किल वेदे अजैर्यष्टव्यम् इत्यादिवाक्येषु मिथ्यादृशोऽजशब्दं पशुवाचकतया व्याचक्षते सम्यग्दृशस्तु जन्माप्रायोग्यं त्रिवार्षिकं यवव्रीह्यादि पञ्चवार्षिकं तिलमसूरादि सप्तवार्षिकं कङ्गुसर्षपादि धान्यपर्यायतया पर्यवसाययन्ति । अत एव च भगवता श्रीवर्ध-

मानस्वामिना विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्ति इत्यादिऋचः श्रीमदिन्द्रभूत्यादीनां द्रव्यगणधरदेवानां जीवादिनिषेधकतया प्रतिभासमाना अपि तद्व्यवस्थापकतया व्याख्याताः । तथा स्मार्ता अपि

न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥

इति श्लोकं पठन्ति । अस्य च यथाश्रुतार्थव्याख्यानेऽसंबद्धप्रलाप एव । यस्मिन् ह्यनुष्ठीयमाने दोषो नास्त्येव तस्मान्निवृत्तिः कथमिव महाफला भविष्यति । इज्याध्ययनदानादेरपि निवृत्तिप्रसङ्गात् । तस्मादन्यदैदंपर्यमस्य श्लोकस्य । तथाहि न मांसभक्षणे कृते अदोषः अपि तु दोष एव । एवं मद्यमैथुनयोरपि । कथं नादोष इत्याह यतः प्रवृत्तिरेषा भूतानाम् । प्रवर्तन्त उत्पद्यन्तेऽस्यामिति प्रवृत्तिः उत्पत्तिस्थानम् । भूतानां जीवानां तत्तज्जीवसंसक्तिहेतुरित्यर्थः । प्रसिद्धं च मांसमद्यमैथुनानां जीवसंसक्तिमूलकारणत्वमागमे ।

आमासु य पक्कासु य विपच्चमाणासु मंसपेसीसु ।
आयंतिअमुववाओ भणिओ उ णिगोअजीवाणं ॥ १ ॥
मज्जे महुम्मि मंसम्मि णवणीयम्मि चउत्थए ।
उप्पज्जंति अणंता तव्वण्णा तत्थ जंतुणो ॥ २ ॥
मेहुणसण्णारूढो णवलक्ख हणेइ सुहुमजीवाणं ।
केवलिणा पण्णत्ता सद्दहिअव्वा सया कालं ॥ ३ ॥

तथाहि

इत्थीजोणीए संभवंति बेइंदिया उ जे जीवा ।
इक्को व दो तिण्णि व लक्खपुहुत्तं च उक्कोसं ॥ ४ ॥

पुरिसेण सह गयाए तेसिं जीवाण होइ उद्दवणं ।
वेणुगदिट्ठंतणं तत्तायसलागणाएणं ॥ ५ ॥

संसक्तायां योनौ द्वीन्द्रिया एते । शुक्रशोणितसंभवास्तु गर्भजपञ्चेन्द्रिया इमे ।

पंचिंदिया मणुस्सा एगणरभुत्तणारिगब्भम्मि ।
उक्कोसं णवलक्खा जायंति एगवेलाए ॥ ६ ॥
णवलक्खाणं मज्झे जायइ इक्कस्स दुण्ह व समत्ती ।
सेसा पुण एमेव य विलयं वच्चंति तत्थेव ॥ ७ ॥

तदेवं जीवोपमर्दहेतुत्वान्न मांसभक्षणादिकमदुष्टमिति प्रयोगः । अथवा भूतानां पिशाचप्रायाणामेषा प्रवृत्तिः । त एवात्र मांसभक्षणादौ प्रवर्तन्ते न पुनर्विवेकिन इति भावः । तदेवं मांसभक्षणादेर्दुष्टतां स्पष्टीकृत्य यदुपदेष्टव्यं तदाह । निवृत्तिस्तु महाफला । तुरेवकारार्थः । तुः स्याद्भेदेवधारणे इति वचनात् । ततश्चैतेभ्यो मांसभक्षणादिभ्यो निवृत्तिरेव महाफला स्वर्गापवर्गफलप्रदा न पुनः प्रवृत्तिरपीत्यर्थः । अत एव स्थानान्तरे पठितम्

वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोस्तुल्यं भवेत्फलम् ॥
एकरात्रोषितस्यापि या गतिर्ब्रह्मचारिणः ।
न सा क्रतुसहस्रेण प्राप्तुं शक्या युधिष्ठिर ॥

मद्यपाने तु कृतं सूत्रानुवादैः । तस्य सर्वविगर्हितत्वात् । तानेवंप्रकारानर्थान्कथमिव बुधाभासास्तीर्थिका वेदितुमर्हन्तीति कृतमतिप्रसङ्गेन ॥

अथ केऽमी सप्तभङ्गाः कश्चायमादेशभेद इत्युच्यते । एकत्र जीवादौ वस्तुन्येकैकसत्त्वादिधर्मविषयप्रश्नवशादविरोधेन प्रत्यक्षा-

दिबाधापरिहारेण पृथग्भूतयोः समुदितयोश्च विधिनिषेधयोः पर्यालोचनया कृत्वा स्याच्छब्दलाञ्छितो वक्ष्यमाणैः सप्तभिः प्रकारैर्वचनविन्यासः सप्तभङ्गीति गीयते। तद्यथा। स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः १। स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः २। स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः ३। स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः ४। स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः ५। स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः ६। स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तमः ७॥

तत्र स्यात्कथंचित् स्वद्रव्यक्षेत्रकालभावरूपेणास्त्येव सर्वं कुम्भादि न पुनः परद्रव्यक्षेत्रकालभावरूपेण। तथाहि कुम्भो द्रव्यतः पार्थिवत्वेनास्ति नाप्यादिरूपत्वेन। क्षेत्रतः पाटलिपुत्रकत्वेन न कान्यकुब्जादित्वेन। कालतः शैशिरत्वेन न वासन्तिकादित्वेन। भावतः श्यामत्वेन न रक्तादित्वेन। अन्यथेतररूपापत्त्या स्वरूपहानिप्रसङ्ग इति। अवधारणं चात्र भङ्गेऽनभिमतार्थव्यावृत्त्यर्थमुपात्तम्। इतरथानभिहिततुल्यतैवास्य वाक्यस्य प्रसज्येत। प्रतिनियतस्वार्थानभिधानात्। यदुक्तम्

वाक्येऽवधारणं तावदनिष्टार्थनिवृत्तये।
कर्तव्यमन्यथानुक्तसमत्वात्तस्य कुत्रचित्॥

तथाप्यस्त्येव कुम्भ इत्येतावन्मात्रोपादाने कुम्भस्य स्तम्भाद्यस्तित्वेनापि सर्वप्रकारेणास्तित्वप्राप्तेः प्रतिनियतस्वरूपानुपपत्तिः स्यात्। तत्प्रतिपत्तये स्यादिति शब्दः प्रयुज्यते। स्यात्कथंचित्स्वद्रव्यादिभिरेवायमस्ति न परद्रव्यादिभिरपीत्यर्थः। यत्रापि चासौ

न प्रयुज्यते तत्रापि व्यवच्छेदफलैवकारवद् बुद्धिमद्भिः प्रतीयत एव। यदुक्तम्

सोऽप्रयुक्तोपि वा तज्ज्ञैः सर्वत्रार्थात्प्रतीयते ।
यथैवकारोऽयोगादिव्यवच्छेदप्रयोजनः ॥ १ ॥

इति प्रथमो भङ्गः ॥

स्यात्कथञ्चिन्नास्त्येव कुम्भादिः स्वद्रव्यादिभिरेव परद्रव्यादिभिरपि वस्तुनोऽसत्त्वानिष्टौ हि प्रतिनियतस्वरूपाभावाद्वस्तुप्रतिनियतिर्न स्यात् । न चास्तित्वैकान्तवादिभिरत्र नास्तित्वमसिद्धमिति वक्तव्यम् । कथंचित्तस्य वस्तुनि युक्तिसिद्धत्वात् साधनवत् । नहि क्वचिदनित्यत्वादौ साध्ये सत्त्वादिसाधनस्यास्तित्वं विपक्षे नास्तित्वमन्तरेणोपपन्नम्। तस्य साधनत्वाभावप्रसङ्गात् । तस्माद् वस्तुनोऽस्तित्वं नास्तित्वेनाविनाभूतं नास्तित्वं च तेनेति । विवक्षावशाच्चानयोः प्रधानोपसर्जनभावः । एवमुत्तरभङ्गेष्वपि ज्ञेयम् । अर्पितानर्पितसिद्धेः इति वाचकवचनात्।
इति द्वितीयः ॥

तृतीयः स्पष्ट एव ॥

द्वाभ्यामस्तित्वनास्तित्वधर्माभ्यां युगपत्प्रधानतयाऽर्पिताभ्यामेकस्य वस्तुनोऽभिधित्सायां तादृशस्य शब्दस्यासंभवादवक्तव्यं जीवादिवस्तु । तथाहि सदसत्त्वगुणद्वयं युगपदेकत्र सदित्यनेन वक्तुमशक्यम्।तस्यासत्त्वप्रतिपादनासमर्थत्वात्।तथाऽसदित्यनेनापि।तस्य सत्त्वप्रत्यायनसामर्थ्याभावात् । न च पुष्पदन्तादिवत्साङ्केतिकमेकं पदं तद्वक्तुं समर्थम् तस्यापि क्रमेणार्थद्वयप्रत्यायने सामर्थ्योपपत्तेः । शतृशानयोः संकेतितसच्छब्दवत् । अत एव द्वन्द्वकर्मधारयवृत्त्योर्वाक्यस्य च न तद्वाचकत्वम् । इति सकलवाचकरहितत्वादवक्तव्यं वस्तु युगपत्सत्त्वासत्त्वाभ्यां प्रधान-

भावार्पिताभ्यामाक्रान्तं व्यवतिष्ठते । न च सर्वथाऽवक्तव्यम् । अवक्तव्यशब्देनाप्यनभिधेयत्वप्रसङ्गात् । इति चतुर्थः ॥

शेषास्त्रयः सुगमाभिप्रायाः ॥

न च वाच्यमेकत्र वस्तुनि विधीयमाननिषिध्यमानानन्तधर्माभ्युपगमेनानन्तभङ्गीप्रसङ्गादसंगतैव सप्तभङ्गीति । विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभङ्गीनामेव संभवात् । यथा हि सदसत्त्वाभ्यामेवं सामान्यविशेषाभ्यामपि सप्तभङ्ग्येव स्यात् । तथाहि । स्यात्सामान्यं स्याद्विशेषः स्यादुभयं स्यादवक्तव्यं स्यात्सामान्यावक्तव्यं स्याद्विशेषावक्तव्यं स्यात्सामान्यविशेषावक्तव्यमिति । न चात्र विधिनिषेधप्रकारौ न स्त इति वाच्यम् । सामान्यस्य विधिरूपत्वाद्विशेषस्य च व्यावृत्तिरूपतया निषेधात्मकत्वात् । अथवा प्रतिपक्षशब्दत्वाद्यदा सामान्यस्य प्राधान्यं तदा तस्य विधिरूपता विशेषस्य च निषेधरूपता यदा विशेषस्य पुरस्कारस्तदा तस्य विधिरूपता इतरस्य च निषेधरूपता । एवं सर्वत्र योज्यम् । अतः सुष्ठूक्तम् अनन्ता अपि सप्तभङ्ग्य एव भवेयुः इति । प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव संभवात् । तेषामपि सप्तत्वं सप्तविधतज्जिज्ञासानियमात् । तस्या अपि सप्तविधत्वं सप्तधैव तत्संदेहसमुत्पादात् । तस्यापि सप्तविधत्वनियमः स्वगोचरवस्तुधर्माणां सप्तविधत्वस्यैवोपपत्तेरिति । इयं च सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च । तत्र सकलादेशः प्रमाणवाक्यम् । तल्लक्षणं चेदम् । प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः । अस्यार्थः । कालादिभिरष्टभिः कृत्वा यदभेदवृत्तेर्धर्मधर्मिणोरपृथग्भावस्य प्राधान्यं तस्मात्कालादिभिर्भिन्नात्मनामपि धर्मधर्मिणामभेदा-

ध्यारोपाद्वा समकालमभिधायकं वाक्यं सकलादेशः । तद्विपरीतस्तु विकलादेशो नयवाक्यमित्यर्थः । अयमाशयः । यौगपद्येनाशेषधर्मात्मकं वस्तु कालादिभिरभेदप्राधान्यवृत्त्याऽभेदोपचारेण वा प्रतिपादयति सकलादेशः। तस्य प्रमाणाधीनत्वात् । विकलादेशस्तु क्रमेण भेदोपचाराद्भेदप्राधान्याद्वा तदभिधत्ते । तस्य नयात्मकत्वात् ॥

कः पुनः क्रमः किं च यौगपद्यम् । यदाऽस्तित्वादिधर्माणां कालादिभिर्भेदविवक्षा तदैकशब्दस्यानेकार्थप्रत्यायने शक्त्यभावात् क्रमः । यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते तदैकेनापि शब्देनैकधर्मप्रत्यायनमुखेन तदात्मकतामापन्नस्यानेकशेषधर्मरूपस्य वस्तुनः प्रतिपादनसंभवाद्यौगपद्यम् ॥

के पुनः कालादयः । कालः आत्मरूपम् अर्थः संबन्धः उपकारः गुणिदेशः संसर्गः शब्दः । तत्र स्याज्जीवादिवस्त्वस्त्येवेत्यत्र यत्कालमस्तित्वं तत्कालाः शेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाभेदवृत्तिः (१) । यदेव चास्तित्वस्य तद्गुणत्वमात्मरूपं तदेवान्यानन्तगुणानामपीत्यात्मरूपेणाभेदवृत्तिः (२) । य एव चाधारोऽर्थो द्रव्याख्योस्तित्वस्य स एवान्यपर्यायाणामित्यर्थेनाभेदवृत्तिः (३) । य एव चाविष्वग्भावः कथंचित्तादात्म्यलक्षणः संबन्धोस्तित्वस्य स एव शेषविशेषाणामिति संबन्धेनाभेदवृत्तिः (४) । य एव चोपकारोऽस्तित्वेन स्वानुरक्तत्वकरणं स एव शेषैरपि गुणैरित्युपकारेणाभेदवृत्तिः (५) । य एव गुणिनः संबन्धी देशः क्षेत्रलक्षणोस्तित्वस्य स एवान्यगुणानामिति गुणिदेशेनाभेदवृत्तिः (६) । य एव चैकवस्त्वात्मनास्तित्वस्य संसर्गः स एव शेषधर्माणामिति संसर्गेणाभेदवृत्तिः (७) । अवि-

ष्वग्भावेऽभेदः प्रधानं भेदो गौणः संसर्गे तु भेदः प्रधानमभेदो गौण इति विशेषः। य एव चास्तीति शब्दोस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एव शेषानन्तधर्मात्मकस्यापीति शब्देनाभेदवृत्तिः (८) पर्यायार्थिकनयगुणभावे द्रव्यार्थिकनयप्राधान्यादुपपद्यते द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्ये तु न गुणानामभेदवृत्तिः संभवति। समकालमेकत्र नानागुणानामसंभवात्। संभवे वा तदाश्रयस्य तावद्धा भेदप्रसङ्गात्। नानागुणानां संबन्धिन आत्मरूपस्य च भिन्नत्वात्। आत्मरूपाऽभेदे तेषां भेदस्य विरोधात्। स्वाश्रयस्यार्थस्यापि नानात्वात् अन्यथा नानागुणाश्रयत्वस्य विरोधात्। संबन्धस्य च संबन्धिभेदेन भेददर्शनात् नानासंबन्धिभिरेकत्रैकसंबन्धाघटनात्। तैः क्रियमाणस्योपकारस्य च प्रतिनियतरूपस्यानेकत्वात् अनेकैरुपकारिभिः क्रियमाणस्योपकारस्य विरोधात्। गुणिदेशस्य च प्रतिगुणं भेदात् तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसङ्गात्। संसर्गस्य च प्रतिसंसर्गिभेदात् तदभेदे संसर्गिभेदविरोधात्। शब्दस्य प्रतिविषयं नानात्वात् सर्वगुणानामेकशब्दवाच्यतायां सर्वार्थानामेकशब्दवाच्यतापत्तेः शब्दान्तरवैकल्यापत्तिः। तत्त्वतोस्तित्वादीनामेकत्र वस्तुन्येवमभेदवृत्तेरसंभवे कालादिभिर्भिन्नात्मनामभेदोपचारः क्रियते। तदेताभ्यामभेदवृत्त्यभेदोपचाराभ्यां कृत्वा प्रमाणप्रतिपन्नानन्तधर्मात्मकस्य वस्तुनः समसमयं यदभिधायकं वाक्यं स सकलादेशः प्रमाणवाक्यापरपर्यायः। नयविषयीकृतस्य वस्तुधर्मस्य भेदवृत्तिप्राधान्याद्भेदोपचाराद्वा क्रमेण यदभिधायकं वाक्यं स विकलादेशो नयवाक्यापरपर्यायः। इति स्थितम्। ततः साधूक्तम् 'आदेशभेदोदितसप्तभङ्गम्' ॥ इति काव्यार्थः ॥

अनन्तरं भगवद्दर्शितस्यानेकान्तात्मनो वस्तुनो बुधरूपवेद्यत्वमुक्तम् । अनेकान्तात्मकत्वं च सप्तभङ्गीप्ररूपणेन सुखोन्नेयं स्यादिति सापि निरूपिता । तस्यां च विरुद्धधर्माध्यासितं वस्तु पश्यन्त एकान्तवादिनोऽबुधरूपा विरोधमुद्भावयन्ति तेषां प्रमाणमार्गाच्च्यवनमाह ।

उपाधिभेदोपहितं विरुद्धं
नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुध्यैव विरोधभीता
जडास्तदेकान्तहताः पतन्ति ॥ २४ ॥

अर्थेषु पदार्थेषु चेतनाचेतनेष्वसत्त्वं नास्तित्वं न विरुद्धं न विरोधावरुद्धम् । अस्तित्वेन सह विरोधं नानुभवतीत्यर्थः । न केवलमसत्त्वं न विरुद्धं किंतु सदवाच्यते च । सच्चावाच्यं च सदवाच्ये तयोर्भावौ सदवाच्यते । अस्तित्वावक्तव्यत्वे इत्यर्थः । ते अपि न विरुद्धे ॥ तथा हि । अस्तित्वं नास्तित्वेन सह न विरुध्यते । अवक्तव्यत्वमपि विधिनिषेधात्मकमन्योन्यं न विरुध्यते । अथवा अवक्तव्यत्वं वक्तव्यत्वेन साकं न विरोधमुद्वहति । अनेन च नास्तित्वाऽस्तित्वाऽवक्तव्यत्वलक्षणभङ्गकत्रयेण सकलसप्तभङ्ग्या निर्विरोधतोपलक्षिता । अमीषामेव त्रयाणां मुख्यत्वाच्छेषभङ्गानां च संयोगजत्वेनामीष्वेवान्तर्भावादिति ॥ नन्वेते धर्माः परस्परं विरुद्धास्तत्कथमेकत्र वस्तुन्येषां समावेशः संभवतीति विशेषणद्वारेण हेतुमाह उपाधिभेदोपहितम् इति । उपाधयोऽवच्छेदका अंशप्रकाराः तेषां भेदो नानात्वम् तेनोपहितम् अर्पितम् । सत्त्वस्य विशेषणमेतत् । उपाधिभेदोपहितं सदर्थेष्वसत्त्वं न

विरुद्धम् । सदवाच्यतयोश्च वचनभेदं कृत्वा योजनीयम् । उपाधिभेदोपहिते सती सदवाच्यते अपि न विरुद्धे । अयमभिप्रायः । परस्परपरिहारेण ये वर्तेते तयोः शीतोष्णवत्सहानवस्थानलक्षणो विरोधः । न चात्रैवम् । सत्त्वासत्त्वयोरितरेतरमविष्वग्भावेन वर्तनात् । नहि घटादौ सत्त्वमसत्त्वं परिहृत्य वर्तते । पररूपेणापि सत्त्वप्रसङ्गात् । तथा च तद्व्यतिरिक्तार्थान्तराणां नैरर्थक्यम् । तेनैव त्रिभुवनार्थसाध्यार्थक्रियाणां सिद्धेः । न चासत्त्वं सत्त्वं परिहृत्य वर्तते । स्वरूपेणाप्यसत्त्वप्राप्तेः । तथा च निरुपाख्यत्वात्सर्वशून्यतेति । तदा हि विरोधः स्याद् यद्येकोपाधिकं सत्त्वमसत्त्वं च स्यात् । न चैवम् । यतो न हि येनैवांशेन सत्त्वं तेनैवासत्त्वमपि । किंत्वन्योपाधिकं सत्त्वमन्योपाधिकं पुनरसत्त्वम् । स्वरूपेण हि सत्त्वं पररूपेण चासत्त्वम् । दृष्टं ह्येकस्मिन्नेव चित्रपटावयविन्यन्योपाधिकं तु नीलत्वमन्योपाधिकाश्चेतरे वर्णाः । नीलत्वं हि नीलीरागाद्युपाधिकं वर्णान्तराणि च तत्तद्रञ्जनद्रव्योपाधिकानि । एवं मेचकरत्नेपि तत्तद्वर्णपुद्गलोपाधिकं वैचित्र्यमवसेयम् । न चैभिर्दृष्टान्तैः सत्त्वासत्त्वयोर्भिन्नदेशत्वप्राप्तिः । चित्रपटाद्यवयविन एकत्वात् । तत्रापि भिन्नदेशत्वासिद्धेः । कथंचित्पक्षस्तु दृष्टान्ते दार्ष्टान्तिके च स्याद्वादिनां न दुर्लभः ॥

एवमप्यपरितोषश्चेदायुष्मतस्तर्ह्येकस्यैव पुंसस्तत्तदुपाधिभेदात्पितृत्वपुत्रत्वमातुलत्वभागिनेयत्वपितृव्यत्वभ्रातृव्यत्वादिधर्माणां परस्परविरुद्धानामपि प्रसिद्धिदर्शनात्किं वाच्यम् । एवमवक्तव्यत्वादयोपि वाच्या इति । उक्तप्रकारेणोपाधिभेदेन वास्तवं विरोधाभावमप्रबुध्यैव अज्ञात्वैव । एवकारोऽवधारणे । स च तेषां सम्यग्ज्ञानस्याभाव एव न पुनर्लेशतोऽपि भाव इति व्यनक्ति । ततस्ते विरोध-

भीताः सत्त्वासत्त्वादिधर्माणां बहिर्मुखशेमुष्या संभावितो वा विरोधः सहानवस्थानादिस्तस्माद्भीताः त्रस्तमानसाः । अत एव जडाः तात्त्विकभयहेतोरभावेपि तथाविधपशुवद्भीरुत्वान्मूर्खाः परवादिनः। तदेकान्तहताः तेषां सत्त्वादिधर्माणां य एकान्त इतरधर्मनिषेधेन स्वाभिप्रेतधर्मव्यवस्थापननिश्चयस्तेन हता इव हताः पतन्ति स्खलन्ति पतिताश्च सन्तस्ते न्यायमार्गाक्रमणे न समर्था न्यायमार्गाध्वनीनानां च सर्वेषामप्याक्रमणीयतां यान्तीति भावः। यद्वा पतन्तीति प्रमाणमार्गतश्च्यवन्ते । लोके हि सन्मार्गच्युतः पतित इति परिभाष्यते । अथवा यथा वज्रादिपरिहारेण हतः पतितो मूर्च्छामतुच्छामासाद्य निरुद्धवाक्प्रसरो भवत्येवं तेपि वादिनः स्वाभिमतैकान्तवादेन युक्तिसरणिमननुसरता वज्राशनिप्रायेण निहताः सन्तः स्याद्वादिनां पुरतोऽकिंचित्करा वाङ्मात्रमपि नोच्चारयितुमीशत इति ॥

अत्र च विरोधस्योपलक्षणत्वाद् वैयधिकरण्यम् अनवस्था संकरः व्यतिकरः संशयः अप्रतिपत्तिः विषयव्यवस्थाहानिः इत्येतेपि परोद्भाविता दोषा अभ्यूह्याः ॥ तथाहि । सामान्यविशेषात्मकं वस्त्वित्युपन्यस्ते परे उपालब्धारो भवन्ति । यथा सामान्यविशेषयोर्विधिप्रतिषेधरूपयोर्विरुद्धधर्मयोरेकत्राभिन्ने वस्तुन्यसंभवाच्छीतोष्णवदिति विरोधः । न हि यदेव विधेरधिकरणं तदेव प्रतिषेधस्याधिकरणं भवितुमर्हत्येकरूपतापत्तेः ततो वैयधिकरण्यमपि भवति ॥ अपरं येनात्मना सामान्यस्याधिकरणं येन च विशेषस्य तावप्यात्मानौ एकेनैव स्वभावेनाधिकरोति द्वाभ्यां वा स्वभावाभ्याम् । एकेनैव चेत् तत्र पूर्ववद्विरोधः । द्वाभ्यां वा स्वभावाभ्यां सामान्यविशेषाख्यं स्वभावद्वयमधिकरोति तदानवस्था तावपि स्वभावान्तराभ्यां तावपि स्वभावान्त-

राभ्यामिति ॥ येनात्मना सामान्यस्याधिकरणं तेन सामान्यस्य विशेषस्य च येन च विशेषस्याधिकरणं तेन विशेषस्य सामान्यस्य चेति संकरदोषः ॥ येन स्वभावेन सामान्यं तेन विशेषो येन विशेषस्तेन सामान्यमिति व्यतिकरः ॥ ततश्च वस्तुनोऽसाधारणाकारेण निश्चेतुमशक्तेः संशयः ॥ ततश्चाप्रतिपत्तिः ॥ ततश्च प्रमाणविषयव्यवस्थाहानिः इति ॥ एते च दोषाः स्याद्वादस्य जात्यन्तरत्वान्निरवकाशा एव । अतः स्याद्वादमर्मवेदिभिरुद्धरणीयास्तत्तदुपपत्तिभिरिति । स्वतन्त्रतया निरपेक्षयोरेव सामान्यविशेषयोर्विधिप्रतिषेधरूपयोस्तेषामवकाशात् ॥

अथवा विरोधशब्दोत्र दोषवाची । यथा विरुद्धमाचरतीति । दुष्टमित्यर्थः । ततश्च विरोधेभ्यो विरोधवैयधिकरण्यादिदोषेभ्यो भीता इति व्याख्येयम् । एवं च सामान्यशब्देन सर्वा अपि दोषव्यक्तयः संगृहीता भवन्ति ॥ इति काव्यार्थः ॥

अथानेकान्तवादस्य सर्वद्रव्यसर्वपर्यायव्यापित्वेपि मूलभेदापेक्षया चातुर्विध्याभिधानद्वारेण भगवतस्तत्त्वामृतरसास्वादसौहित्यमुपवर्णयन्नाह ।

स्यान्नाशि नित्यं सदृशं विरूपं
वाच्यं न वाच्यं सदसत्तदेव ।
विपश्चितां नाथ निपीततत्त्व-
सुधोद्गतोद्गारपरंपरेयम् ॥ २५ ॥

स्यादित्यव्ययमनेकान्तद्योतकमष्टास्वपि पदेषु योज्यम् । तदेवाधिकृतमेवैकं वस्तु स्यात्कथंचिन्नाशि विनशनशीलमनित्यमित्यर्थः । स्यान्नित्यमविनाशधर्मीत्यर्थः । एतावता नित्यानित्यलक्षणमेकं विधानम् ॥ तथा स्यात्सदृशम् अनुवृत्तिहेतुसामान्यरूपम् ॥

स्याद्विरूपम् विविधरूपं विसदृशपरिणामात्मकं व्यावृत्तिहेतुविशेषरूपमित्यर्थः। अनेन सामान्यविशेषरूपो द्वितीयः प्रकारः ॥ तथा स्याद्वाच्यं वक्तव्यम् ॥ स्यान्न वाच्यम् अवक्तव्यमित्यर्थः । अत्र च समासे अवाच्यमिति युक्तं तथाप्यवाच्यपदं योन्यादौ रूढमित्यसभ्यतापरिहारार्थं न वाच्यमित्यसमस्तं चकार स्तुतिकारः। एतेनाभिलाप्यानभिलाप्यस्वरूपस्तृतीयो भेदः ॥ तथा स्यात्सत् विद्यमानमस्तिरूपमित्यर्थः । स्यादसत् तद्विलक्षणमिति । अनेन सदसदाख्या चतुर्थी विधा ॥

हे विपश्चितां नाथ संख्यावतां मुख्य इयम् अनन्तरोक्ता निपीततत्त्वसुधोद्गतोद्गारपरंपरा। तवेति प्रकरणात्सामर्थ्याद्वा गम्यते। तत्त्वं यथावस्थितवस्तुस्वरूपपरिच्छेदः तदेव जरामरणापहारित्वाद्विबुधोपभोग्यत्वान्मिथ्यात्वविषोर्मिनिराकरिष्णुत्वादान्तराह्लादकारित्वाच्च सुधा पीयूषं तत्त्वसुधा। नितरामनन्यसामान्यतया पीता आस्वादिता या तत्त्वसुधा तस्या उद्गता प्रादुर्भूता तत्कारणिका उद्गारपरंपरा उद्गारश्रेणिरिवेत्यर्थः। यथा हि कश्चिदाकण्ठं पीयूषरसमापीय तदनुविधायिनीमुद्गारपरंपरां मुञ्चति तथा भगवानपि जरामरणापहारि तत्त्वामृतं स्वैरमास्वाद्य तद्रसानुविधायिनीं प्रस्तुतानेकान्तवादभेदचतुष्टयीलक्षणामुद्गारपरम्परां देशनामुखेनोद्गीर्णवानित्याशयः ॥

अथवा यैरेकान्तवादिभिर्मिथ्यात्वगरलभोजनमातृप्ति भक्षितं तेषां तत्तद्वचनरूपा उद्गारप्रकाराः प्राक् प्रदर्शिताः। यैस्तु पचेलिमप्राचीनपुण्यप्राग्भारानुगृहीतैर्जगद्गुरुवदनेन्दुनिःस्यन्दि तत्त्वामृतं मनोहत्य पीतं तेषां विपश्चितां यथार्थवादविदुषां हे नाथ इयं पूर्वदलदर्शितोल्लेखशेखरोद्गारपरंपरेति व्याख्येयम्। एते च चत्वारोपि वादास्तेषु तेषु स्थानेषु प्रागेव चर्चिताः। तथा हि । आदी-

पमाव्योम समस्वभावाम् इति वृत्ते नित्यानित्यवादः प्रदर्शितः । अनेकमेकात्मकमेव वाच्यम् इति काव्ये सामान्यविशेषवादः संसूचितः। सप्तभङ्ग्यामभिलाप्यानभिलाप्यवादः सदसद्वादश्च चर्चितः। इति न भूयः प्रयासः ॥ इति काव्यार्थः ॥

इदानीं नित्यानित्यपक्षयोः परस्परदूषणप्रकाशनबद्धलक्षतया वैरायमाणयोरितरेतरोदीरितविविधहेतुहेतिसंनिपातसंजातविनिपातयोरयत्नसिद्धप्रतिपक्षप्रतिक्षेपस्य भगवच्छासनसाम्राज्यस्य सर्वोत्कर्षमाह ।

य एव दोषाः किल नित्यवादे
विनाशवादेपि समास्त एव ।
परस्परध्वंसिषु कण्टकेषु
जयत्यधृष्यं जिनशासनं ते ॥ २६ ॥

किलेति निश्चये । य एव नित्यवादे नित्यैकान्तवादे दोषा अनित्यैकान्तवादिभिः प्रसञ्जिताः क्रमयौगपद्याभ्यामर्थक्रियानुपपत्त्यादयस्त एव विनाशवादेपि क्षणिकैकान्तवादेपि समाः तुल्याः नित्यैकान्तवादिभिः प्रसज्यमाना अन्यूनाधिकाः । तथाहि नित्यवादी प्रमाणयति । सर्वं नित्यं सत्त्वात् । क्षणिके सदसत्कालयोरर्थक्रियाविरोधात् तल्लक्षणं सत्त्वं नावस्थां बध्नातीति ततो निवर्तमानमनन्यशरणतया नित्यत्वेवतिष्ठते । तथाहि क्षणिकोर्थः सन् वा कार्यं कुर्यात् असन्वा। गत्यन्तराभावात् । न तावदाद्यः पक्षः। समसमयवर्तिनि व्यापारायोगात् । सकलभावानां परस्परं कार्यकारणभावप्राप्त्यातिप्रसङ्गाच्च । नापि द्वितीयः पक्षः क्षोदं क्षमते । असतः कार्यकरणशक्तिविकलत्वात् । अन्यथा शशविषाणादयोपि कार्यकरणायोत्सहेरन् । विशेषाभावात् । इति ॥ अनित्यवादी

नित्यवादिनं प्रति पुनरेवं प्रमाणयति । सर्वं क्षणिकं सत्त्वात् । अक्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् अर्थक्रियाकारित्वस्य च भावलक्षणत्वात् ततोऽर्थक्रिया व्यावर्तमाना स्वक्रोडीकृतां सत्तां व्यावर्तयेदिति क्षणिकसिद्धिः । नहि नित्योऽर्थोऽर्थक्रियां क्रमेण प्रवर्तयितुमुत्सहते । पूर्वार्थक्रियाकरणस्वभावोपमर्दद्वारेणोत्तरक्रियायां क्रमेण प्रवृत्तेः । अन्यथा पूर्वक्रियाकरणाविरामप्रसङ्गात् । तत्स्वभावप्रच्यवे च नित्यता प्रयाति । अतादवस्थ्यस्यानित्यतालक्षणत्वात् । अथ नित्योऽपि क्रमवर्तिनं सहकारिकारणमर्थमुदीक्षमाणस्तावदासीत् पश्चात्तमासाद्य क्रमेण कार्यं कुर्यादिति चेत् न । सहकारिकारणस्य नित्येऽर्थेऽकिंचित्करत्वादकिंचित्करस्यापि प्रतीक्षणेऽनवस्थाप्रसङ्गात् । नापि यौगपद्येन नित्योऽर्थोऽर्थक्रियां कुरुते । अध्यक्षविरोधात् । नह्येककालं सकलाः क्रियाः प्रारभमाणः कश्चिदुपलभ्यते । करोतु वा । तथाप्याद्यक्षण एव सकलक्रियापरिसमाप्तेर्द्वितीयादिक्षणेष्वकुर्वाणस्यानित्यता बलाद्ढौकते । करणाकरणयोरेकस्मिन्विरोधात् । इति ॥ तदेवमेकान्तद्वयेऽपि ये हेतवस्ते युक्तिसाम्याद्विरुद्धं न व्यभिचरन्तीत्यविचारितरमणीयतया मुग्धजनस्य ध्यान्ध्यं चोत्पादयन्तीति विरुद्धा व्यभिचारिणोऽनैकान्तिकाः । इति ॥ अत्र च नित्यानित्यैकान्तपक्षप्रतिक्षेप एवोक्तः । उपलक्षणत्वाच्च सामान्यविशेषाद्येकान्तवादा अपि मिथस्तुल्यदोषतया विरुद्धा व्यभिचारिण एव हेतूनुपस्पृशन्तीति परिभावनीयम् ॥

अथोत्तरार्धं व्याख्यायते । परस्परेत्यादि । एवं च कण्टकेषु क्षुद्रशत्रुष्वेकान्तवादिषु परस्परध्वंसिषु सत्सु परस्परस्माद् ध्वंसन्ते विनाशमुपयान्तीत्येवंशीलाः सुन्दोपसुन्दवदिति परस्परध्वंसिनः । तेषु हे जिन ते तव शासनं स्याद्वादप्ररूपणनिपुणं द्वादशाङ्गीरूपं प्रवचनं पराभिभावुकानां कण्टकानां स्वयमुच्छिन्नत्वेनैवाभावाद-

धृष्यम् अपराभवनीयम् । शक्तार्हे कृत्याश्च इति कृत्यविधानाद् धर्षितुमशक्यं धर्षितुमनर्हं वा । जयति सर्वोत्कर्षेण वर्तते । यथा कश्चिन्महाराजः पीवरपुण्यपरीपाकः परस्परं विगृह्य स्वयमेव क्षयमुपेयिवत्सु द्विषत्स्वयत्नसिद्धनिष्कण्टकत्वं समृद्धं राज्यमुपभुञ्जानः सर्वोत्कृष्टो भवत्येवं त्वच्छासनमपि । इति काव्यार्थः ॥

अनन्तरकाव्ये नित्यानित्याद्येकान्तवादे दोषसामान्यमभिहितम् । इदानीं कतिपयतद्विशेषान्नामग्राहं दर्शयंस्तत्प्ररूपकाणामसद्भूतोद्भावकतयोद्धत्ततथाविधरिपुजनजनितोपद्रवमिव परित्रातु धरित्रीपतेस्त्रिजगत्पतेः पुरतो भुवनत्रयं प्रत्युपकारकारितामाविष्करोति—

नैकान्तवादे सुखदुःखभोगौ
न पुण्यपापे न च बन्धमोक्षौ ।
दुर्नीतिवादव्यसनासिनैवं
परैर्विलुप्तं जगदप्यशेषम् ॥ २७ ॥

एकान्तवादे नित्यानित्यैकान्तपक्षाभ्युपगमे न सुखदुःखभोगौ घटेते । न च पुण्यपापे घटेते । न च बन्धमोक्षौ घटेते । पुनःपुनर्नञः प्रयोगोऽत्यन्ताघटमानतादर्शनार्थः ॥ तथाहि एकान्तनित्ये आत्मनि तावत् सुखदुःखभोगौ नोपपद्येते । नित्यस्य हि लक्षणम् अप्रच्युतानुत्पन्नस्थिरैकरूपत्वम् । ततो यदा आत्मा सुखमनुभूय स्वकारणकलापसामग्रीवशाद् दुःखमुपभुङ्क्ते तदा स्वभावभेदादनित्यत्वापत्त्या स्थिरैकरूपताहानिप्रसङ्गः । एवं दुःखमनुभूय सुखमुपभुञ्जानस्यापि वक्तव्यम् । अथ अवस्थाभेदादयं व्यवहारः । न चावस्थासु भिद्यमानास्वपि तद्वतो भेदः सर्पस्येव कुण्डलार्जवाद्यवस्थासु इति चेत् न ।

तास्ततो व्यतिरिक्ताः अव्यतिरिक्ता वा । व्यतिरेके तास्तस्येति संबन्धाभावः । अतिप्रसङ्गात् । अव्यतिरेके तु तद्वानेवेति तदवस्थितैव स्थिरैकरूपताहानिः । कथं च तदेकान्तैकरूपत्वेऽवस्थाभेदोपि भवेत् । इति ॥ किंच सुखदुःखभोगौ पुण्यपापनिवर्त्यौ तन्निर्वर्तनं चार्थक्रिया सा च कूटस्थनित्यस्य क्रमेण अक्रमेण वा नोपपद्यत इत्युक्तप्रायम् । अत एवोक्तं न पुण्यपापे इति । पुण्यं दानादिक्रियोपार्जनीयं शुभं कर्म पापं हिंसादिक्रियासाध्यमशुभं कर्म । ते अपि न घटेते । प्रागुक्तनीतेः ॥ तथा न बन्धमोक्षौ । बन्धः कर्मपुद्गलैः सह प्रतिप्रदेशमात्मनो वन्हृयःपिण्डवद् अन्योन्यसंश्लेषः । मोक्षः कृत्स्नकर्मक्षयः । तावप्येकान्तनित्ये न स्याताम् । बन्धो हि संयोगविशेषः स च अप्राप्तानां प्राप्तिः इतिलक्षणः । प्राक्कालभाविनी अप्राप्तिरन्यावस्था उत्तरकालभाविनी प्राप्तिश्चान्या । तदनयोरप्यवस्थाभेददोषो दुस्तरः । कथं चैकरूपत्वे सति तस्याकस्मिको बन्धनसंयोगः । बन्धनसंयोगाच्च प्राक् किं नायं मुक्तोऽभवत् । किंच तेन बन्धनेनासौ विकृतिमनुभवति न वा । अनुभवति चेत् चर्मादिवद् अनित्यः । नानुभवति चेत् निर्विकारत्वे सता असता वा तेन गगनस्येव न कोऽप्यस्य विशेषः इति बन्धवैकल्यान्नित्यमुक्त एव स्यात् । ततश्च विशीर्णा जगति बन्धमोक्षव्यवस्था । तथा च पठन्ति ।

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम् ।
चर्मोपमश्चेत्सोऽनित्यः खतुल्यश्चेदसत्फलः ॥

बन्धानुपपत्तौ मोक्षस्याप्यनुपपत्तिः । बन्धनविच्छेदपर्यायत्वान्मुक्तिशब्दस्य । इति ॥

एवमनित्यैकान्तवादेपि सुखदुःखाद्यनुपपत्तिः । अनित्यं हि अत्यन्तोच्छेदधर्मकम् । तथाभूते चात्मनि पुण्योपादानक्रियाकारिणो निरन्वयं विनष्टत्वात् कस्य नाम तत्फलभूतसुखानुभवः । एवं पापोपादानक्रियाकारिणोपि निरवयवनाशे कस्य दुःखसंवेदनमस्तु । एवं चान्यः क्रियाकारी अन्यश्च तत्फलभोक्ता इत्यसमञ्जसमापद्यते । अथ

यस्मिन्नेव हि संताने आहिता कर्मवासना ।
फलं तत्रैव संधत्ते कर्पासे रक्तता यथा ॥

इतिवचनान्नासमञ्जसमित्यपि वाङ्मात्रम् । संतानवासनयोरवास्तवत्वेन प्रागेव निर्लोठितत्वात् । तथा पुण्यपापेपि न घटेते । तयोर्हि अर्थक्रिया सुखदुःखोपभोगः तदनुपपत्तिश्चानन्तरमेवोक्ता । ततोऽर्थक्रियाकारित्वाभावात् तयोरप्यघटमानत्वम् । किंचानित्यः क्षणमात्रस्थायी तस्मिंश्च क्षणे उत्पत्तिमात्रव्यग्रत्वात् तस्य कुतः पुण्यपापोपादानक्रियार्जनम् । द्वितीयादिक्षणेषु चावस्थातुमेव न लभते । पुण्यपापोपादानक्रियाभावे च पुण्यपापे कुतः । निर्मूलत्वात् । तदसत्त्वे च कुतस्तनः सुखदुःखभोगः । आस्तां वा कथंचिदेतत् । तथापि पूर्वक्षणसदृशेनोत्तरक्षणेन भवितव्यम् । उपादानानुरूपत्वाद् उपादेयस्य । ततः पूर्वक्षणाद् दुःखितादुत्तरक्षणः कथं सुखित उत्पद्यते । कथं च सुखितात्ततः स दुःखितः स्यात् । विसदृशभागतापत्तेः । एवं पुण्यपापादावपि । तस्माद्यत्किंचिदेतत् ॥ एवं बन्धमोक्षयोरप्यसंभवः । लोकेपि हि य एव बद्धः स एव मुच्यते । निरन्वयनाशाभ्युपगमे चैकाधिकरणत्वाभावात् संतानस्य चावास्तवत्वात् कुतस्तयोः संभावनामात्रमपि । इति परिणामिनि चात्मनि स्वीक्रियमाणं सर्वं निर्बाधमुपपद्यते ।

परिणामोऽवस्थान्तरगमनं न च सर्वथा ह्यवस्थानम् ।
न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥

इतिवचनात् । पातञ्जलटीकाकारोऽप्याह । अवस्थितस्य द्रव्यस्य पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः इति ॥ एवं सामान्यविशेषसदसदभिलाप्यानभिलाप्यैकान्तवादेष्वपि सुखदुःखाद्यभावः स्वयमभियुक्तैरभ्यूह्यः ॥

अथोत्तरार्धव्याख्या । एवमनुपपद्यमानेपि सुखदुःखभोगादिव्यवहारे परैः परतीर्थिकैः अथ च परमार्थतः शत्रुभिः । परशब्दो हि शत्रुपर्यायोप्यस्ति । दुर्नीतिवादव्यसनासिना । नीयते एकदेशविशिष्टोर्थः प्रतीतिविषयमाभिरिति नीतयो नयाः । दुष्टा नीतयो दुर्नीतयो दुर्नयाः । तेषां वदनं परेभ्यः प्रतिपादनं दुर्नीतिवादः । तत्र यद् व्यसनम् अत्यासक्तिः औचित्यनिरपेक्षा प्रवृत्तिरिति यावत् दुर्नीतिवादव्यसनम् । तदेव सद्बोधशरीरोच्छेदनशक्तियुक्तत्वाद् असिरिव असिः कृपाणः दुर्नीतिवादव्यसनासिः । तेन दुर्नीतिवादव्यसनासिना करणभूतेन दुर्नयप्ररूपणहेवाकखड्गेन । एवम् इत्यनुभवसिद्धं प्रकारमाह । अपिशब्दस्य भिन्नक्रमत्वाद् अशेषमपि जगत् निखिलमपि त्रैलोक्यम् । तात्स्थ्यात् तद्व्यपदेश इति त्रैलोक्यगतजन्तुजातम् । विलुप्तम् सम्यग्ज्ञानादिभावप्राणव्यपरोपणेन व्यापादितम् । तत् त्रायस्व इत्याशयः । सम्यग्ज्ञानादयोहि । भावप्राणाः प्रावचनिकैर्गीयन्ते । अत एव सिद्धेष्वपि जीवव्यपदेशः । अन्यथा हि जीवधातुः प्राणधारणार्थेभिधीयते तेषां च दशविधप्राणधारणाभावादजीवत्वप्राप्तिः । सा च विरुद्धा । तस्मात्संसारिणो दशविधद्रव्यप्राणधारणाज्जीवाः । सिद्धाश्च ज्ञानादिभावप्राणधारणात् । इति सिद्धम् ॥ दुर्नयस्वरूपं चोत्तरकाव्ये व्याख्यास्यामः । इति काव्यार्थः ॥

सांप्रतं दुर्नयनयप्रमाणप्ररूपणद्वारेण प्रमाणनयैरधिगमः इति वचनाज्जीवाजीवादितत्त्वाधिगमनिबन्धनानां तेषां प्रमाणनयानां प्रतिपादयितुः स्वामिनः स्याद्वादविरोधिदुर्नयमार्गनिराकरिष्णुमनन्यसामान्यं वचनातिशयं स्तुवन्नाह ।

सदेव सत्स्यात्सदिति त्रिधार्थो
मीयेत दुर्नीतिनयप्रमाणैः ।
यथार्थदर्शी तु नयप्रमाण-
पथेन दुर्नीतिपथं त्वमास्थः ॥ २८ ॥

अर्थ्यते परिच्छिद्यत इत्यर्थः पदार्थः । त्रिधा त्रिभिः प्रकारैः । मीयेत परिच्छिद्येत । विधौ सप्तमी । कैस्त्रिभिः प्रकारैरित्याह । दुर्नीतिनयप्रमाणैः । नीयते परिच्छिद्यते एकदेशविशिष्टोऽर्थ आभिरिति नीतयः नयाः । दुष्टा नीतयो दुर्नीतयो दुर्नया इत्यर्थः । नया नैगमाद्याः । प्रमीयते परिच्छिद्यतेऽर्थोऽनेकान्तविशिष्टोऽनेनेति प्रमाणं स्याद्वादात्मकं प्रत्यक्षपरोक्षलक्षणम् । दुर्नीतयश्च नयाश्च प्रमाणे च दुर्नीतिनयप्रमाणानि तैः । केनोल्लेखेन मीयेतेत्याह सदेव सत्स्यात्सदिति । सदिति अव्यक्तत्वान्नपुंसकत्वं यथा किं तस्या गर्भे जातमिति । सदेवेति दुर्नयः । सदिति नयः । स्यात्सदिति प्रमाणम् । तथा हि । दुर्नयस्तावत्सदेवेति ब्रवीति । अस्त्येव घट इति । अयं वस्तुन्येकान्तास्तित्वमेवाभ्युपगच्छन्नितरधर्माणां तिरस्कारेण स्वाभिप्रेतमेव धर्मं व्यवस्थापयति । दुर्नयत्वं चास्य मिथ्यारूपत्वात् । मिथ्यारूपत्वं च तत्र धर्मान्तराणां सतामपि निह्नवात् । तथा सदित्युल्लेखवान्नयः । स ह्यस्ति घटः इति घटे स्वाभिमतमस्तित्वधर्मं प्रसाधयन् शेषधर्मेषु गजनिमीलिकामालम्बते । न चास्य दुर्नयत्वम् । धर्मान्तरा-

तिरस्कारात् । न च प्रमाणत्वम् । स्याच्छब्देनालाञ्छितत्वात् । स्यात्सदिति स्यात्कथंचित्सद्वस्तु इति प्रमाणम् । प्रमाणत्वं चास्य दृष्टेष्टाबाधितत्वाद्विपक्षे बाधकसद्भावाच्च । सर्वं हि वस्तु स्वरूपेण सत् पररूपेण चासदित्यसकृदुक्तम् । सदिति दिङ्मात्रदेशनार्थम् ॥ अनया दिशा असत्त्वनित्यत्वानित्यत्ववक्तव्यत्वावक्तव्यत्वसामान्यविशेषाद्यपि बोद्धव्यम् ॥

इत्थं वस्तुस्वरूपमाख्याय स्तुतिमाह यथार्थदर्शी इत्यादि । दुर्नीतिपथं दुर्नयमार्गम् । तुशब्दस्यावधारणार्थस्य भिन्नक्रमत्वात् त्वमेव । आस्थः त्वमेव निराकृतवान् । न तीर्थान्तरदैवतानि । केन कृत्वा । नयप्रमाणपथेन । नयप्रमाणे उक्तस्वरूपे । तयोर्मार्गेण प्रचारेण । यतस्त्वं यथार्थदर्शी । यथार्थोस्ति तथैव पश्यतीत्येवंशीलो यथार्थदर्शी । विमलकेवलज्योतिषा यथावस्थितवस्तुदर्शी । तीर्थान्तरशास्तारस्तु रागादिदोषकालुष्यकलङ्कितत्वेन तथाविधज्ञानाभावान्न यथार्थदर्शिनः । ततः कथं नाम दुर्नयपथमथने प्रगल्भन्ते ते तपस्विनः । नहि स्वयमनयप्रवृत्तः परेषामनयं निषेद्धुमुद्धुरतां धत्ते । इदमुक्तं भवति । यथा कश्चित्सन्मार्गवेदी परोपकारदुर्ललितः पुरुषश्चौरश्वापदकण्टकाद्याकीर्णं मार्गं परित्याज्य पथिकानां गुणदोषोभयविकलं दोषास्पृष्टं गुणयुक्तं च मार्गमुपदर्शयति एवं जगन्नाथोपि दुर्नयतिरस्करणेन भव्येभ्यो नयप्रमाणमार्गं प्ररूपयतीति । आस्थः इत्यस्यतेरद्यतन्यां शास्त्यसूवक्तिख्यातेरङ् इत्यङि श्वयत्यसूवचपतः श्वास्थवोचपप्तम् इति अस्थादेशे स्वरादेस्तासु इति वृद्धौ रूपम् ॥ मुख्यवृत्त्या च प्रमाणस्यैव प्रामाण्यम् । यच्चात्र नयानां प्रमाणतुल्यकक्षताख्यापनं तत्तेषामनुयोगद्वारभूततया प्रज्ञापनाङ्गत्वज्ञापनार्थम् । चत्वारि हि प्रवचनानुयोगमहानगरस्य द्वाराण्युपक्रमो निक्षेपोनुगमो नयश्चेति ।

एतेषां च स्वरूपमावश्यकभाष्यादेर्निरूपणीयम् । इह तु नोच्यते । ग्रन्थगौरवभयात् । अत्र चैकत्र कृतसमासान्तः पथिन्शब्दः । अन्यत्र चाव्युत्पन्नः पथशब्दोऽदन्त इति पथशब्दस्य द्विःप्रयोगो न दुष्यति ॥

अथ दुर्नयनयप्रमाणस्वरूपं किंचिन्निरूप्यते । तत्रापि प्रथमं नयस्वरूपम् । तदनधिगमे दुर्नयस्वरूपस्य दुष्परिज्ञानत्वात् । अत्र चाचार्येण प्रथमं दुर्नयनिर्देशो यथोत्तरं प्राधान्यावबोधनार्थः कृतः । तत्र प्रमाणप्रतिपन्नार्थैकदेशपरामर्शो नयः । अनन्तधर्माध्यासितं वस्तु स्वाभिप्रेतैकधर्मविशिष्टं नयति प्रापयति संवेदनकोटिमारोहयतीति नयः । प्रमाणप्रवृत्तेरुत्तरकालभावी परामर्श इत्यर्थः । नयाश्चानन्ताः । अनन्तधर्मत्वाद्वस्तुनस्तदेकधर्मपर्यवसितानां वक्तुरभिप्रायाणां च नयत्वात् । तथा चवृद्धाः ।

जावइआ वयणपहा तावइआ चेव हुंति नयवाया ।

इति । तथापि चिरंतनाचार्यैः सर्वसंग्राहिसप्ताभिप्रायपरिकल्पनाद्वारेण सप्त नयाः प्रतिपादिताः । तद्यथा । नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूता इति । कथमेषां सर्वग्राहकत्वमिति चेदुच्यते । अभिप्रायस्तावदर्थद्वारेण शब्दद्वारेण वा प्रवर्तते । गत्यन्तराभावात् । तत्र ये केचनार्थनिरूपणप्रवणाः प्रमात्रभिप्रायास्ते सर्वेऽप्याद्ये नयचतुष्टयेऽन्तर्भवन्ति । ये च शब्दविचारचतुरास्ते शब्दादिनयत्रय इति ॥

तत्र नैगमः सत्तालक्षणं महासामान्यम् अवान्तरसामान्यानि च द्रव्यत्वगुणत्वकर्मत्वादीनि तथान्त्यान् विशेषान् सकलासाधारणरूपलक्षणानवान्तर विशेषांश्चापेक्षया पररूपव्यावर्तनक्षमान् सामान्यादत्यन्तविनिर्लुठितस्वरूपानभिप्रैति । इदं च स्वतन्त्रसामान्यविशेषवादे क्षुण्णमिति न पृथक्प्रयत्नः । प्रवचन-

प्रसिद्धानिलयनप्रस्थदृष्टान्तद्वयगम्यश्चायम् ॥

संग्रहस्तु अशेषविशेषतिरोधानद्वारेण सामान्यरूपतया विश्वमुपादत्ते । एतच्च सामान्यैकान्तवादे प्राक् प्रपञ्चितम् ॥

व्यवहारस्त्वेवमाह । यथालोकग्राहमेव वस्त्वस्तु किमनया अदृष्टाव्यवह्रियमाणवस्तुपरिकल्पनकष्टपिष्टिकया । यदेव च लोकव्यवहारपथमवतरति तस्यैवानुग्राहकं प्रमाणमुपलभ्यते नेतरस्य । न हि सामान्यमनादिनिधनमेकं संग्रहाभिमतं प्रमाणभूमिः । तथानुभवाभावात् । सर्वस्य सर्वदर्शित्वप्रसङ्गाच्च । नापि विशेषाः परमाणुलक्षणाः क्षणक्षयिणः प्रमाणगोचराः । तथाप्रवृत्तेरभावात् । तस्मादिमेव निखिललोकाबाधितं प्रमाणप्रसिद्धं कियत्कालभाविस्थूलतामाबिभ्राणमुदकाद्याहरणाद्यर्थक्रियानिर्वर्तनक्षमं घटादिकं वस्तुरूपं पारमार्थिकम् । पूर्वोत्तरकालभावितत्पर्यायपर्यालोचना पुनरज्यायसी । तत्र प्रमाणप्रसराभावात् । प्रमाणमन्तरेण च विचारस्य कर्तुमशक्यत्वात् । अवस्तुत्वाच्च तेषां किं तद्गोचरपर्यालोचनेन । तथाहि पूर्वोत्तरकालभाविनो द्रव्यविवर्ताः क्षणक्षयिपरमाणुलक्षणा वा विशेषा न कथंचन लोकव्यवहारमुपरचयन्ति । तन्न ते वस्तुरूपाः । लोकव्यवहारोपयोगिनामेव वस्तुत्वात् । अत एव पन्था गच्छति कुण्डिका स्रवति गिरिर्दह्यते मञ्चाः क्रोशन्तीत्यादिव्यवहाराणां प्रामाण्यम् । तथा च वाचकमुख्यः । लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहारः इति ॥

ऋजुसूत्रः पुनरिदं मन्यते । वर्तमानक्षणविवर्त्येव वस्तुरूपम् । नातीतमनागतं च । अतीतस्य विनष्टत्वादनागतस्यालब्धात्मलाभत्वात्खरविषाणादिभ्योऽविशिष्यमाणतया सकलशक्तिविरहरूपत्वान्नार्थक्रियानिर्वर्तनक्षमत्वं तदभावाच्च न वस्तुत्वम् । यदे-

वार्थक्रियाकारि तदेव परमार्थसत् इति वचनात् । वर्तमानक्षणालिङ्गितं पुनर्वस्तुरूपं समस्तार्थक्रियासु व्याप्रियत इति तदेव पारमार्थिकम् । तदपि च निरंशमभ्युपगन्तव्यम् । अंशव्याप्तेर्युक्तिरिक्तत्वात् । एकस्यानेकस्वभावतामन्तरेणानेकस्वावयवव्यापनायोगात् । अनेकस्वभावता एवास्तु इति चेत् न । विरोधव्याघ्राघ्रातत्वात् । तथाहि यद्येकः स्वभावः कथमनेकोऽनेकश्चेत्कथमेकः । एकानेकयोः परस्परपरिहारेणावस्थानात् । तस्मात्स्वरूपनिमग्नाः परमाणव एव परस्परोपसर्पणद्वारेण कथंचिन्निचयरूपतामापन्ना निखिलकार्येषु व्यापारभाज इति त एव स्वलक्षणं न स्थूलतां धारयत्पारमार्थिकमिति । एवमस्याभिप्रायेण यदेव स्वकीयं तदेव वस्तु न परकीयम् । अनुपयोगित्वात् । इति ॥

शब्दस्तु रूढितो यावन्तो ध्वनयः कस्मिंश्चिदर्थे प्रवर्तन्ते यथेन्द्रशक्रपुरंदरादयः सुरपतौ तेषां सर्वेषामप्येकमर्थमभिप्रैति किल । प्रतीतिवशात् । यथा शब्दाव्यतिरेकोऽर्थस्य प्रतिपाद्यते तथैव तस्यैकमनेकत्वं वा प्रतिपादनीयम् । न चेन्द्रशक्रपुरन्दरादयः पर्यायशब्दाविभिन्नार्थवाचितया कदाचन प्रतीयन्ते । तेभ्यः सर्वदा एकाकारपरामर्शोत्पत्तेरस्खलितवृत्तितया तथैव व्यवहारदर्शनात् । तस्मादेक एव पर्यायशब्दानामर्थ इति । शब्द्यते आहूयतेऽनेनाभिप्रायेणार्थ इति निरुक्तात् एकार्थप्रतिपादनाभिप्रायेणैव पर्यायध्वनीनां प्रयोगात् । यथा चायं पर्यायशब्दानामेकमर्थमभिप्रैति तथा तटस्तटी तटमिति विरुद्धलिङ्गलक्षणधर्माभिसंबन्धाद्वस्तुनो भेदं चाभिधत्ते । न हि विरुद्धधर्मकृतं भेदमनुभवतो वस्तुनो विरुद्धधर्मायोगो युक्तः । एवं संख्याकालकारकपुरुषादिभेदादपि भेदोऽभ्युपगन्तव्यः । तत्र संख्या एकत्वादिः कालोऽतीतादिः कारकं कर्त्रादि पुरुषः प्रथमपुरुषादिः ॥ समभिरूढस्तु

पर्यायशब्दानां प्रविभक्तमेवार्थमभिमन्यते। तद्यथा इन्दनादिन्द्रः। परमैश्वर्यमिन्द्रशब्दवाच्यं परमार्थतस्तद्वत्यर्थे । अतद्वत्यर्थे पुनरुपचारतो वर्तते । न वा कश्चित्तद्वान्। सर्वशब्दानां परस्परविभक्तार्थप्रतिपादितया आश्रयाश्रयिभावेन प्रवृत्त्यसिद्धेः । एवं शकनाच्छक्रः पूर्दारणात्पुरन्दर इत्यादिभिन्नार्थत्वं सर्वशब्दानां दर्शयति । प्रमाणयति च । पर्यायशब्दा अपि भिन्नार्थाः। प्रविभक्तव्युत्पत्तिनिमित्तकत्वात् । इह ये ये प्रविभक्तव्युत्पत्तिनिमित्तकास्ते ते भिन्नार्थका यथेन्द्रपशुपुरुषशब्दाः। विभिन्नव्युत्पत्तिनिमित्तकाश्च पर्यायशब्दा अपि । अतो भिन्नार्था इति ॥

एवंभूतः पुनरेवं भाषते । यस्मिन्नर्थे शब्दो व्युत्पाद्यते स व्युत्पत्तिनिमित्तमर्थो यदैव प्रवर्तते तदैव तं शब्दं प्रवर्तमानमभिप्रैति न सामान्येन। यथोदकाद्याहरणवेलायां योषिदादिमस्तकारूढो विशिष्टचेष्टावानेव घटोभिधीयते न शेषः। घटशब्दव्युत्पत्तिनिमित्तशून्यत्वात् पटादिवदिति । अतीतां भाविनीं वा चेष्टामङ्गीकृत्य सामान्येनैवोच्यत इति चेत् न। तयोर्विनष्टानुत्पन्नतया शशविषाणकल्पत्वात्। तथापि तद्वारेण शब्दप्रवर्तने सर्वत्र प्रवर्तयितव्यः । विशेषाभावात्। किंच यद्यतीतवर्त्स्यच्चेष्टापेक्षया घटशब्दोऽचेष्टावत्यपि प्रयुज्येत तदा कपालमृत्पिण्डादावपि तत्प्रवर्तनं दुर्निवारं स्यात्। विशेषाभावात्। तस्माद्यत्र क्षणे व्युत्पत्तिनिमित्तमविकलमस्ति तस्मिन्नेव सोर्थस्तच्छब्दवाच्य इति ॥

अत्र संग्रहश्लोकाः ।

अन्यदेव हि सामान्यमभिन्नज्ञानकारणम् ।
विशेषोप्यन्य एवेति मन्यते नैगमो नयः ॥ १ ॥
सद्रूपतानतिक्रान्तं स्वस्वभावमिदं जगत् ।
सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः ॥ २ ॥

व्यवहारस्तु तामेव प्रतिवस्तु व्यवस्थिताम् ।
तथैव दृश्यमानत्वाद्व्यापारयति देहिनः ॥ ३ ॥
तत्रर्जुसूत्रनीतिः स्याच्छुद्धपर्यायसंश्रिता ।
नश्वरस्यैव भावस्य भावात्स्थितिवियोगतः ॥ ४ ॥
विरोधिलिङ्गसंख्यादिभेदाद्भिन्नस्वभावताम् ।
तस्यैवं मन्यमानोयं शब्दः प्रत्यवतिष्ठते ॥ ५ ॥
तथाविधस्य तस्यापि वस्तुनः क्षणवर्तिनः ।
ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम् ॥ ६ ॥
एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते ।
क्रियाभेदेन भिन्नत्वादेवंभूतोऽभिमन्यते ॥ ७ ॥

एत एव च परामर्शा अभिप्रेतधर्मावधारणात्मकतया शेषधर्मतिरस्कारेण प्रवर्तमाना दुर्नयसंज्ञामश्नुवते । तद्बलप्रभावितसत्ताका हि खल्वेते परप्रवादाः । तथा हि । नैगमनयदर्शनानुसारिणौ नैयायिकवैशेषिकौ । संग्रहाभिप्रायप्रवृत्ताः सर्वेऽप्यद्वैतवादाः सांख्यदर्शनं च । व्यवहारनयानुपातिप्रायश्चार्वाकदर्शनम् । ऋजुसूत्राकूतप्रवृत्तबुद्धयस्ताथागताः । शब्दादिनयावलम्बिनो वैयाकरणादयः । उक्तं च सोदाहरणं नयदुर्नयस्वरूपं श्रीदेवसूरिपादैः। तथा च तद्ग्रन्थः । नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः इति । स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः । स व्याससमासाभ्यां द्विप्रकारः । व्यासतोऽनेकविकल्पः । समासतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च । आद्यो नैगमसंग्रहव्यवहारभेदात्रेधा । धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च । प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः । सच्चैतन्यमात्मनीति धर्मयोः । वस्तुपर्यायवद्द्रव्यमिति धर्मिणोः । क्षणमेकं सुखी विषयासक्तजीव इति

धर्मधर्मिणोः । धर्मद्वयादीनामैकान्तिकपार्थक्याभिसंधिर्नैगमाभासः ॥ यथा आत्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादि ॥ सामान्यमात्रग्राही परामर्शः संग्रहः । अयमुभयविकल्पः परोऽपरश्च । अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परः संग्रहः । विश्वमेकं सत् अविशेषादिति यथा । सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः । यथा सत्तैव तत्त्वं ततः पृथग्भूतानां विशेषाणामदर्शनात् । द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥ धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिर्यथा । द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः । यथा द्रव्यत्वमेव तत्त्वं ततोर्थान्तरभूतानां द्रव्याणामनुपलब्धेरित्यादि ॥ संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसंधिना क्रियते स व्यवहारः । यथा यत्सत्तद्द्रव्यं पर्यायो वेत्यादिः । यः पुनरपारमार्थिकद्रव्यपर्यायविभागमभिप्रैति स व्यवहाराभासः । यथा चार्वाकदर्शनम् ॥ पर्यायार्थिकश्चतुर्धा ऋजुसूत्रः शब्दः समभिरूढ एवंभूतश्च ॥ ऋजु वर्तमानक्षणस्थायिपर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्रः । यथा सुखविवर्तः संप्रत्यस्तीत्यादिः । सर्वथा द्रव्यापलापी तदाभासः । यथा तथागतमतम् ॥ कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः । यथा बभूव भवति भविष्यति सुमेरुरित्यादिः । तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः । यथा बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नमेवार्थमभिदधति भिन्नकालशब्दत्वात् तादृक्सिद्धान्यशब्दवदित्यादिः ॥ पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः । इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात्पुरन्दर इत्यादिषु यथा पर्यायध्वनीनामभिधेयनानात्वमेव

कक्षीकुर्वाणस्तदाभासः यथेन्द्रः शक्रः पुरन्दर इत्यादय शब्दा भिन्नाभिधेया एव भिन्नशब्दत्वात्करिकुरङ्गतुरङ्गशब्दवदित्यादिः ॥ शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवंभूतः । यथेन्दनमनुभवन्निन्द्रः शकनक्रियापरिणतः शक्रः पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते । क्रियानाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः । यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात् पटवदित्यादिः ॥ एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः । शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥ पूर्वः पूर्वो नयः प्रचुरगोचरः परः परस्तु परिमितविषयः । सन्मात्रगोचरात्संग्रहान्नैगमो भावाभावभूमिकत्वाद्भूमविषयः। सद्विशेषप्रकाशकाद्व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद्बहुविषयः । वर्तमानविषयादृजुसूत्राद्व्यवहारस्त्रिकालविषयावलम्बित्वादनल्पार्थः । कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुयायित्वात्प्रभूतविषयः । प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात्समभिरूढस्तदन्यथार्थस्थापकत्वान्महागोचरः ।नयवाक्यमपि स्वविषये प्रवर्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति । इति ॥ विशेषार्थिना नयानां नामान्वर्थविशेषलक्षणाक्षेपपरिहारादिचर्चस्तु भाष्यमहोदधिगन्धहस्तिटीकान्यायावतारादिग्रन्थेभ्यो निरीक्षणीयः ॥

प्रमाणं तु सम्यगर्थनिर्णयलक्षणं सर्वनयात्मकम् ॥ स्याच्छब्दलाञ्छितानां नयानामेव प्रमाणव्यपदेशभाक्त्वात् । तथा च श्रीविमलनाथस्तवे श्रीसमन्तभद्रः ।

नयास्तव स्यात्पदलाञ्छना इमे रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः ॥

इति । तच्च द्विविधं प्रत्यक्षं परोक्षं च । तत्र प्रत्यक्षं द्विधा सांव्यवहारिकं पारमार्थिकं च । सांव्यवहारिकं द्विविधम् इन्द्रियानिन्द्रियनिमित्तभेदात् । तद् द्वितयमवग्रहेहाऽवायधारणाभेदादेकैकशश्चतुर्विकल्पम् । अवग्रहादीनां स्वरूपं सुप्रतीतत्वान्न प्रतन्यते । पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् । तद्विविधं क्षायोपशमिकं क्षायिकं च । आद्यमवधिमनःपर्यायभेदाद्द्विधा । क्षायिकं तु केवलज्ञानमिति । परोक्षं च स्मृतिप्रत्यभिज्ञानोहानुमानागमभेदात्पञ्चप्रकारम् । तत्र संस्कारप्रबोधसंभूतमनुभूतार्थविषयं तदित्याकारं वेदनं स्मृतिः । तत्तीर्थकरविम्बमिति यथा । अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम् । यथा तज्जातीय एवायं गोपिण्डो गोसदृशो गवयः स एवायं जिनदत्त इत्यादि । उपालम्भानुपलम्भसंभवं त्रिकालीकलितसाध्यसाधनसंबन्धाद्यालम्बनमिदमस्मिन्सत्येव भवतीत्याद्याकारं संवेदनमूहाऽपरनामा तर्कः । यथा यावान् कश्चिद्धूमः स सर्वो वन्हौ सत्येव भवतीति तस्मिन्नसत्यसौ न भवत्येवेति वा । अनुमानं द्विधा स्वार्थं परार्थं च । तत्रान्यथाऽनुपपत्त्येकलक्षणहेतुग्रहणसंबन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम् । पक्षहेतुवचनात्मकं परार्थम् अनुमानमुपचारात् । आप्तवचनादाविर्भूतमर्थसंवेदनमागमः । उपचारादाप्तवचनं च । इति स्मृत्यादीनां च विशेषस्वरूपं स्याद्वादरत्नाकरात्साक्षेपपरिहारं ज्ञेयमिति । प्रमाणान्तराणां पुनरर्थापत्त्युपमानसंभवप्रातिभैतिह्यादीनामत्रैवान्तर्भावः ॥ संनिकर्षादीनां तु जडत्वादेव न प्रामाण्यम् । इति ॥ तदेवंविधेन नयप्रमाणोपन्यासेन दुर्नयमार्गस्त्वया खिलीकृतः । इति काव्यार्थः ॥

इदानीं सप्तद्वीपसमुद्रमात्रो लोक इति वावदूकानां तन्मात्रलोके परिमितानामेव सत्त्वानां संभवात् परिमितात्मवादिनां दोषदर्शनमुखेन भगवत्प्रणीतं जीवानन्त्यवादं निर्दोषतयाभिष्टुवन्नाह ।

मुक्तोपि वाभ्येतु भवं भवो वा
भवस्थशून्योस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसंख्य-
माख्यस्तथा नाथ यथा न दोषः ॥ २९ ॥

मितात्मवादे संख्यातानामात्मनामभ्युपगमे दूषणद्वयमुपतिष्ठते । तत्क्रमेण दर्शयति । मुक्तोपि वाभ्येतु भवमिति । मुक्तः निर्वृतिमाप्तः । सोपि वा । अपि विस्मये । वाशब्द उत्तरदोषापेक्षया समुच्चयार्थः यथा देवो वा दानवो वेति । भवमभ्येतु संसारमभ्यागच्छतु । इत्येको दोषप्रसङ्गः ॥ भवो वा भवस्थशून्योस्तु । भवः संसारः स वा भवस्थशून्यः संसारिजीवैर्विरहितः अस्तु भवतु । इति द्वितीयो दोषप्रसङ्गः ॥

इदमत्राकूतम् । यदि परिमिता एवात्मानो मन्यन्ते तदा तत्त्वज्ञानाभ्यासप्रकर्षादिक्रमेणापवर्गं गच्छत्सु तेषु संभाव्यते खलु स कश्चित्कालो यत्र तेषां सर्वेषां निर्वृतिः । कालस्यानादिनिधनत्वादात्मनां च परिमितत्वात्संसारस्य रिक्तता भवन्ती केन वार्यताम् । समुन्नीयते हि प्रतिनियतसलिलपटलपरिपूरिते सरसि पवनतपनातपनजनोदञ्चनादिना कालान्तरे रिक्तता । न चायमर्थः प्रामाणिकस्य कस्यचित्प्रसिद्धः । संसारस्य स्वरूपहानिप्रसङ्गात् । तत्स्वरूपं ह्येतद्यत्र कर्मवशवर्तिनः प्राणिनः संसरन्ति समासार्षुः संसरिष्यन्ति चेति । सर्वेषां च निर्वृतत्वे संसारस्य वा रिक्तत्वं हठादभ्युपगन्तव्यम् । मुक्तैर्वा पुनर्भव आगन्तव्यम् । न च क्षीणकर्मणां भवाधिकारः ।

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः ॥

इति वचनात् । आह च पतञ्जलिः । सति मूले तद्विपाको जात्यायुर्भोगा इति। एतट्टीका च। सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलः । यथा तुषावनद्धाः शालितण्डुला अदग्धबीजभावाः प्ररोहणसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति । नापनीतक्लेशो न प्रसंख्यानदग्धक्लेशबीजभावो वेति । स च विपाकस्त्रिविधो जातिरायुर्भोग इति । अक्षपादोऽप्याह । न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य इति ॥

एवं विभङ्गज्ञानिशिवराजर्षिमतानुसारिणो दूषयित्वा उत्तरार्धेन भगवदुपज्ञमपरिमितात्मवादं निर्दोषतया स्तौति । षड्जीवेत्यादि । त्वं तु हे नाथ तथा तेन प्रकारेण अनन्तसंख्यम् अनन्ताख्यसंख्याविशेषयुक्तम् षड्जीवकायम् । अजीवन् जीवन्ति जीविष्यन्ति चेति जीवाः इन्द्रियादिज्ञानादिद्रव्यभावप्राणधारणयुक्ताः तेषां संधेवानूर्ध्वे इति चिनोतेर्घञि आदेश्च कत्वे कायः समूहो जीवकायः पृथिव्यादिः । षण्णां जीवकायानां समाहारः षड्जीवकायम् । पात्रादिदर्शनान्नपुंसकत्वम् । अथ वा षण्णां जीवानां कायः प्रत्येकं संघातः षड्जीवकायः तं षड्जीवकायम् । पृथिव्यप्तेजोवायुवनस्पतित्रसलक्षणषड्जीवनिकायम् । तथा तेन प्रकारेण । आख्यः मर्यादया प्ररूपितवान् । यथा येन प्रकारेण । न दोषः दूषणमिति । जात्यपेक्षमेकवचनम् । प्रागुक्तदोषद्वयजातीया अन्येऽपि दोषा यथा न प्रादुःष्यन्ति तथा त्वं जीवानन्त्यमुपदिष्टवानित्यर्थः । आख्य इति आङ्पूर्वस्य ख्यातेरङि सिद्धिः । त्वमित्येकवचनं चेदं ज्ञापयति यज्जगद्गुरोरेवैकस्येदृक् प्ररूपणसामर्थ्यं न तीर्थान्तरशास्तॄणामिति ॥

पृथिव्यादीनां पुनर्जीवमित्थं साधनीयम् । यथा सात्मिका विद्रुमशिलादिरूपा पृथिवी छेदे समानधातूत्थानात् अर्शोङ्कुरवत् । भौममम्भोपि सात्मकं क्षतभूसजातीयस्य स्वभावस्य संभवात् शालूरवत् । आन्तरिक्षमपि सात्मकम् अभ्रादिविकारे स्वतः संभूय पातात् मत्स्यादिवत् । तेजोपि सात्मकम् आहारोपादानेन वृद्ध्यादिविकारोपलम्भात् पुरुषाङ्गवत् । वायुरपि सात्मकः अपरप्रेरितत्वे तिर्यग्गतिमत्त्वात् गोवत् । वनस्पतिरपि सात्मकः छेदादिभिर्म्लान्यादिदर्शनात् पुरुषाङ्गवत् । केषांचित्स्वापाङ्गनोपश्लेषादिविकाराच्च । अपकर्षतश्चैतन्याद्वा सर्वेषां सात्मकत्वसिद्धिः । आप्तवचनाच्च । त्रसेषु च कृमिपिपीलिकाभ्रमरमनुष्यादिषु न केषांचित्सात्मकत्वे विगानमिति ॥

यथा च भगवदुपज्ञे जीवानन्त्ये न दोषस्तथा दिङ्मात्रं भाव्यते । भगवन्मते हि षण्णां जीवनिकायानामेतदल्पबहुत्वम् । सर्वस्तोकास्त्रसकायिकाः । तेभ्योऽसंख्यातगुणास्तेजस्कायिकाः । तेभ्यो विशेषाधिकाः पृथिवीकायिकाः । तेभ्यो विशेषाधिका अप्कायिकाः । तेभ्योपि विशेषाधिका वायुकायिकाः । तेभ्योनन्तगुणा वनस्पतिकायिकाः । ते च व्यावहारिका अव्यावहारिकाश्च ।

गोला य असंखिज्जा असंखणिगोअ गोलओ भणिओ ।
इक्किक्कम्मि णिगोए अणन्तजीवा मुणेअव्वा ॥
सिज्झंति जत्तिया खलु इह संववहारजीवरासिओ ।
एंति अणाइवणस्सइ रासिओ तत्तिया तम्मि ॥

इति वचनात् । यावन्तश्च यतो मुक्तिं गच्छन्ति जीवास्तावन्तोऽनादिनिगोदवनस्पतिराशेस्तत्रागच्छन्ति । न च तावता तस्य काचित्परिहाणिः। निगोदजीवानन्त्यस्याक्षयत्वात् । निगोदस्वरूपं च समयसागरादवगन्तव्यम् । अनाद्यनन्तेपि काले ये केचिन्निर्वृता

निर्वान्ति निर्वास्यन्ति च ते निगोदानामनन्तभागोपि न वर्तन्ते नावर्तिषत न वर्त्स्यन्ति । ततश्च कथं मुक्तानां भवागमनप्रसङ्गः कथं च संसारस्य रिक्ततामसक्तिरिति । अभिप्रेतं चैतदन्ययूथ्यानामपि । यथा चोक्तं वार्तिककारेण ।

अत एव विशुध्यत्सु मुच्यमानेषु संततम् ।
ब्रह्माण्डलोकजीवानामनन्तत्वादशून्यता ॥
अन्त्यन्यूनातिरिक्तत्वैर्युज्यते परिमाणवत् ।
वस्तुन्यपरिमेये तु नूनं तेषामसंभवः ॥

इति काव्यार्थः ॥

अधुना परदर्शनानां परस्परविरुद्धार्थसमर्थकतया मत्सरित्वं प्रकाशयन् सर्वज्ञोपज्ञसिद्धान्तस्यान्योन्यानुगतसर्वनयमयतया मात्सर्याभावमाविर्भावयति ।

अन्योन्यपक्षप्रातिपक्षभावा-
द्यथा परे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्
न पक्षपाती समयस्तथा ते ॥ ३० ॥

प्रकर्षेणोद्यते प्रतिपाद्यते स्वाभ्युपगतोर्थो यैरिति प्रवादाः । यथा येन प्रकारेण । परे भवच्छासनादन्ये । प्रवादाः दर्शनानि । मत्सरिणः अतिशायने मत्वर्थीयविधानात् सातिशयासहनताशालिनः क्रोधकषायकलुषितान्तःकरणाः सन्तः पक्षपातिन इतरपक्षतिरस्कारेण स्वकक्षीकृतपक्षव्यवस्थापनप्रवणा वर्तन्ते । कस्माद् हेतोर्मत्सरिण इत्याह । अन्योन्यपक्षप्रतिपक्षभावात् । पच्यते व्यक्तीक्रियते साध्यधर्मवैशिष्ट्येन हेत्वादिभिरिति पक्षः । कक्षीकृतधर्मप्रतिष्ठापनाय साधनोपन्यासः । तस्य प्रतिकूलः पक्षः प्रति-

पक्षः। पक्षस्य प्रतिपक्षो विरोधी पक्षः प्रतिपक्षः। तस्य भावः पक्षप्रतिपक्षभावः। अन्योन्यं परस्परं यः पक्षप्रतिपक्षभावः पक्षप्रतिपक्षत्वमन्योन्यपक्षप्रतिपक्षभावः तस्मात्। तथाहि। य एव मीमांसकानां नित्यः शब्द इति पक्षः स एव सौगतानां प्रतिपक्षः। तन्मते शब्दस्यानित्यत्वात्। य एव सौगतानामनित्यः शब्द इति पक्षः स एव मीमांसकानां प्रतिपक्षः। एवं सर्वप्रयोगेषु योज्यम्। तथा तेन प्रकारेण। ते तव। सम्यगेति गच्छति शब्दोर्थमनेनेति पुन्नाम्नि घः समयः संकेतः। यद्वा सम्यग् अवैपरीत्येन ईयन्ते ज्ञायन्ते जीवा जीवादयोर्था अनेन इति समयः सिद्धान्तः। अथवा सम्यगयन्ते गच्छन्ति जीवादयः पदार्थाः स्वस्मिन् रूपे प्रतिष्ठां प्राप्नुवन्त्यस्मिन्निति समय आगमः। न पक्षपाती नैकपक्षानुरागी। पक्षपातित्वस्य हि कारणं मत्सरित्वं परप्रवादेषूक्तम्। त्वत्समयस्य च मत्सरित्वाभावान्न पक्षपातित्वम्। पक्षपातित्वं हि मत्सरित्वेन व्याप्तं व्यापकं च निवर्तमानं व्याप्यमपि निवर्तयतीति मत्सरित्वे निवर्तमाने पक्षपातित्वमपि निवर्तत इति भावः। तव समय इति वाच्यवाचकभावलक्षणे संबन्धे षष्ठी। सूत्रापेक्षया गणधरकर्तृकत्वेपि समयस्यार्थापेक्षया भगवत्कर्तृकत्वाद्वाच्यवाचकभावो न विरुध्यते। अत्थं भासइ अरहा सुत्तं गंथंति गणहरा णिउणं इति वचनात्। अथवा उत्पादव्ययध्रौव्यप्रपञ्चः समयः। तेषां च भगवता साक्षान्मातृकापदरूपतयाभिधानात्। तथा चार्षम्। उप्पन्नेइवा विगमेइवा धुवेइवा इत्यदाघः॥ मत्सरित्वाभावमेव विशेषणद्वारेण समर्थयति। नयानशेषानविशषमिच्छन् इति। अशेषान् समस्तान्नयान्नैगमादीनविशेषं निर्विशेषं यथा भवत्येवम् इच्छन् आकाङ्क्षन्। सर्वनयात्मकत्वादनेकान्तवादस्य। यथा विशकलितानां मुक्तामणीनामेकसूत्रानुस्यूतानां

हारव्यपदेश एवं पृथगभिसन्धीनां नयानां स्याद्वादलक्षणैकसूत्रप्रोतानां श्रुताख्यप्रमाणव्यपदेश इति । ननु प्रत्येकं नयानां विरुद्धत्वे कथं समुदितानां निर्विरोधिता । उच्यते । यथा हि समीचीनं मध्यस्थं न्यायनिर्णेतारमासाद्य परस्परं विवदमाना अपि वादिनो विवादाद्विरमन्ति एवं नया अन्योन्यं वैरायमाणा अपि सर्वज्ञशासनमुपेत्य स्याच्छब्दप्रयोगोपशमितविप्रतिपत्तयः सन्तः परस्परमत्यन्तं सुहृद्भूयावतिष्ठन्ते । एवं च सर्वनयात्मकत्वे भगवत्समयस्य सर्वदर्शनमयत्वमविरुद्धमेव । नयरूपत्वाद्दर्शनानाम् । न च वाच्यं तर्हि भगवत्समयस्तेषु कथं नोपलभ्यत इति । समुद्रस्य सर्वसरिन्मयत्वेऽपि विभक्तासु तास्वनुपलम्भात् । तथा च वक्तृवचनयोरैक्यमध्यवस्य श्रीसिद्धसेनदिवाकरपादाः ।

उदधाविव सर्वसिन्धवः
समुदीर्णास्त्वयि नाथ दृष्टयः ।
न च तासु भवान्प्रदृश्यते
प्रविभक्तासु सरित्स्विवोदधिः ॥

अन्ये त्वेवं व्याचक्षते । यथान्योन्यपक्षप्रतिपक्षभावात्परे प्रवादा मत्सरिणस्तथा तव समयः सर्वनयान्मध्यस्थतयाङ्गीकुर्वाणो न मत्सरी । यतः कथंभूतः । पक्षपाती पक्षमेकपक्षाभिनिवेशं पातयति तिरस्करोतीति पक्षपाती । रागस्य जीवनाशं नष्टत्वात् । अत्र च व्याख्याने मत्सरीति विधेयपदं पूर्वस्मिंश्च पक्षपातीति विशेषः । अत्र च क्लिष्टाक्लिष्टव्याख्यानविवेको विवेकिभिः स्वयं कार्यः । इति काव्यार्थः ॥

इत्थंकारं कतिपयपदार्थविवेचनद्वारेण स्वामिनो यथार्थवादाख्यगुणमभिष्टुत्य समग्रवचनातिशयव्यावर्णने स्वस्यासामर्थ्यं दृष्टा-

न्तपूर्वकमुपदर्शयन् औद्धत्यपरिहाराय भङ्ग्यन्तरतिरोहितं स्वाभिधानं च प्रकाशयन् निगमनमाह—

वाग्वैभवं ते निखिलं विवेक्तु-
माशास्महे चेन्महनीयमुख्य ।
लङ्घेम जङ्घालतया समुद्रं
वहेम चन्द्रद्युतिपानतृष्णाम् ॥ ३१ ॥

विभव एव वैभवम् । प्रज्ञादित्वात्स्वार्थेऽण् । विभोर्भावः कर्म चेति वा वैभवम् । वाचां वैभवं वाग्वैभवं वचनसंपत्प्रकर्षम् । विभोर्भाव इति पक्षे तु सर्वनयव्यापकत्वम् । विभुशब्दस्य व्यापकपर्यायतया रूढत्वात् । ते तव संबन्धिनं निखिलं कृत्स्नं विवेक्तुं विचारयितुं चेत् यदि वयमाशास्महे इच्छामः । हे महनीयमुख्य महनीयाः पूज्याः पञ्च परमेष्ठिनस्तेषु मुख्यः प्रधानभूतः आद्यत्वात् तस्य संबोधनम् । ननु सिद्धेभ्यो हीनगुणत्वादर्हतां कथं वागतिशयशालिनामपि तेषां मुख्यत्वम् । न च हीनगुणत्वमसिद्धम् । प्रव्रज्यावसरे सिद्धेभ्यस्तेषां नमस्कारकरणश्रवणात् । काऊण नमुक्कारं सिद्धाणमभिग्गहंतु सो गिण्हे इति श्रुतकेवलिवचनात् । मैवम् । अर्हदुपदेशेनैव सिद्धानामपि परिज्ञानात् । तथा चार्षम् । अरहन्तुवएसेण सिद्धा णज्झंति तेण अरिहाई इति । ततः सिद्धं भगवत एव मुख्यत्वम् । यदि तव वाग्वैभवं निखिलं विवेक्तुमाशास्महे ततः किमित्याह । लङ्घेम इत्यादि । तदा इत्यध्याहार्यम् । तदा जङ्घालतया जाङ्घिकतया वेगवत्तया समुद्रं लङ्घेम किल समुद्रमिव अतिक्रमामः । तथा वहेम धारयेम । चन्द्रद्युतीनां चन्द्रमरीचीनां पानं चन्द्रद्युतिपानम् । तत्र तृष्णा तर्षोभिलाष इति यावत् चन्द्रद्युतिपानतृष्णा ताम् ।

उभयत्रापि संभावने सप्तमी । यथा कश्चिच्चरणचङ्क्रमणवेगवत्तया यानपात्राद्यन्तरेणापि समुद्रं लङ्घितुमीहते यथा च कश्चिच्चन्द्रमरीचीरमृतमयीः श्रुत्वा चुलुकादिना पातुमिच्छति न चैतद्द्वयमपि शक्यसाधनम् तथा न्यक्षेण भवदीयवाग्वैभववर्णनाकाङ्क्षापि अशक्यारम्भप्रवृत्तितुल्या । आस्तां तावत्तावकीनवचनविभवानां सामस्त्येन विवेचनविधानं तद्विषयाकाङ्क्षापि महत्साहसमिति भावार्थः । अथवा लघि शोषणे इति धातोर्लङ्घेम शोषयेम समुद्रं जङ्घालतया अतिरहंसा । अतिक्रमणार्थलङ्घेस्तु प्रयोगे दुर्लभं परस्मैपदमनित्यं चात्मनेपदमिति । अत्र च औद्धत्यपरिहारेधिकृतेपि यदाशास्महे इत्यात्मनि बहुवचनमाचार्यः प्रयुक्तवांस्तदिति सूचयति यद्विद्यन्ते जगति मादृशा मन्दमेधसो भूयांसः स्तोतारः इति बहुवचनमात्रेण न खल्वहङ्कारः स्तोतरि प्रभौ शङ्कनीयः प्रत्युत निरभिमानताप्रासादोपरि पताकारोप एवावधारणीयः । इति काव्यार्थः ॥

एषु एकत्रिंशतिवृत्तेषु उपजातिच्छन्दः ॥

एवं विप्रतारकैः परतीर्थिकैर्व्यामोहमये तमसि निमज्जितस्य जगतोभ्युद्धरणेऽव्यभिचारिवचनतासाध्येनान्ययोगव्यवच्छेदेन भगवत एव सामर्थ्यं दर्शयन् तदुपास्तिविन्यस्तमानसानां पुरुषाणामौचितीचतुरतां प्रतिपादयति ।

इदं तत्त्वातत्त्वव्यतिकरकरालेन्धतमसे
जगन्मायाकारैरिव हतपरैर्हा विनिहतम् ।
तदुद्धर्तुं शक्तो नियतमविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः॥ ३२॥

इदं प्रत्यक्षोपलभ्यमानं जगत् विश्वम् उपचाराज्जगद्वर्ती जनः । हतपरैः हता अधमा ये परे तीर्थान्तरीया हतपरे तैः । मायाकारैः इन्द्रजालिकैरिव शाम्बरीयप्रयोगनिपुणैरिवेति यावत् । अन्धतमसे निबिडान्धकारे । हा इति खेदे । विनिहतं विशेषेण निहितं स्थापितं पातितमित्यर्थः । अन्धं करोतीत्यन्धयति अन्धयतीत्यन्धं तच्च तत्तमश्चेत्यन्धतमसम् समवान्धात्तमसः इत्यत्प्रत्ययः तस्मिन्नन्धतमसे । कथंभूतेन्धतमसे इति द्रव्यान्धकारव्यवच्छेदार्थमाह । तत्त्वातत्त्वव्यतिकरकराले । तत्त्वं चातत्त्वं च तत्त्वातत्त्वे तयोर्व्यतिकरो व्यतिकीर्णता व्यामिश्रता स्वभावविनिमयस्तत्त्वातत्त्वव्यतिकरः तेन कराले भयङ्करे । यत्रान्धतमसे तत्त्वे अतत्त्वाभिनिवेशोअतत्त्वे च तत्त्वाभिनिवेश इत्येवंरूपो व्यतिकरः संजायत इत्यर्थः । अनेन च विशेषणेन परमार्थतो मिथ्यात्वमोहनीयमेवान्धतमसम् । तस्यैवेदृशलक्षणत्वात् । तथा च ग्रन्थान्तरे प्रस्तुतस्तुतिकारपादाः ।

अदेवे देवबुद्धिर्या गुरुधीरगुरौ च या ।
अधर्मे धर्मबुद्धिश्च मिथ्यात्वं तद्विपर्ययात् ॥

ततोयमर्थः । यथा किल ऐन्द्रजालिकास्तथाविधसुशिक्षितपरव्यामोहनकलाप्रपञ्चास्तथाविधमौषधीमन्त्रहस्तलाघवादिप्रायं किंचित्प्रयुज्य परिषज्जनं मायामये तमसि मज्जयन्ति तथा परतीर्थिकैरपि तादृक्प्रकारदुरधीतकुतर्कयुक्तीरुपदर्श्य जगदिदं व्यामोहमहान्धकारे निक्षिप्तमिति । तज्जगदुद्धर्तुं मोहमहान्धकारोपप्लवात् क्रष्टुं नियतं निश्चितं त्वमेव नान्यः शक्तः समर्थः । किमर्थमित्थमेकस्यैव भगवतः सामर्थ्यमुपवर्ण्यत इति विशेषणद्वारेण कारणमाह । अविसंवादिवचनः । कषच्छेदतापलक्षणपरीक्षात्रयविशुद्धत्वेन फलप्राप्तौ न विसंवदतीत्येवंशीलमविसंवादि । तथाभूतं वचनमुपदेशो यस्यासावविसंवादिवचनः । अव्यभिचारि-

वागित्यर्थः। यथा च पारमेश्वरी वाग् न विसंवादमासादयति तथा तत्र तत्र स्याद्वादसाधने दर्शितम् । कषादिस्वरूपं चेत्थमाचक्षते प्रावचनिकाः ॥

पाणवहाईआणं पावट्ठाणाण जो उ पडिसेहो ।
झाणज्झयणाईणं जो य विही एस धम्मकसो ॥
बज्झाणुट्ठाणेणं जेण ण बाहिज्जए तयं णियमा ।
संभवइ य परिसुद्धं सो पुण धम्मम्मि छेउत्ति ॥
जीवाइभाववाओ बंधाइपसाहगो इहं तावो ।
एएहिं परिसुद्धो धम्मो धम्मत्तणमुवेइ ॥

तीर्थान्तरीयास्तु हि न प्रकृतपरीक्षात्रयविशुद्धवादिन इति ते महामोहान्धतमस एव जगत्पातयितुं समर्था न पुनस्तदुद्धर्तुम् । अतः कारणात् । कुतः कारणात् । कुमतध्वान्तार्णवान्तःपतितभुवनाभ्युद्धारणासाधारणसामर्थ्यलक्षणात् । हे त्रातः त्रिभुवनपरित्राणप्रवीण । त्वयि काक्वावधारणस्य गम्यमानत्वात् त्वय्येव विषये न देवान्तरे। कृतधियः । करोतिरत्र परिकर्मणि वर्तते यथा हस्तौ कुरु पादौ कुरु इति । कृता परिकर्मिता तत्त्वोपदेशपेशलतत्तच्छास्त्राभ्यासप्रकर्षेण संस्कृता धीर्बुद्धिर्येषां ते कृतधियः चिद्रूपाः पुरुषाः। कृतसपर्याः । प्रादिकं विनाप्यादिकर्मणो गम्यमानत्वात् । कृता कर्तुमारब्धा सपर्या सेवाविधिर्यैस्ते कृतसपर्याः । आराध्यान्तरपरित्यागेन त्वय्येव सेवाहेवाकितां परिशीलयन्ति । इति शिखरिणीच्छन्दोलङ्कृतकाव्यार्थः ॥

समाप्ता चेयमन्ययोगव्यवच्छेदद्वात्रिंशिकास्तवनटीका ॥

येषामुज्ज्वलहेतुहेतिरुचिरः प्रामाणिकाध्वस्पृशां
हेमाचार्यसमुद्भवस्तवनभूरर्थः समर्थः सखा ।
तेषां दुर्नयदस्युसंभवभयास्पृष्टात्मनां संभव-
त्यायासेन विना जिनागमपुरप्राप्तिः शिवश्रीप्रदा ॥ १ ॥
चातुर्वैद्यमहोदधेर्भगवतः श्रीहेमसूरेर्गिरां
गम्भीरार्थविलोकनं यदभवद्दृष्टिः प्रकृष्टा मम ।
द्राघीयः समयादराग्रहपराभूतप्रभूतावमं
तन्नूनं गुरुपादरेणुकणिकासिद्धाञ्जनस्योर्जितम् ॥ २ ॥
अन्यान्यशास्त्रतरुसंगतचित्तहारि-
पुष्पोपमेयकतिचिन्निचितप्रमेयैः ।
दृब्धां मयान्तिमजिनस्तुतिवृत्तिमेनां
मालामिवामलहृदो हृदये वहन्तु ॥ ३ ॥
प्रमाणसिद्धान्तविरुद्धमत्र
यत्किंचिदुक्तं मतिमान्द्यदोषात् ।
मात्सर्यमुत्सार्य तदार्यचित्ताः
प्रसादमाधाय विशोधयन्तु ॥ ४ ॥
उर्व्यामेष सुधाभुजां गुरुरिति त्रैलोक्यविस्तारिणो
यत्रेयं प्रतिभाभरादनुमितिर्निर्दम्भमुज्जृम्भते ।
किं चामी विबुधाः सुधेति वचनोद्गारं यदीयं मुदा
शंसन्तः प्रथयन्ति तामतितमां संवादमेदस्विनीम् ॥ ५ ॥
नागेन्द्रगच्छगोविन्दवक्षोलङ्कारकौस्तुभाः ।
ते विश्ववन्द्या नन्द्यासुरुदयप्रभसूरयः ॥ ६ ॥ युग्मम् ॥
श्रीमल्लिषेणसूरिभिरकारि तत्पदगगनदिनमणिभिः ।
वृत्तिरियं मनुरविमितशाकाब्दे दीपमहसि शनौ ॥ ७ ॥

श्रीजिनप्रभसूरीणां साहाय्योद्भिन्नसौरभा ।
श्रुतावुत्तंसतु सतां वृत्तिः स्याद्वादमञ्जरी ॥ ८ ॥
बिभ्राणे कलिनिर्जयाज्जिनतुलां श्रीहेमचन्द्रप्रभौ
तद्दृब्धस्तुतिवृत्तिनिर्मितिमिषाद्भक्तिर्मया विस्तृता ।
निर्णेतुं गुणदूषणे निजगिरां तन्नार्थये सज्जनां-
स्तस्यास्तत्त्वमकृत्रिमं बहुमतिः सास्त्यत्र सम्यग् यतः ॥ ९ ॥

इति श्रीटीकाकारस्य प्रशस्तिः समाप्ता ॥

NOTES.

The Maṅgalācarana (Page 1)

The Syâdvâdamañjarî opens with a *mangalâcaraṇa* in four verses. The Jainas, like the Brâhmaṇas, believe in the efficacy of prayer to Higher Powers for successful execution of literary undertakings. cf. "'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि। अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः॥' तस्मादशेषप्रत्यूहोपशमनाय मङ्गलमभिधेयम्।......। सर्वमेव वा शास्त्रं मङ्गलं ज्ञानरूपत्वात्।......। मङ्गलशब्दनिरुक्तं च मां गालयत्यपनयति भवादिति मङ्गलम्। मा भूद्गलो विघ्नो गालो वा नाशः शास्त्रस्येति मङ्गलम्॥"—S'îlâṅkâcârya's Commentary on the Acârâṅga Sûtras.

Much intellectual energy has been spent in Brahmanical books of Logic (Mimâṁsâ and Nyâya) on demonstrating the necessity of maṅgalācaraṇa and on determining the manner in which it acts towards fulfilling its purpose. The duty of performing a maṅgalâcaraṇa is based upon s'iṣṭâcâra (practice of the good and respectable) which itself presupposes, say the Brâhmaṇas, a vedic commandment. As regards its *modus operandi*, while some hold that it brings an undertaking to a successful completion, removing obstacles if any (समाप्ति or निर्विघ्नसमाप्ति), others think that its function is simply to counteract the bad luck which causes obstacles (विघ्नध्वंस), the completion itself depending upon other natural or supernatural causes. Then, again, while some connect the maṅgala with the completion (समाप्ति) through the removal of obstacles (विघ्नध्वंसस्तु मङ्गलस्य द्वारम्), others believe that a kind of religious merit (अपूर्व) is created by the maṅgala, which removes the obstacles and produces the completion (अपूर्वद्वारैव मङ्गलस्य समाप्तिहेतुता). The scholiasts were not unaware of such incomplete works in Indian literature as Bâṇa's Kâdambarî despite a maṅgalâcaraṇa, and complete works even without a maṅgalâcaraṇa. Consequently, they have endeavoured to explain the breach in the causal law by

the hypothesis of maṅgalâcaraṇa done in a previous life (जन्मान्तरीय मङ्गल), and also of comparative quantities and qualities of the maṅgalâcaraṇa and the evil karma. ("समाप्त्यभावश्च क्वचित् प्राचीनविघ्नभूयस्त्वात् क्वचिन्मङ्गलानन्तरोत्पन्नविघ्नात् क्वचिल्लोकावगतकारणाभावात्" "अन्ये तु मङ्गलं प्रधानम् अदृष्टद्वारा आरब्धकर्मसमाप्तिः फलम्...क्वचित्तु फलाभावः कर्मादिवैकल्यात् कारीरीवत्" Tattva-Ci.) Yet, the trend of their belief in the efficacy of maṅgalâcaraṇa would seem to be in the direction of rationalism. For the whole subject, see maṅgalavâda in Tatt.-Ci. N. Kaustubha, N. Mañjarî, Muktâvalî, and its commentaries. ["ननु न मङ्गलं विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नसमाप्तिदर्शनात् इति चेन्न अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र फलजिज्ञासायां संभवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते। इत्थं च यत्र मङ्गलं न दृश्यते तत्र जन्मान्तरीयं तत्कल्प्यते यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम्... विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः। नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्।...नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वाऽस्तीति न व्यभिचार इत्याहुः ॥ मुक्ता०]

The religious belief in the necessity of propitiating gods before commencing any serious piece of work—even the day's routine—is natural, and so we find that in the vedic ritual, the main sacrifice was often preceded by a small introductory offering made to the gods (cf. "आग्नावैष्णवमेकादशकपालं चरुं निर्वपेद्दर्शपूर्णमासावारिप्समानः"). Similarly, as recorded in the Bharata-Nâṭyaśâstra, a tediously long religious ceremony was performed on the stage, before commencing a dramatic representation. The ceremony which was originally mixed doing (कायिक) and speaking (वाचिक) came, in course of time, to be cut down to the latter; thus, the recitation of Nāndi remained the sole survivor of the old elaborate ceremonies of the Pûrva-raṅga. Thus, the maṅgalâcaraṇa in all literary works is mostly verbal:

"स्तुतिनमस्कारादिषु मङ्गलव्यवहारः शिष्टानाम्...अत एव दुरितनाशकमपि गङ्गास्नानादि न मङ्गलम्" Tatt.-Ci. Such a maṅgalâcaraṇa generally

takes one of the three following forms: (i) आशीः Benediction or Prayer, (ii) नमस्क्रिया Salutation, and (iii) वस्तुनिर्देश Description, the last being supposed to be accomplished even by a bare reference to the name of a god, or the use of a word which means 'a god' as, for example, the word देवता in 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः,' the first line of Kâlidâsa's Kumârasambhava.

The old practice was probably the performance of maṅgalâcaraṇa *outside the work*, in the shape of the recitation of vedic mantras, of the syllable Om, or of the names of âcâryas and gurus (*vide infra*), and hence its apparent absence from early works. But the duty of performing a maṅgalâcaraṇa is so liberally construed by the later scholiasts, that it is supposed to have been sufficiently discharged by the use of a word like अथ—which is said to be auspicious, but which really means nothing more than 'now'—at the commencement of a work *e. g.* 'अथातो धर्मं व्याख्यास्यामः,' 'अथातो ब्रह्मजिज्ञासा' ["अथशब्दो विघ्ननिवर्तकत्वान्मङ्गलमेव । ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ–इति स्मृतेः"—Tatt.-Ci.]

Some manuscripts of the Syâdvâdamañjarî open with 'नमः सर्वज्ञाय'—the usual mangalâcaraṇa of namaskâra to be found in Jaina and Bauddha works, the 'सर्वज्ञ' being, of course the Perfect Man, *i. e.*, the Jina or the Buddha. This may be part of the author's maṅgala, or it may be the copyist's.

St. 1. (Page 1 ll. 1-4)

ज्ञानमनन्तवस्तुविषयम्—knowledge of innumerable things, substances and modes, rather than of one endless Reality of the Vedântins ; for, the Jaina is a pluralist. This ज्ञान is technically known as 'केवलज्ञान' (see below). यः पूज्यते दैवतैर्नित्यम्—man, in his spiritual perfection, is higher than gods–a doctrine contributed to the history of world's religious thought by Jainism, Buddhism, and Vaiṣṇavism. दुर्नय—false doctrines or systems. कोलाहल–the jargon

arising from their mutual contradictions. रागद्वेषमुखद्विषां परिषद्—the crowd of enemies consisting of or full of passions such as राग and द्वेष. Here रागद्वेषमुखाः द्विषः may mean: (i) enemies beginning with राग and द्वेष *i. e.* all the passions; or (ii) enemies whose mouths are full of राग and द्वेष: *i. e.* the heretical schools. (cf. *infra*). वीरविभुः–The Lord Mahâvîra. For the name see Kalpasûtra, 108 : "परीसहोव सग्गाणं खंतिखमे पडिमाणं पालए धीयं अरइ रइसहे दविए वीरिअसंपन्ने देवेहि से नामं कयं समणे भगवं महावीरे"––"because he stands fast in the midst of dangers and fears, patiently bears hardships and calamities, adheres to the chosen rules of penance, is wise, indifferent to pleasure and pain, rich in control, and gifted with fortitude, the name Venerable Ascetic Mahâvîra has been given him by the gods." [Tr. S. B. E.]; also vide Hemacandra's note on Haribhadra's आवश्यकवृत्तिः "वीरं विदारयत्यष्टप्रकारं कर्म विराजते वा सबाह्याभ्यन्तरेण तपसा सूर वीर विक्रान्तौ इत्यस्य वा वीरयति कर्मशत्रून्प्रति विक्रमते इति वीरः। तदुक्तम्–विदारयति यत्कर्म तपसा च विराजते। तपोवीर्येण युक्तश्च तस्माद्वीर इति स्मृतः ॥"

St. 2. (Page 1 ll. 5-8)

निःसीमप्रतिभैकजीवितधरौ or °धरो—whose very life or being consists of an unbounded play of genius. प्रतिभा—intuition or quick perception. It goes with हेमचन्द्रः or सरस्वतीसुरगुरू (Sarasvatî and Bṛhaspati) according as we read धरो (रः) or °धरौ. निःशेषभूमिस्पृशां पुण्यौघेन—Owing to the mass of puṇya of all those who are born on this earth, the mortals; that is to say, it is our good fortune that a Hemacandra was born in this world. The variant °स्पृशा पुण्यौघेन would give the sense—By the mass of puṇya which in its magnitude covers the whole earth. सरस्वतीसुरगुरू स्वाङ्गैकरूपौ दधत्—Hemacandra representing in his person both Sarasvatî and Bṛhaspati—the former the goddess of learning, and the latter the teacher of gods. स्वाङ्गैकरूपे (v.l.)—loc. sing. or acc. dual in apposition to सरस्वतीसुरगुरू. The former appears to be preferable. यः स्याद्वादमसाधयन्निजवपुर्दृष्टान्ततः who, in virtue of his being both सरस्वती and सुरगुरु, may be said to have demonstrated the Syâdvâda doctrine of Many-in-One or

One-in-Many by his own personal example. सद्बुध्यम्बुनिधि ...चन्द्रः-The sea is roused into activity by the moon (चन्द्र); so is good thought by हेमचन्द्र. आप्तस्तुतेः-of the Dvâtrimśikâ which is a panegyric of Mahâvîra—the आप्त. आप्त-originally a kinsman (cf. 'य आपिर्नित्यो वरुणः प्रियःसन्' Ṛg. S.) or a friend; and, hence, he who declares the Truth—'आप्तस्तु यथार्थवक्ता.' or is competent to declare the Truth. 'तत्त्वदर्शनकारुण्यकरणपाटवाभिसंबन्ध आप्तिस्तया सह वर्तत इत्याप्तः'-Vâcaspatimis'ra's योग भा. टी.

St 4. (Page 1 ll. 13-16)

वित्ति—the present work of Malliṣeṇa—that is the Syâdvâdamañjarî. प्रसिध्यति-proves successful. आरम्भसंभावना-undertaking of the work, or the work which is respectfully undertaken (= संभावितः आरम्भः) यद्वा विस्मृतम्—an instance of आक्षेपालङ्कार—cf. 'निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः॥' K. Pr.

From the original stock of the Indian Religion, Jainism and Buddhism branched off as separate religions many years after the time of the great reformers Mahâvîra and Gautama Buddha; and even when eventually Brahmanism, Jainism and Buddhism stood out as rival religions in the country, they influenced each other much more profoundly than their followers cared to admit. Owing to their common origin, they possess mainly the same religious traditions including the Pantheon. The prayer to भारती here is an instance to the point. The prayer, however, is withdrawn ('यद्वा विस्मृतम्') in favour of the author's Jaina master—Udayaprabha-as quickly as the reverence which the Jainas at one time paid to the ancient Indian religion. सारस्वतः शाश्वतो मन्त्रः—The eternal mystic formula of Sarasvatî; here, the name of the author's guru—उदयप्रभ-which is to take the place of the formula. उदयप्रभ wrote आरम्भसिद्धि, धर्माभ्युदय महाकाव्य and उपदेशमालाकर्णिकावृत्ति, etc.

Page 2.

l. 17 दुःषमार०-The wheel of Time with its spokes (Sk. अरs, Guj. આરા) is divided by the Jainas into two parts-अवसर्पिणी

and उत्सर्पिणी–*i. e.* the half with the *downward* move, and that with the *upward* move. The former is subdivided into six अरऽ *i. e.* spokes, sectors, or arcs in the descending order of happiness: 1. सुषम-सुषमा (the period of extreme happiness,) 2 सुषमा (the period of happiness), 3 सुषम-दुःषमा (the period of mixed happiness and misery, the former preponderating), 4 दुःषमसुषमा (the period of mixed misery and happiness, the former preponderating), 5 दुःषमा (the period of misery) and 6 दुःषमदुःषमा (the period of extreme misery). The first Tîrthaṅkara–Ṛsabhadeva–was born during the 3rd and the remaining twenty-three during the 4th period. Ours is the 5th. The same divisions in the reverse order belong to the other half, *viz.*, उत्सर्पिणी. For a detailed account of their characteristics see Mrs. Stevenson's "The Heart of Jainism" pp. 272–278. "The main features of the chronological system of the Gainas equally differ from those of the Buddhists as from those of the Brâhmaṇas. For it is impossible to derive the Utsarpiṇî and Avasarpiṇî eras, with their six Aras, from the Buddhistical four great and eighty smaller Kalpas, which are as it were the acts and scenes in the drama of the successive creations and dissolutions of the universe, nor from the Yugas and Kalpas of the Brâhmaṇas. I am of opinion that the Buddhists have improved on the Brahmanic system of the Yugas, while the Gainas inverted their Utsarpiṇî and Avasarpiṇî eras after the model of the day and night of Brahmā."—Jacobi, S. B. E. Gaina Sûtras, Pt. I p. xxii.

" स च कालो द्विविधः । उत्सर्पिणी अवसर्पिणी चेति । तद्भेदाः प्रत्येकं षट् । अन्वर्थसंज्ञे चैते । अनुभवादिभिरुत्सर्पणशीला उत्सार्पिणी । तैरेवावसर्पणशीला अवसर्पिणी । तत्रावसर्पिणी षड्विधा । सुषमसुषमा, सुषमा, सुषमदुष्षमा, दुष्षमसुषमा, दुष्षमा अतिदुष्षमा । उत्सर्पिण्यपि अतिदुःषमाद्या सुषमसुषमान्ता षड्विधैव भवति ।"–Āv. Tîkâ.

"द्वादशारं कालचक्रं हेतुः कालव्यवस्थितेः। कालो द्विविधोऽवसर्पिण्युत्सर्पिणी विभेदतः। अराः षडवसर्पिण्यामेकान्तसुखमादयः। तत्रैकान्तः सुखमारः चतस्रः कोटिकोटयः । सागराणां सुषमा तु तिस्रस्तत्कोटिकोटयः। सुषमदुःषमा ते द्वे दुःखमसु-

षमा पुनः। सैका सहस्रैर्वर्षाणां द्विचत्वारिंशतो मिता। एकविंशतिरब्दानां सहस्राणि तु दुःखमा। एकान्तदुःखमापि स्यात्तावद्वर्षप्रमाणिका। अरका अवसर्पिण्यां य एते समुदीरिताः। उत्सर्पिण्यां त एव स्युः प्रतिलोमक्रमेण तु। तदेवमवसर्पिण्यामुत्सर्पिण्यां च मीलिताः। सागरोपमकोटीनां कोटयः खलु विंशतिः।" Hem.-आदीश्वरचरित Sarga II, Verses 111, etc.

l. 18 वसुधातलावतीर्ण etc.-सुधासारणी-a canal or stream of nectar. A canal near Mângrol in Kâthiavad is known by the proper name of Sâraṇ. सुधासारिणी (a. v. l.), streaming with nectar, causing nectar to flow. देश्यदेशनाविताना-Spreading of the gospel of Jainism among his pupils or those who are prepared or fit to hear it.

परमार्हतीकृत०-For Kumârapâla's conversion to Jainism, and the stories of his enthusiasm for the new faith, see Dvyâśraya Kumârapâlacarita of Hemacandra Prabandhacintâmaṇi, Pt. iv, pp. 132-133 Tawney's Edition, A. S. B. Râsamâlâ vol. I pp. 182-192, & 194-197, the Bombay Gazetteer, Gujarat pp. 190-193. "The King and the monk [Hemâcârya] returned to Unhilpoor. There Hemâcârya instructed Kumâra Pâl in the purity which proceeded from the mouth of Jin Dev, and caused him to become great among the followers of Urhant. Under the Âcâryâ's directions, the King forbad the destruction of life for a period of fourteen years in the eighteen countries of Goozerat, in which his order was obeyed." (Râsmâlâ vol. I pp. 187-188.) The order is known by the name of 'अमारिघोषणा' or proclamation prohibiting slaughter.

l. 21 चातुर्विद्य—Explained in a marginal note in some of the manuscripts as 'लक्षणागमसाहित्यतर्काश्चातुर्विद्यम्' *i. e.* Grammar, Sacred Canon (Jaina), Literature and Logic. This nearly accords with the four subjects in which Mukulabhaṭṭa (ix century A. D.), the teacher of प्रतीहारेन्दुराज (9th century) is said to have been versed, *viz.*, मीमांसा, व्याकरण, तर्क and साहित्य. In several Gujarat inscriptions, however, the word चातुर्विद्य occurs in the sense of the four Vedas. (see Fleet's Inscriptions.)

l. 22. जगत्प्रसिद्धश्रीसिद्धसेनदिवाकर etc.–Siddhasena Divâkara (for his date and other account see H.J. pp. 76–77) composed 32 sets of 32 stanzas each. Similarly Hemacandra composed two such sets called अयोगव्यवच्छेद० and अन्ययोगव्यवच्छेद—द्वात्रिंशिकाs, the former being a *defence* of the Jaina system, and the latter an *attack* on other systems. (cf. similarly, Pâdas i and ii of the Adhyâya II of the Brahmasûtras. The words are of common occurrence in these senses and the method the common method of scholastic treatment. cf. "यथोक्तस्योभयस्य मार्गत्वं द्रढयितुमयोगव्यावृत्ति-मन्ययोगव्यावृत्तिं च विधत्ते...तमेवानतिक्रमं स्वपक्षसाधनपरपक्षदूषणाभ्यां द्रढयति"—Sâyaṇa's com. on Aitareya Brâhmaṇa).

l. 23 (1) अयोगव्यवच्छेद lit. exclusion of non-possession, *i. e.* demonstration that truth does not fail to belong to the Jaina system, *that it certainly belongs to it*: the *constructive* or *positive* part of Hemacandra's work (स्वपक्षसाधन). (2) अन्ययोगव्यवच्छेद—lit. exclusion of the position that truth might belong to other rival systems, *i. e.* demonstration that truth does *not* belong to other systems: the *destructive* or *negative* part of the undertaking (परपक्षदूषण). *Thirty-two* seems to have been a favourite number with Hemacandra. He got thirty-two Vihâras or Jaina monasteries built by Kumârapâla in expiation of the sin the latter had committed by eating a certain dish which reminded him of flesh. The reason given for the number was that man had thirty-two teeth. see Prabandha-cintâmaṇi ch. iv: "पृथ्वीपतिः......पूर्वभक्षितस्याभक्ष्यस्य प्रायश्चित्तं याचितवान् । द्वात्रिंशद्दशनसंख्यया द्वात्रिंशद्विहारान् कारयेति।"

l. 26, निःशेषदुर्वादिपर्षद० (*i. e.* परिषद्)—An assembly or assemblage of all the heretical *i. e.* non-Jaina philosophers. पर्षद्–evidently a contraction of परिषद्–is as old as the Sûtrâs and the Smṛitis and even older. (cf. supra रागद्वेषमुखद्विषां च परिषत् क्षिप्ता क्षणाद् येन).

Stanza I.

ll. 29-30 अनन्तम्=अप्रतिपाति, unlimited, unfailing; विज्ञानम्=विशिष्टं सर्वद्रव्यपर्यायविषयत्वेनोत्कृष्टं ज्ञानं केवलाख्यम्, that extraordinary kind

of knowledge called केवलज्ञान (see infra), which is superior to all other kinds of knowledge, since it visualises all dravyas (substances) and all paryâyas (attributes or modes). The following varieties of ज्ञान are enumerated in Jaina works :—

(1) मतिज्ञान *i. e.* such knowledge as we ordinary human beings acquire by means of the इन्द्रियs and मनः. It is divided into अवग्रह, ईहा, अवा(*i. e.* पा)य and धारणा-which are thus explained in the T. Rv. विषयविषयिसंनिपातसमनन्तरमाद्यग्रहणमवग्रहः । अवगृहीतेऽर्थे तद्विशेषाकाङ्क्षणमीहा । (यथा पुरुष इत्यवगृहीते तस्य भाषावयोरूपादिविशेषैराकाङ्क्षणमीहा) । विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायः ! (भाषादिविशेषनिर्ज्ञानात्तस्य याथात्म्येनावगमनमवायः दाक्षिणात्योऽयं युवा गौर इति वा) । निर्ज्ञातार्थाविस्मृतिर्धारणा । (भाषावयोरूपादिविशेषैर्याथात्म्येन निर्णीतस्य पुरुषस्योत्तरकालं स एवायमित्यवस्मरणं यतो भवति सा धारणा) *i. e.* first a bare concept (अवग्रह), next a desire for detailed knowledge (ईहा), then the detailed knowledge (अवाय), and lastly holding the knowledge as a permanent possession in the mind (धारणा).

(2) श्रुतज्ञान—or scriptural knowledge *i. e.* such knowledge as is acquired from scriptures proper, *viz.*, the works of the first gaṇadharas, known as the Twelve Angas, (अङ्गप्रविष्टम्) and the later supplements composed by their successors such as the Uttarâdhyayana, the Daśavaikâlika etc., together with the books of daily prayers and religious practice (अङ्गबाह्यम्):cf. तत्राङ्गप्रविष्टमङ्गबाह्यं चेति द्विविधम्। अङ्गप्रविष्टमाचारादिद्वादशभेदं बुद्ध्यतिशयर्द्धियुक्तगणधरानुस्मृतग्रन्थरचनम् (भगवदर्हत्सर्वज्ञहिमवन्निर्गतवागङ्गार्थविमलसलिलप्रक्षालितान्तःकरणे बुद्ध्यतिशयर्द्धियुक्तैर्गणधरैरनुस्मृतरचनम् , आचारादिद्वादशविधमङ्गप्रविष्टमित्युच्यते ।) आरातीयाचार्यकृताङ्गार्थप्रत्यासन्नरूपमङ्गबाह्यम् । (यद् गणधरशिष्यैः प्रशिष्यैरारातीयैरधिगतश्रुतार्थतत्त्वैः कालदोषादल्पमेधायुर्बलानां प्राणिनामनुग्रहार्थमुपनिबद्धं संक्षिप्ताङ्गार्थवचनविन्यासं तदङ्गबाह्यम्) T. Rv.

Of course, in the case of Mahâvîra, the श्रुतज्ञान must be understood to refer to his knowledge of the older Jaina scriptures. A difference between मतिज्ञान and श्रुतज्ञान is said to be this, that while the former is limited to things present, the latter extends to things past and future as well (मतिज्ञान

श्रुतज्ञानयोः कः प्रतिविशेष इति। अत्रोच्यते। उत्पन्नाविनष्टार्थग्राहकं साम्प्रतकालविषयं मतिज्ञानम्। श्रुतज्ञानं तु त्रिकालविषयमुत्पन्नविनष्टानुत्पन्नार्थग्राहकम्—T. Bh.) In illustrating the difference thus drawn Mr. Jaini says—"An eclipse to-day may be known by Matijñâna, but one in the time of Alexander, or one to happen next year, can now only be known by S'rutajñâna." All true history is thus श्रुतज्ञान, in the same way as ऐतिह्य is included in शब्दप्रमाण in Brahmanical Logic. This is, however, extending the scope of श्रुतज्ञान beyond its intended limits, it being originally opposed to मतिज्ञान in the sense of Authority or Revelation as distinguished from Experience and Reason.

(3) अवधिज्ञान—Knowledge of the distant in time or space (अवधि-limit or boundary.) It is innate ('भव') in the case of the celestial (देव) and the infernal (नारक) souls; or, acquired by the precipitation or annihilation of karmic matter (क्षयोपशमनिमित्त), in the case of other souls such as men and lower animals (मनुष्य and तिर्यग्योनि). This variety of ज्ञान is concerned with only रूपिद्रव्यs (material objects possessing रूप, रस, etc.)

(4) मनःपर्य(v. l. र्या)यज्ञान—knowledge of what passes in other minds. मनः प्रतीत्य प्रतिसन्धाय वा ज्ञानं मनःपर्ययः (T. Rv.) reaching and reading the mind. It has two varieties—ऋजुमति and विपुलमति *i. e.* simple and complex. The latter is finer (विशुद्धतर) than the former, and, unlike it, is not exposed to the risk of destruction (अप्रतिपाति).

(5) केवलज्ञान—pure or perfect knowledge—which is a characteristic of the soul entirely liberated from the bondage of matter. The word is thus explained :(1)बाह्याभ्यन्तरक्रियाविशेषात् यदर्थं केवन्ते तत्केवलम् (तपःक्रियाविशेषात् वाङ्मनसकार्याश्रयान् बाह्यानाभ्यन्तरांश्च यदर्थानर्थिनः केवन्ते सेवन्ते तत् केवलम्); (2) अव्युत्पन्नो वाऽसहायार्थः केवलशब्दः (केवलमन्नं भुङ्क्ते देवदत्त इति। असहायं व्यञ्जनरहितं भुङ्क्ते इति गम्यते। तथा क्षायोपशमिकज्ञानासम्पृक्तं असहायं केवलमित्यव्युत्पन्नोऽयं शब्दो द्रष्टव्यः) *i. e.* (1) that which is sought and practised, from the root केव्=सेव्; or (2) pure, unmixed, free from other shades of ज्ञान such as क्षायोपशमिक. The second is evidently a better explanation than the first. But, in reality, the word as well

as the idea seems to be a legacy from the Sâṁkhyas and the Vedântins; or, what is more probable, it is a common heritage of the Jainas, the Sâṁkhyas and the Vedântins from the Upaniṣad thinkers according to whom the highest knowledge consisted in realising the purity or absoluteness of Âtmâ, that is, its freedom from the bondage of anâtmâ or Prakṛti. For a brief account of these different kinds of ज्ञान see Appendix III pp. 143–144 of Barnett's Antagadadasão.

Mahâvîra, say the Jainas, was born with the first three kinds of ज्ञान, *viz.*, मति, श्रुत and अवधि. मनःपर्य(र्या)यज्ञान he gained immediately on entering the state of houselessness, according to S'vetâmbaras; after several months of wandering, penance and meditation, according to Digambaras. केवलज्ञान came to him, according to all authorities, at the end of his twelve years of ascetic life. (see H. J. p. 33).

Page 3.

whether the body is (1,a) *visible* like ours, or (1,b) *invisible* like that of a ghost? The former alternative (No. 1,a) is ruled out by प्रत्यक्ष. We do not see any such body working in the production of grass, trees, rain-bows, clouds, etc. Hence the alleged व्याप्ति—यत्र यत्र कार्यत्वं तत्र तत्र सशरीरकर्तृकत्वम्–falls to the ground. The हेतु here is साधारण अनैकान्तिक *i. e.* inconclusive, on account of its being common to things possessed of साध्य and those possessed of साध्याभाव, like the hetu प्रमेयत्व which is inconclusive as to नित्यत्व or अनित्यत्व, being found in things which are नित्य (*e. g.* गगन) and also in things which are अनित्य (*e. g.* घट). The latter alternative (No. 1,b) requires to be made clearer as to whether the invisibility of his body is due to his unique greatness or to any fault of our adṛṣṭa *i. e.* misfortune, caused by the law of Karma—*i.e.* dharma and adharma.—The first of these alternatives is not supported by any proof; moreover, it involves argument in a circle (इतरेतराश्रयदोष) in that his invisible body will be proved when his unique greatness is proved, and his unique greatness will be proved when his invisible body is proved. The second alternative (No. 2) is not free from certain doubts. Thus, a doubt will arise in our mind whether our failure to see his body is due to the fact of his not existing at all (*e. g.* we do not see the body of a son of a barren woman) or to any defect in our adṛṣṭa which incapacitates us for the sight (*e.g.* owing to the same reason we do not see the body of a ghost). Moreover, if God works without a body it is contrary to all our experience of other dṛṣṭântas or examples. For, all the examples of कार्य which we have observed (such as घट etc.) show a maker possessed of a body (such as a potter). Without a body a maker can do nothing: he would be as inactive as आकाश. So the व्याप्ति of the hetu (कार्यत्व) with the sâdhya (सकर्तृकत्व) breaks down when placed on the horns of the dilemma of सशरीरत्व and अशरीरत्व. For the Nyâya–Vais arguments, see न्या. क. Viz. Ed. pp. 55–57, दिनकरी on न्या. मु. on भा. प. St. I.

ll. 90-93–2. Moreover, the *hetu* is 'कालात्ययापदिष्ट' or 'बाधित' as it is otherwise called. For, we see by प्रत्यक्षप्रमाण that certain

कार्यs do spring into existence even without an intelligent maker, *e. g.* a tree, a lightning, a cloud etc., in fact all natural phenomena which we do not see created by man or any other living being.

So we conclude: "न कश्चिज्जगतः कर्ता."

Page 25.

Mallişeṇa next proceeds to examine the so called attributes of God viz. एकत्व, सर्वगत्व etc.

ll. 96. तत्रैकत्वचर्चस्तावत् etc.—God is supposed to be *one*, because, it is said, multiplicity of gods would mean multiplicity of wills, with its necessary corollary,—a conflict of wills and the consequent confusion in the making and management of the world. But the Jaina denies the necessity of the corollary and in support of his position he cites the examples of (1) an anthill made by many ants, (2) that of a palace made by many artizans and (3) that of a beehive made by many bees—all working harmoniously together to a common end.

अथ तेष्वप्येक etc.—Some might see one Supreme Maker behind each of these makers viz. the ants, the bees etc. But they may well be asked: Why not say then that God is the maker of घट, पट etc. instead of the potter, the weaver etc.? * If you say their agency is too visible to be denied we should like to know how the agency of the ants and the bees is any the less visible. cf. Sîl.'s Com. on the Sûtrâkṛ. p. 79 "अपि च—घटादिसंस्थानानां कुम्भकार एव विशिष्टः कर्तोपलक्ष्यते नेश्वरः । यदि पुनरीश्वरः स्यात् किं कुम्भकारेणेति ?। नैतदस्ति । तत्रापीश्वर एव सर्वव्यापितया निमित्तकारणत्वेन व्याप्रियते । नन्वेवं दृष्टहानिरदृष्टकल्पना स्यात् । तथा चोक्तम्—शस्त्रौषधादिसंबन्धाच्चैत्रस्य व्रणरोहणे । असंबद्धस्य किं स्थाणोः कारणत्वं न कल्प्यते ?। तदेवं दृष्टकारणपरित्यागेनादृष्टपरिकल्पना न न्याय्येति । अपि च—देवकुलावटादीनां यः कर्ता स सावयवोऽव्याप्यनित्यो दृष्टः तद्दृष्टान्तसाधितश्चेश्वर एवंभूत एव प्राप्नोति । अन्यथाभूतस्य च दृष्टान्ताभावात् व्याप्त्यसिद्धेर्नानुमानमिति ।" S'il. Com. on सूत्रकृताङ्ग, समयाध्ययन, उद्देशः ३

* [They do say, however, that God is according to them the primary cause, and the potter etc., the secondary causes. See Bh. G., Br. Sûtras etc., cf. Martineau's Study of Rel. Vol. I.]

ll. 105-107.–तस्माद्वैमत्य etc.—To hold that God is one in order to avoid conflict of wills is like getting rid of a family to avoid quarrelling about food !

l. 108.–तथा सर्वगतत्वमपि etc.—If, as you say, he is omnipresent, it must be either through the body (शरीरात्मना) or through the mind (ज्ञानात्मना). In the former case, his body would fill all space, leaving no room for other objects. The latter alternative is all right, for, we too hold that the Supreme Person (परमपुरुष) pervades the whole Universe with his boundless ज्ञान. But it is not a position which you can take up since your Veda asserts the omnipresence of God in the physical sense. For, your texts such as विश्वतश्चक्षुः etc. declare his physical ubiquity.

l. 115.– यच्चोक्तं etc.—A possible reason for regarding God as physically all-pervasive is this : If God occupied only a particular spot he could not well deal with objects at a distance. But this is bad reasoning. Is the Divine Architect, who is the supposed maker of the three worlds, working like a carpenter through the instrumentality of his body, or through that of his mind? The first would be a long and tedious process if his body is to be supposed to be limited in size to avoid the difficulties of the hypothesis of an infinite body. The second process viz. that of working by the mind will not necessitate physical omnipresence of the deity. Minor gods, all are agreed, dwell in limited worlds of their own and yet work by their mind at great distances. Moreover, the physical omnipresence of God would mean his contamination through contact with all sorts of impurities including residence in hell. It may be urged from the other side that this objection will apply equally to the doctrine which we have accepted viz. that of mental omnipresence of the Supreme Person (the Perfect Man). But this is wrong. It is mistaking the very nature of a *mental* process, in which ज्ञान has not to leave the âtman and travel to the object from a distance. Besides, the argument of contamination is absurd: thought of a dirty thing does not fill the mouth with dirt, or the thought of luxuries provide you with the luxuries themselves.

Page 26.

l. 133.-यत्तु ज्ञानात्मना etc.—This is withdrawing a point which was conceded in a foregoing passage (see supra).

l. 138.-यच्च परे दृष्टान्तयन्ति etc.—The case of ज्ञान is sometimes illustrated by the analogy of the light (किरण–rays) of the sun, which, though a guṇa (attribute) of the sun, travels from the sun to the world which it illumines. But the analogy will not bear scrutiny. The rays are not a guṇa of the sun, but a *dravya* made of luminous matter (pudgala), and the luminosity (light–प्रकाश) which belongs to them as a guṇa never travels out of them.

l. 143.-तथा च धर्मसंग्रहिण्यां etc.—See vv. 370-73. The passage occurs in a discussion about the nature of Jîva. The position of the opponent and the Jaina criticism of the same are very clearly brought out in the text and the Com. of the verses quoted here. These have been explained in the Commentary as follows :—

" ' किरणा गुणा ण......'

ननु किरणा गुणा न भवन्ति किंतु द्रव्यम् । यस्तु तेषां किरणानां प्रकाशः स गुणः । न चासौ प्रकाशरूपो गुणोऽद्रव्यो द्रव्यदेशादन्यत्र वर्तते । ज्ञानं पुनरिदं यत् यस्मादात्मगुणस्ततः स कथमद्रव्यो द्रव्यरहितः सन् अन्यत्र आत्मदेशपरित्यागेन भवेत्? । नैव भवेदिति भावः । तस्माल्लोकान्ते ज्ञानदर्शनादयमात्मा सर्वव्यापी प्रतीयत एव ॥ तदेवं चिरादवबुध्यमानेन परेणाभिहिते सत्याचार्यः सम्यगुत्तरमाह–

' णं तुं ण परिछिंदाइ......'

न ज्ञानं यस्मिन् देशे ज्ञेयमस्ति तस्मिन् देशे गत्वा परिच्छिनत्ति न वरं किंतु आत्मस्थमेव सत् तत् दूरदेशस्थस्यापि ज्ञेयस्य परिच्छेदकमचिन्त्यशक्तेर्विज्ञेयम् अमुमेवार्थं दृष्टान्तेन भावयति—

' लोहोवलस्स सत्ती......'

लोहस्याकर्षक उपलः लोहोपलः । अत्राकृष्याकर्षकभावलक्षणसंबन्धे षष्ठी । यथा राज्ञःपुरुष इत्यत्र पोष्यपोषकभावे तस्य शक्तिरात्मस्थैव सती भिन्नदेशमपि भिन्नस्थ-(स्थ)मपि लोहमाकर्षन्ती दृश्यते । न च दृष्टे अनुपपन्नं नाम । अतीन्द्रियत्वाच्छक्तीनां कथं तस्या दर्शनमिति चेत् । अत आह—' कार्यप्रत्यक्षा ' कार्यं लोहाकर्षणलक्षणं प्रत्यक्षं यस्याः सा कार्यप्रत्यक्षा । एतदुक्तं भवति—तत्कार्यस्य प्रत्यक्षत्वात् सापि दृश्यत इति व्यवह्रियत इत्यदोषः ॥" ध. सं. vv. 370-73 etc., Com.

Page 27.

ll. 144.-किरणा॰—This formulates the objection: The rays of the sun are not guṇas but dravya; and so little wonder that they travel out of the Sun; luminosity is their guṇa, which cannot go out of the dravya. Similarly, ज्ञान is a guṇa of âtman and it cannot travel out of âtman.

गं तुं णं etc.—Wonderful is the nature of ज्ञान it has not to go out to the spot of its object—it remains in âtman and works at a distance. If an analogy is wanted it is afforded in a magnet—which is wellknown for its *actio in distans.*

ll. 153-194.-अथ सर्वगः सर्वज्ञः etc.—Taking सर्वग=omniscient. The doctrine of the omniscience of God can be easily disproved by means of the following dilemma: Is the *omniscience* of God proved by प्रत्यक्ष or परोक्ष (i. e. अनुमान or शब्द)? Not the former. For, प्रत्यक्ष springs from the contact of इन्द्रिय and अर्थ, which is not possible in the case of omniscience which transcends the employment of इन्द्रिय s. Not the latter—in the shape of अनुमान. For, अनुमान is based upon the recollection of an invariable concomittance between लिङ्ग (हेतु) and लिङ्गिन् (साध्य) and we do not know of any लिङ्ग which can prove omniscience—the latter being too far away from the field of our observation.

It may be argued that the अनुमान in the present case is of the nature of अर्थापत्ति, that is to say, omniscience is inferred as necessarily implied in the wonderful variety of the cosmos. But the argument is wrong. There is no necessary implication of omniscience contained in the variety of the Cosmos, which can be easily explained by the law of karma in the case of living beings and by an uncaused natural state of things in the case of inanimate matter. Nor is there any testimony of शब्द or आगम to prove the omniscience. Is the आगम (1) made by God or (2) made by any other person? (1) If it is made by God, it is a wonderful self-laudatory document—hardly worthy of true greatness. Moreover, it is impossible that he could have given out the âgamas without a physical body, the very utterance of the sounds of their letters requiring a throat, a

palate etc., (cf. Br. Sû. II. ii. 38–40.) And if he has a body, it is a position which has been already disposed of (see above). (2) If it is made by any other person, is that person (2a) omniscient or (2b) not? (2a) If he is omniscient, God is one such person and here is another—a position which militates against the unity and singularity of God. Besides, the omniscience of the other person will require to be demonstrated by the word of a third person, who must be also omniscient, and so on *ad infinitum*. (2b) If he is not omniscient, what faith can we put in his word?

Page 28.

ll. 174.–अपरं च भवदभीष्ट etc.—The author next proceeds to show that if God is the source of the Brahmanical scriptures, he is anything but omniscient. For, the Brahmanical scriptures, says the writer, are full of contradictions.

ll. 175-178.–तथाहि etc.—The passage that follows is taken verbatim from Gunaratna's T. R. D. p. 261-62. The conflicting texts quoted therein are selected with reference to the vratas or moral precepts of the Jainas viz. अहिंसा, सत्य, अदत्तादान (अस्तेय), ब्रह्मचर्य together with अपरिग्रह.

ll. 199.–तथा स्ववशत्वं etc.—If God is self-dependent and at the same time all-merciful, why should he create a world full of misery? There is nothing to prevent him from creating a perfect world. Not even his independent will? No. For, the will is linked to an all-merciful nature. cf. S'ankara on Br. Sû. II. ii. 37.

l. 201-02.–स्थपुटितं—Full of; शर्म–happiness.

ll. 202.–अथ जन्मान्तरो etc.—If you propose to reconcile the misery in the world with God's mercy by the hypothesis of *karma*, it will amount to a surrender of the principle of his independence (cf. S'ankara on Br. Sû. II. ii. 37).

ll. 204.–जलाञ्जलि—Funeral libation of water; equivalent to sounding the death-knell.

शिपिविष्ट–Vishṇu, God. विष्टप–a world. घट्टकुट्यां प्रभातम्—Arriving in the morning at a toll-bar. You drove your cart all night in the hope that you would thereby pass the toll-bar unnoticed in the darkness of the night. But unfortunately you reached the toll-bar just when there was daybreak and the officer at the station had got up to do his duty! Hence 'घट्टकुट्यां प्रभातम्' is an idiomatic expression to state that you have arrived at the very position you wanted to avoid all along.

ll. 207.–किं च प्राणिनां etc.—He is not only *dependent* upon the law of *karma* of his creatures for the allotment of happiness and misery in this world, but a further question arises as to who is the maker of the law of karma (धर्माधर्म)? If he has not made it, he is not Iśvara or Lord in regard to it.

ll. 211.–तथा नित्यत्वमपि etc.—If he is eternal, his nature should be eternal, his creativeness should be eternal—he should be ever creating and creating—a process which would never end, and not a single act of creation would ever be complete. And, since an incomplete act is no act (a घट is not a घट before the last moment of completion is reached and it is fit to perform the work for which it was intended for, सत्त्व=अर्थक्रियाकारित्व.), God would be the maker of nothing. If, on the other hand, creativeness were not part of his nature, he could not create the world any more than âkâśa which never creates any world.

Page 30.

ll. 218.–अपि च तस्य etc.–If he has an absolutely eternal nature, and creativeness is part of that nature, he would be ever creating and creating without any possibility of संहार or destruction. If creation and destruction sprang from a single nature—the two would be simultaneous; moreover, it would mean difference of effects (creation *and* destruction) without difference in the cause (a single nature). If you adopt the hypothesis of two natures, one of which (सृष्टि) is put forth at one time and the other (संहार) at the other time, that is tantamount to a confession that his nature is not eternal, but only occasional.

ll. 225-229.–इष्टश्च भवतां etc.—A plurality of natures is attributed to God in the Brahmanical scriptures. Thus, the nature of रजोगुण is active at the time of creation, of तमोगुण at the time of destruction, and of सत्त्वगुण at the time of its existence: ब्रह्मन्, रुद्र and विष्णु.

एवं चावस्थाभेदे etc.—A change of states in God would mean a changing God.

ll. 229.–अथास्तु नित्यः etc.—Granting that God is eternal, how is it that he is not ever-creating? A possible answer is that it depends upon his free and independent *will* when to be engaged in the act of creation and when not, and hence the creation is occasional. But the answer is futile. On what should his will depend? On him and him only? If so, it should be eternally there, and the creative activity should be eternal and not occasional and spasmodic.

ll. 232.–तथा शम्भोरष्टगुणा० etc.—God is said to have the following attributes: बुद्धि etc. (For this and small differences on the point see Tarkasamgraha and Com., Kârikâvali with Com. Muktâvalî and Dinakari, and Nyâyakandali p. 57). If these have to be inferred from their effects, they will be of a very unsatisfactary kind, unworthy of God. For, the world we see is by no means perfect. From our imperfect or finite world we can only argue to a finite or imperfect God: See E. Caird's Com. on Kant: Rational Theology; John Caird's "Introduction to the Phil. of Religion," and Flint's "Theism."

ll. 233.– किं च प्रेक्षावतां प्रवृत्तिः etc.—The famous dilemma raised by Mill and S'ankara. Creative activity on the part of God may be supposed to spring either from self-interest or pity for his creatures. The former is impossible in the case of God. The latter is not possible without the presupposition of misery of his creatures which he strives to remove. The misery, however, is impossible without a body and organs to suffer it, and these are not existing prior to creation. Thus,

the theist finds himself lost in a vicious circle—pity and misery necessary to account for God's creative activity, and the creative activity necessary for the possibility of misery!

Page 31.

ll. 242.– घण्टालाला०—Going both ways like the pendulum of a bell. For the Jaina argument see Ṣaḍ-Darśana-Samuccaya, Tarka-rahasya-dîpikâ pp. 52-53, 115-24, S'il. Com. on the Sûtrakritânga pp. 42-47).

For the Theistic argument examined in the Stanza and the Com. see न्या. क. p. 54–56.

For the difficulties of the Theistic position consult Sânkara's Com. on the Br. Su. II. i.i, 37-41 Râmânuja's Com. on the same and on I. i. 3. For an attempt at a solution of some of the difficulties see Br. Su. II. i. 30-36 The point of शरीरित्व will be found suggested by a corresponding passage in न्या. क. pp. 55–56: cf. "Meanwhile the practical needs and experiences of religion seem to me sufficiently met by the belief that beyond each man and in a fashion continuous with him there exists a larger power which is friendly to him and to his ideals. All that the facts require is that the power should be both other and larger than our conscious selves. Anything larger will do, if only it be large enough to trust for the next step. It need not be infinite, it need not be solitary. It might conceivably even be only a larger and more godlike self, of which the present self would then be but the mutilated expression, and the universe might conceivably be a collection of such selves, of different degrees of inclusiveness, with no absolute unity realized in it at all. Thus would a sort of polytheism return upon us......"

"Upholders of the monistic view will say to such a polytheism (which, by the way, has always been the real religion of common people, and is so still to-day) that unless there be one all-inclusive God, our guarantee of security is left imperfect. In the Absolute, and in the Absolute only *all* is saved. If there be different Gods, each caring for his part, some

portion of some of us might not be covered with divine protection, and our religious consolation would thus fail to be complete.............Common sense is less sweeping in its demand than philosophy.........I think, in fact, that a final philosophy of religion will have to consider the pluralistic hypothesis more seriously than it has hitherto been willing to consider it"—James's Varieties of Religious Experience p. 526.

"This [a belief in more gods than one] of itself is what reason cannot rest in—what reason is constantly finding out more clearly to be false. The more the universe is examined and understood, the more apparent does it become that it is a single, self-consistent whole—a vast unity in which nothing is isolated or independent. The very notion, therefore, of separate and independent deities, and still more, of course, of discordant or hostile deities ruling over different departments of nature, is opposed to the strivings and findings of reason" Flint's "Theism" pp. 40-41.

For the Design Argument in its old form see Paley's "Natural Theology", and for its defence against later criticism, see Flint's "Theism;" and for a history of the Teleological Argument, Flint's Theism pp. 387-90.

For the whole subject of Theistic proofs, see ibid, Lectures IX to end. Among modern writings on the subject in addition to Flint's "Theism" and Anti-Theistic Theories the reader may consult Kant's criticism of Cartesian proofs and Rational Theology, and the statement of difficulties in the design argument in the old orthodox form and a reinterpretation of the argument in John Caird's "Philosophy of Religion," and Edward Caird's Com. on Kant. Consult also Martineau's "Study of Religion" Vol I, Fraser's "Theism" (Kantian presentation of the subject), Lindsay's "Recent Advances in Theism," Pringle-Pattison's "Idea of God," Ward's "Realm of Ends" and Alexander's "Space, Time and Deity."

Appendices.

1.

किं पुनरीश्वरसद्भावे प्रमाणम् ?। आगमस्तावदनुमानं च। महाभूतचतुष्टयमुपलब्धिमत्पूर्वकं, कार्यत्वात्, यत्कार्यं तदुपलब्धिमत्पूर्वकम्। प्रमाणेन पूर्वकोट्यनुपलब्धेरसिद्धं पृथिव्यादिषु कार्यत्वमिति चेत्। तदयुक्तम्। सावयवत्वात्। यत्सावयवं तत्कार्यं, यथा घटः, सावयवं च पृथिव्यादि, तस्मादेतदपि कार्यमेव। ननु व्याप्तिग्रहणादनुमानप्रवृत्तिः। कार्यत्वबुद्धिमत्पूर्वकत्वयोश्च व्याप्तिग्रहणमशक्यं, घटादिषु कर्तृप्रतीतिकाल एवाङ्कुरादिषूत्पद्यमानेषु तदभावप्रतीतेः। न चाङ्कुरादीनामपि पक्षत्वमिति न्याय्यम्। गृहीतायां व्याप्तावनुमानप्रवृत्तिकाले प्रतिवाद्यपेक्षया पक्षादि प्रविभागः। इह तु सर्वदैव प्रतिपक्षप्रतीत्याक्रान्तत्वाद्व्याप्तिग्रहणमेव न सिध्यतीत्युक्तम्। अत्र प्रतिविधीयते। यदि चैवं द्वैतानुपलम्भाद्व्याप्तिग्रहणाभावः, तदानीं मीमांसाभाष्यकृदभिमतं सामान्यतोदृष्टमादित्यगत्यनुमानमपि न सिध्यति। तत्रापि देवदत्तगतिपूर्वकदेशान्तरप्राप्तिग्रहणकाल एवं नक्षत्रादिषु देशान्तरप्राप्तिमात्रोपलम्भात्। अथ तेषु देशविप्रकर्षेणापि गतेरनुपलब्धौ संभवन्त्यां न तया व्याप्तिग्रहणहेतोर्निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य प्रतिरोधस्तुल्यकक्षत्वाभावात्। एवं चेत् अत्राशरीरत्वेनाभ्युपेतस्य कर्तुः स्वरूपविप्रकर्षेणाप्यङ्कुरादिष्वनुपलम्भसंभवान्न तेन निरुपाधिप्रवृत्तस्य भूयोदर्शनस्य सामर्थ्यमुपहन्यते इति समानम्। अपि च। भोः किमनुमानेन कर्तृमात्रं साध्यते पृथिव्यादिनिर्माणसमर्थो वा ?। कर्तृमात्रसाधने तावदभिप्रेतासिद्धिः। न ह्यस्मदादिसदृशः कर्ताऽभिप्रेतो भवताम्। न च तेनेदं पृथिव्यादिकार्यमर्वाग्दृशा शक्यनिर्माणम्। पृथिव्यादिनिर्माणसमर्थस्तु कर्ता न सिध्यति। अनन्वयात्। अन्वयबलेन हि दृष्टान्तदृष्टकर्तृसदृशः सिध्यतीति। नायं प्रसङ्गः। कर्तृविशेषस्याप्रसाधनात्। व्याप्तिसामर्थ्याद्बुद्धिमत्पूर्वकत्वे सामान्ये साध्यमाने, पृथिव्यादिनिर्माणसामर्थ्यलक्षणोऽपि विशेषः सिध्यत्येव। निर्विशेषस्य सामान्यस्य सिद्ध्यभावात्। ननु मा सिध्यतु सामान्यमिति चेन्न। कार्यत्वेन सह तद्व्याप्तेरप्रतिक्षेपत्वात्। यदि हि व्याप्तमपि न सिध्यति धूमादप्यग्निसामान्यं न सिध्येत्। अग्निविशेषस्यानन्वितस्यासिद्धेः। निर्विशेषस्यानवस्थानात्। अथेदमुच्यते द्वयमनुमानस्य स्वरूपं व्याप्तिः पक्षधर्मता च। तत्र व्याप्तिसामर्थ्यात् सामान्यं सिध्यति, पक्षधर्मताबलेन चाभिप्रेतो विशेषः पर्वताद्यवच्छिन्नवह्निलक्षणात्मा सिध्यति। अन्यथा पक्षधर्मतायाः क्वोपयोगः ?। क्वचानुमानस्य गृहीतग्राहिणः प्रामाण्यम् ?। एवं चेत् ईश्वरानुमानेऽपि तुल्यम् अन्यत्राभिनिवेशात्। अथ मतं सिध्यत्यनुमाने विशेषोऽपि। यत्र प्रमाणविरोधो नास्ति तथा हि धूमात् पर्वतनितम्बवृत्तिवह्निविशेषसिद्धौ का नामानुपपत्तिः ?। दृष्टो हि देशकालादिभेदः स्वलक्षणानाम्। ईश्वरानुमाने तु विशेषो न सिध्यति। प्रमाणविरोधात्। तथा हि नात्र शरीरपूर्वकत्वं साधनीयम्। शरीरे सत्यवश्यमिन्द्रियप्राप्तावतीन्द्रियोपादानोपकरणादिकारकशक्तिपरिज्ञानासंभवे सति कर्तृत्वासंभवात्। अशरीरपूर्वकत्वं चाशक्यसाधनं सर्वोऽपि कर्ता कारकस्वरूपमवधारयति तत इच्छतीदमहमनेन

निर्वर्तयामीति । ततः प्रयतते । तदनु कायं व्यापारयति । ततः करोति । अनवधारयन्ननिच्छन्नप्रयतमानः कायमव्यापारयन्न करोतीत्यन्वयव्यतिरेकाभ्यां बुद्धिवच्छरीरमपि कार्योत्पत्तावुपायभूतं निखिलोपाधिग्रहणे व्याप्तिग्राहकप्रमाणादेवावधारितं न शक्यते प्रहातुम् । वह्नेरिवेन्धनविकारसामर्थ्यं धूमानुमाने । तत्परित्यागे च बुद्धिरपि परित्यज्यताम् । प्रभावातिशयादशरीरवदबुद्धिमानेवायमीश्वरः करिष्यति । उपादानोकरणादिस्वरूपानभिज्ञो न शक्नोतीति चेत् कुत एतत् ?। तथानुपलम्भादिति चेत् फलितं ममापि मनोरथद्रुमेण । न तथा यावदिच्छा प्रयत्नव्यवहिता कार्योत्पत्तावुपयुज्यते यथेदमव्यवहितव्यापारं शरीरम् । एवं तर्हि का गतिरत्र बुद्धिमत्कर्तृपूर्वकत्वसामान्यस्य ?। अगतिरेव । उभयोरपि शरीरत्वाशरीरत्वविशेषयोरनुपपत्तेः । निर्विशेषस्य सामान्यस्य सिद्ध्यभावात् । किमनुमानस्य दूषणम् ?। न किंचित् । पुरुष एवायं विशेषाभावाच्छशविषाणायमाने साधनार्हे सामान्ये साधनं प्रयुञ्जानो निगृह्यते यथा कश्चिन्निशितं कृपाणमच्छेद्यमाकाशं प्रति व्यापारयन् । अथानुमानदूषणं विना न तुष्यति भवान् तदिदमशरीरिपूर्वकतानुमानं व्याप्तिग्राहकप्रमाणबाधितत्वात् कालात्ययापदिष्टं व्याप्तिबलेन चाभिप्रेतमशरीरित्वविशेषं विरुन्धद्विशेषविरुद्धं ततश्च विरुद्धावान्तरप्रभेद एवेति पूर्वपक्षसंक्षेपः ॥ अत्र प्रतिसमाधिः । किं शरीरत्वमेव कर्तृत्वमुत परिदृष्टसामर्थ्यकारकप्रयोजकत्वम् ? । न तावच्छरीरित्वमेव कर्तृत्वम् । सुषुप्तस्योदासीनस्य च कर्तृत्वप्रसङ्गात् । किंतु परिदृष्टसामर्थ्यकारकप्रयोजकत्वम् । तस्मिन् सति कार्योत्पत्तेः । तच्चाशरीरस्यापि निर्वहति यथा स्वशरीरप्रेरणायामात्मनः । अस्ति तत्राप्यस्य स्वकर्मोपार्जितं तदेव शरीरमिति चेत् सत्यमस्ति । परं प्रेरणोपायो न भवति । स्वात्मनि क्रियाविरोधात् । प्रेर्यतयास्तीति चेत् ईश्वरस्यापि प्रेर्यः परमाणुरस्ति । ननु स्वशरीरे प्रेरणाया इच्छाप्रयत्नाभ्यामुत्पत्तेरिच्छाप्रयत्नयोश्च सति शरीरे भावादसत्यभावात् अस्ति तस्य स्वप्रेरणायामिच्छाप्रयत्नजननद्वारेणोपायत्वमिति चेन्न । तस्येच्छाप्रयत्नयोरुपजननं प्रत्येव कारकत्वात् लब्धात्मकयोरिच्छाप्रयत्नयोः प्रेरणाकरणकाले तु तदनुपायभूतमेव शरीरं कर्मत्वादिति व्यभिचारः । अनपेक्षितशरीरव्यापारस्येच्छाप्रयत्नमात्रसचिवस्यैव चेतनस्य कदाचिदचेतनव्यापारं प्रति सामर्थ्यदर्शनात् बुद्धिमदव्यभिचारि तु कार्यत्वमितीश्वरसिद्धिः । इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत् अपेक्षतां यत्र तयोरागन्तुकत्वम् । यत्र पुनरिमौ स्वाभाविकावासाते तत्रास्यापेक्षणं व्यर्थम् । न च बुद्धीच्छाप्रयत्नानां नित्यत्वे कश्चिद्विरोधः । दृष्टा हि रूपादीनां गुणानामाश्रयभेदेन द्वयी गतिः नित्यताऽनित्यता च तथा बुद्ध्यादीनामपि भविष्यतीति । सेयमीश्वरवादे वादिप्रतिवादिनोः पराकाष्ठा । अतः परं प्रपञ्चः ॥ आत्माधिष्ठिताः परमाणवः प्रवर्तिष्यन्ते इति चेन्न । तेषां स्वकर्मोपार्जितेन्द्रियागणाधीन संविदां शरीरोत्पत्तेः । सर्वविषयावबोधविरहात् । अस्त्यात्मनामपि सर्वविषयव्यापि सहजचैतन्यमिति चेन्न । सहजं शरीरसंबन्धभाजां तत्केनाविलुप्तं येनेदं सर्वत्रापूर्ववदवभासयति । शरीरावरणतिरोधानात् । तदात्मन्येव समाधीयते न बहिर्मुखं भवतीति चेत्, व्यापकत्वेन तस्य विषयसंबन्धानुच्छेदेन नित्यत्वेन च

विषयप्रकाशस्वभावस्यानिवृत्तौ का तिरोधानवाचोयुक्तिः ? । वृत्तिप्रतिबन्धश्चैतन्यतिरोधानमिति चेत् कथं तर्हि शरीरिणां विषयग्रहणम् ? । क्वचिदस्य वृत्तयो न निरुध्यन्ते इति चेत् कुतोऽयं विशेषः ? । इन्द्रियप्रत्यासत्तिविशेषात् । यद्येवमिन्द्रियाधीनश्चैतन्यस्य विषयेषु वृत्तिलाभो न संनिधिमात्रनिबन्धनः । सत्यपि व्यापकत्वे सर्वार्थेषु वृत्त्यभावादिन्द्रियवैयर्थ्यप्रसङ्गाच्च साधूक्तमशरीरिणामात्मनां न विषयावबोध इति । तथा चैके वदन्ति । पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मेति । अनवबोधे च तेषां नाधिष्ठातार इति तेभ्यः परः सर्वार्थदर्शिसहजज्ञानमयः कर्तृस्वभावः कोऽप्यधिष्ठाता कल्पनीयः । चेतनमधिष्ठातारमन्तरेणाचेतनानां प्रवृत्त्यभावात् । स किमेकोऽनेको वा ? । एक इति वदामः । बहूनामसर्वज्ञत्वेऽस्मदादिवदसामर्थ्यादपरेषामनुपयोगात् । न च समप्रधानानां भूयसां सर्वदैकमत्ये हेतुरस्तीति कदाचिदनुत्पत्तिरपि कार्यस्य स्यात् एकाभिप्रायानुरोधेन सर्वेषां प्रवृत्तावेकस्यैश्वरत्वं नापरेषाम् । मठपरिषदामिव कार्योत्पत्त्यनुरोधेन सर्वेषामविरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्यविशेषेण सिद्धस्य कर्तृविशेषस्य सर्वज्ञत्वान्न कुत्रचिद्वस्तुनि विशेषानुपलम्भः अतो न तन्निबन्धनं मिथ्याज्ञानं मिथ्याज्ञानाभावे च न तन्मूलौ रागद्वेषौ तयोरभावान्न तत्पूर्विका प्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ तयोरभावात् तज्जयोरपि सुखदुःखयोरभावः सर्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणो भगवानीश्वर इति केचित् । अन्ये तु बुद्धिरेव तस्याव्याहता क्रियाशक्तिरित्येवं वदन्त इच्छाप्रयत्नावप्यनङ्गीकुर्वाणाः षड्गुणाधिकरणोऽयमित्याहुः । स किं बद्धो मुक्तो वा ? । न तावद्बद्धो बन्धनसमाज्ञातस्य बन्धहेतोः क्लेशादेरसंभवात् । मुक्तोऽपि न भवति बन्धविच्छेदपर्यायत्वान्मुक्तेः । नित्यमुक्तस्तु स्यात् । यदाह भगवान् पतञ्जलिः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इति ॥ Nyâyakandali pp. 54–57.

2.

"अक्षपादमते देवः सृष्टिसंहारकृच्छिवः ।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः ॥

अत्र प्रयोगमेवं शैवा व्याहरन्ते । भूभूधरसुधाकरदिनकरमकराकरादिकं बुद्धिमत्पूर्वकं, कार्यत्वात् । यद्यत्कार्यं तत्तद्बुद्धिमत्पूर्वकं यथा घटः । कार्यं चेदम् । तस्माद्बुद्धिमत्पूर्वकम् । यश्चास्य बुद्धिमान् स्रष्टा स ईश्वर एवेत्यन्वयः । व्यतिरेके गगनम् । न चायमसिद्धो हेतुः । भूभूधरादीनां स्वस्वकारणकलापजन्यत्वेनावयवितया वा कार्यत्वस्य जगति सुप्रसिद्धत्वात् । नापि विरुद्धोऽनैकान्तिको वा । विपक्षादत्यन्तं व्यावृत्तत्वात् । नापि कालात्ययापदिष्टः । प्रत्यक्षागमबाध्यमानसाध्यधर्मधर्मिविषये हेतोः प्रवर्तनात् । नापि प्रकरणसमः । तत्प्रतिपन्थिपदार्थस्वरूपसमर्थनप्रथितप्रत्यनुमानोदयाभावात् । अथ निर्वृतात्मवदशरीरत्वादेव न संभवति सृष्टिसंहारकर्तेश्वर इति प्रत्यनुमानोदयात् कथं न प्रकरणसम इति चेत् । उच्यते । अत्र त्वदीयानुमाने साध्यमान ईश्वरो धर्मी त्वया प्रतीतोऽप्रतीतो वाऽभिप्रेयते ! अप्रतीतश्चेत् तदा त्वत्परिकल्पितहेतोराश्रया-

सिद्धिदोषः प्रसज्येत। प्रतीतश्चेत् तर्हि येन प्रमाणेन प्रतीतस्तेनैव स्वयमुद्भावितनिजतनुरपि किमिति नाभ्युपेयत इति कथमशरीरत्वम्। ततो न प्रकरणसमदोषता हेतोः। अतः साधूक्तं सृष्टिसंहारकृच्छिव इति। तथा विभुराकाशवत्सर्वजगद्व्यापकः। नियतैकस्थानवर्तित्वे ह्यनियतप्रदेशवर्तिनां पदार्थानां प्रतिनियतयथावन्निर्माणानुपपत्तेः। न ह्येकस्थानस्थितः कुम्भकारोऽपि दूरतरघटादिघटनायां व्याप्रियते। तस्माद्विभुः। तथा नित्यैकसर्वज्ञः। नित्यश्चासावेकश्च नित्यैकः स चासौ सर्वज्ञश्चेति विशेषणत्रयसमासः। तत्र नित्योऽप्रच्युतानुत्पन्नस्थिरैकरूपः कूटस्थः। ईश्वरस्य ह्यनित्यत्वे पराधीनोत्पत्तिसव्यपेक्षया कृतकत्वप्राप्तिः। स्वोत्पत्तावपेक्षितपरव्यापारो हि भावः कृतक इष्यते। कृतकश्चेज्जगत्कर्ता स्यात् तदा तस्याप्यपरेण कर्त्रा भाव्यमनित्यत्वादेव। अपरस्यापि च कर्तुरन्येन कर्त्रा भवनीयमित्यनवस्थानदी दुस्तरा स्यात्। तस्मान्नित्य एवाभ्युपगमनीयः। नित्योऽपि स एकोऽद्वितीयो मन्तव्यो बहूनां हि जगत्कर्तृत्वस्वीकारे परस्परं पृथक्पृथगन्यान्यविसदृशमतिव्यापृतत्वेनैकैकपदार्थस्य विसदृशनिर्माणे सर्वमसमञ्जसमापद्येतेति युक्तमेक इति विशेषणम्। एकोऽपि सर्वज्ञः सर्वपदार्थानां सामस्त्येन ज्ञाता सर्वज्ञत्वाभावे हि विधित्सितपदार्थोपयोगि जगत्प्रसृमरविप्रकीर्णपरमाणुकणप्रचयसम्यक्सामग्रीमीलनाक्षमतया याथातथ्येन पदार्थानां निर्माणं दुर्घटं भवेत्। सर्वज्ञत्वे पुनः सकलप्राणिनां संमीलितसमुचितकारणकलापानुरूप्येण कार्यं वस्तु निर्मिमाणः स्वार्जितपुण्यपापानुमानेन च स्वर्गनरकयोः सुखदुःखोपभोगं ददानः सर्वथौचितीं नातिवर्तेत। तथा चोक्तं तद्भक्तैः—

ज्ञानमप्रातिघं यस्य वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम्॥
अतो जन्तुरनीशोयमात्मनः सुखदुःखयोः
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा॥ Guṇa Com. on षड्. pp. 51–53.

3.

नतु मा भूत्सुगतादिको देवः, जगत्स्रष्टा त्वीश्वरः किमिति नाङ्गीक्रियते?। तत्साधकप्रमाणाभावादिति ब्रूमः। अथास्त्येव तत्साधकप्रमाणम्। क्षित्यादिकं बुद्धिमत्कर्तृकं, कार्यत्वात् घटादिवत्। न चायमसिद्धो हेतुः। क्षित्यादेः सावयवत्वेन कार्यत्वप्रसिद्धेः। तथाहि उर्वीपर्वततर्वादिकं सर्वं कार्यं, सावयवत्वात्, घटवत्। नापि विरुद्धः। निश्चितकर्तृके घटादौ कार्यत्वदर्शनात्। नाप्यनैकान्तिकः। निश्चिताकर्तृकेभ्यो व्योमादिभ्यो व्यावर्तमानत्वात्। नापि कालात्ययापदिष्टः। प्रत्यक्षागमाबाधितविषयत्वात्। न च वाच्यं घटकर्त्रादिदृष्टान्तदृष्टासर्वज्ञत्वासर्वगतत्वकर्तृत्वादिधर्मानुरोधेन सर्वज्ञादिविशेषणविशिष्टसाध्यविपर्ययसाधनाद्विरुद्धो हेतुः। दृष्टान्तश्च साध्यविकलो घटादौ तथाभूतबुद्धिमतोऽभावात् इति। यतः साध्यसाधनयोर्विशेषेण व्याप्तौ गृह्यमाणायां सकलानुमानोच्छेदप्रसक्तिः। किंतु सामान्येनान्वयव्यतिरेकाभ्यां हि व्याप्तिरवधार्यते। तौ चानन्त्याद्व्यभिचाराच्च विशेषेषु गृहीतु न

शक्यौ। तेन बुद्धिमत्पूर्वकत्वमात्रेण कार्यत्वस्य व्याप्तिः प्रत्येतव्या, न शरीरित्वादिना। न खलु कर्तृत्वसामग्र्यां शरीरमुपयुज्यते। तद्व्यतिरेकेणापि ज्ञानेच्छाप्रयत्नाश्रयत्वेन च शरीरकरणे कर्तृत्वोपलम्भात्। अकिंचित्करस्यापि सहचरत्वमात्रेण कारणत्वे वह्निपैङ्गल्यस्यापि धूमं प्रति कारणत्वप्रसङ्गः स्यात्। विद्यमानेऽपि हि शरीरे ज्ञानादीनां समस्तानां व्यस्तानां वाभावे कुलालादावपि कर्तृत्वं नोपलभ्यते। प्रथमं हि कार्योत्पादककारणकलापज्ञानं, ततः करणेच्छा, ततः प्रयत्नः, ततः फलनिष्पत्तिरित्यमीषां त्रयाणां समुदितानामेव कार्यकर्तृत्वे सर्वत्राव्यभिचारः। सर्वज्ञता चास्याखिलकार्यकर्तृत्वात्सिद्धा। प्रयोगोऽत्र। ईश्वरः सर्वज्ञोऽखिलक्षित्यादिकार्यकर्तृत्वात्। यो हि यस्य कर्ता स तदुपादानाद्यभिज्ञः, यथा घटोत्पादकः कुलालो मृत्पिण्डाद्यभिज्ञः। जगतः कर्ता चायम्। तस्मात्सर्वज्ञ इति। उपादानं हि जगतः पार्थिवाप्यतैजसवायवीयलक्षणाश्चतुर्विधाः परमाणवः। निमित्तकारणमदृष्टादि, भोक्तात्मा, भोग्यं तन्वादि। न चैतदनभिज्ञस्य क्षित्यादौ कर्तृत्वं संभवत्यस्मदादिवत्। ते च तदीयज्ञानादयो नित्याः, कुलालादिभ्यो विलक्षणत्वात्। एकत्वं च क्षित्यादिकर्तृरनेककर्तृणामेकाधिष्ठातृनियमितानां प्रवृत्त्युपपत्तेः सिद्धम्। प्रसिद्धा हि स्थपत्यादीनामेकसूत्रधारपरतन्त्राणां महाप्रासादिकार्यकरणे प्रवृत्तिः। नच ईश्वरस्यैकरूपत्वे नित्यत्वे च कार्याणां कादाचित्कत्वं वैचित्र्यं च विरुध्यते इति वाच्यम्। कादाचित्कविचित्रसहकारिलाभेन कार्याणां कादाचित्कत्ववैचित्र्यसिद्धौ विरोधासंभवात्। ननु क्षित्यादेर्बुद्धिमद्धेतुकत्वेऽक्रियादर्शिनोऽपि जीर्णकूपादिष्विव कृतबुद्धिरुत्पद्यते। न चात्र सा उत्पद्यमाना दृष्टा। अतो दृष्टान्तदृष्टस्य हेतोर्धर्मिण्यभावादसिद्धत्वम्। तदप्ययुक्तम्। यतः प्रामाणिकमितरं वापेक्ष्येदमुच्यते। यदीतरं, तर्हि धूमादावप्यसिद्धत्वानुषङ्गः। प्रामाणिकस्य तु नासिद्धत्वं, कार्यत्वस्य बुद्धिमत्कर्तृपूर्वकत्वेन प्रतिपन्नाविनाभावस्य क्षित्यादौ प्रसिद्धेः। पर्वतादौ धूमादिवत्। न च यावन्तः पदार्थाः कृतकाः तावन्तः कृतबुद्धिमात्मन्याविर्भावयन्तीति नियमोऽस्ति। खातप्रतिपूरितायां भुव्यक्रियादर्शिनः कृतबुद्ध्युत्पादाभावात्। किंच बुद्धिमत्कारणाभावोऽत्रानुपलब्धितो भवता प्रसाध्यते। एतच्चायुक्तम्। दृश्यानुपलब्धेरेवाभावसाधकत्वोपपत्तेः। न चेयमत्र संभवति। जगत्कर्तुरदृश्यत्वात्। अनुपलब्धस्य चाभावसाध्यत्वे पिशाचादेरपि तत्प्रसक्तिः स्यादिति॥

अत्र प्रतिविधीयते। तत्र यत्तावत् क्षित्यादेर्बुद्धिमद्धेतुकत्वसिद्धये कार्यत्वसाधनमुक्तं, तत् किं सावयवत्वं १ प्रागसतः स्वकारणसत्तासमवायः २ कृतमितिप्रत्ययविषयत्वं ३ विकारित्वं, ४ वा स्यात्॥ यदि सावयवत्वं, तदेदमपि किमवयवेषु वर्तमानत्वं १ अवयवैरारभ्यमाणत्वं २ प्रदेशवत्त्वं ३ सावयवमितिबुद्धिविषयत्वं ४ वा। तत्राद्यपक्षेऽवयवसामान्येनानैकान्तिकोऽयं हेतुः तद्ध्यवयवेषु वर्तमानमपि निरवयवमकार्यं च प्रोच्यते। द्वितीयपक्षे तु साध्यसमो हेतुः। यथैव हि क्षित्यादेः कार्यत्वं साध्यं, एवं परमाण्वाद्यवयवारभ्यत्वम पि। तृतीयोऽप्याकाशेनानैकान्तिकः। तस्य प्रदेशवत्त्वेऽप्यकार्यत्वात्। प्रसाधयिष्यते चाग्रतोऽस्य प्रदेशवत्त्वम्। चतुर्थकक्षायामपि

तेनैवानेकान्तः । न चास्य निरवयवत्वं व्यापित्वविरोधात्परमाणुवत् ॥ १ ॥ नापि प्रागसतः स्वकारणसत्तासमवायः कार्यत्वं तस्य नित्यत्वेन तल्लक्षणायोगात् । तल्लक्षणत्वे वा कार्यस्यापि क्षित्यादेस्तद्वन्नित्यत्वानुषङ्गात् कस्य बुद्धिमद्धेतुकत्वं साध्यते । किंच योगिनामशेषकर्मक्षये पक्षान्तःपातिन्यप्रवृत्तत्वेन भागासिद्धोऽयं हेतुः तत्प्रक्षयस्य प्रध्वंसाभावरूपत्वेन सत्तास्वकारणसमवाययोरभावात् ॥ २ ॥ कृतमिति प्रत्ययविषयत्वमपि न कार्यत्वं खननोत्सेचनादिना कृतमाकाशमित्यकार्येऽप्याकाशे वर्तमानत्वेनानैकान्तिकत्वात् ॥३॥ विकारित्वस्यापि कार्यत्वे महेश्वरस्यापि कार्यत्वानुषङ्गः। सतो वस्तुनोऽन्यथाभावो हि विकारित्वम्। तच्चेश्वरकार्यस्याप्यस्तीत्यस्यापरबुद्धिमद्धेतुकत्वप्रसङ्गादनवस्था स्यात् अविकारित्वे चास्य कार्यकारित्वमतिदुर्घटमिति ॥४॥ कार्यस्वरूपस्य विचार्यमाणस्यानुपपद्यमानत्वादसिद्धः कार्यत्वादित्ययं हेतुः। किं च। कादाचित्कं वस्तु लोके कार्यत्वेन प्रसिद्धम्। जगतस्तु महेश्वरवत्सदा सत्त्वात्कथं कार्यत्वम्। तदन्तर्गततरुतृणादीनां कार्यत्वात्तस्यापि कार्यत्वे महेश्वरान्तर्गतानां बुद्ध्यादीनां परमाण्वाद्यन्तर्गतानां पाकजरूपादीनां च कार्यत्वात् महेश्वरादेरपि कार्यत्वानुषङ्गः। तथाचास्याप्यपरबुद्धिमद्धेतुककल्पनायामनवस्थापसिद्धान्तश्चानुषज्येते । अस्तु वा यथाकथंचिज्जगतः कार्यत्वं तथापि कार्यमात्रमिह हेतुत्वेन विवक्षितं तद्विशेषो वा । यद्याद्यः तर्हि न ततो बुद्धिमत्कर्तृविशेषसिद्धिः। तेन समं व्याप्त्यसिद्धेः । किंतु कर्तृसामान्यस्य । तथा च हेतोरकिंचित्करत्वं साध्यविरुद्धसाधनाद्विरुद्धत्वं वा। ततः कार्यत्वं कृतबुद्ध्युत्पादकम्। बुद्धिमत्कर्तुर्गमकं न सर्वम्। सारूप्यमात्रेण च गमकत्वे बाष्पादेरप्यग्निं प्रति गमकत्वप्रसङ्गः । महेश्वरं प्रत्यात्मत्वादेः सादृश्यात्संसारित्वकिंचिज्ज्ञत्वाखिलजगदकर्तृत्वानुमापकानुषङ्गः। तुल्याक्षेपसमाधानत्वात् । ततो बाष्पधूमयोः केनचिदंशेन साम्येऽपि यथा कुतश्चिद्विशेषाद्धूमोऽग्निं गमयति न बाष्पादिः तथा क्षित्यादीतरकार्यत्वयोरपि कश्चिद्विशेषोऽभ्युपगम्यः ॥ अथ द्वितीयः तर्हि हेतोरसिद्धत्वं कार्यविशेषस्याभावाद्भावे वा जीर्णकूपप्रासादादिवदक्रियादर्शिनोऽपि कृतबुद्ध्युत्पादकत्वप्रसङ्गः। समारोपान्नेति चेत् सोऽप्युभयत्राविशेषतः किं न स्यात्। उभयत्र कर्तुरतीन्द्रियत्वाविशेषात् । अथ प्रामाणिकस्यास्त्येवात्र कृतबुद्धिः ननु कथं तस्य तत्र कृतत्वावगमोऽनेनानुमानेनानुमानान्तरेण वा । आद्येऽन्योन्याश्रयः । तथाहि । सिद्धविशेषणाद्धेतोरस्योत्थानं तदुत्थाने च हेतोर्विशेषणसिद्धिरिति । द्वितीयपक्षेऽनुमानान्तरस्यापि सविशेषणहेतोरेवोत्थानम् । तत्राप्यनुमानान्तरात्तत्सिद्धावनवस्था। तन्न कृतबुद्ध्युत्पादकत्वरूपविशेषणसिद्धिः। तथा च विशेषणासिद्धत्वं हेतोः। खातप्रतिपूरितभूनिदर्शनेन कृतकानामात्मनि कृतबुद्ध्युत्पादकत्वनियमाभावः इति तदप्यसत् तत्राकृत्रिमभूभागादिसारूप्यस्य तदनुत्पादकस्य सद्भावात्तदनुत्पादकस्योपपत्तेः। नच क्षित्यादावप्यकृत्रिमसंस्थानसारूप्यमस्ति, येनाकृत्रिमत्वबुद्धिरुत्पद्यते। तस्यैवानभ्युपगमात्। अभ्युपगमे चापसिद्धान्तप्रसक्तिः स्यादिति। कृतबुद्ध्युत्पादकत्वविशेषणासिद्धेर्विशेषणासिद्धत्वं हेतोः। सिध्यतु वा तथाप्यसौ विरुद्धः। घटादाविव शरीरादिविशिष्टस्यैव बुद्धिमत्कर्तुरत्र प्रसाधनात्। नन्वेवं

दृष्टान्तदार्ष्टान्तिकसाम्यान्वेषणे सर्वत्र हेतूनामनुपपत्तिरिति चेत् न। धूमाद्यनुमाने महानसेतरसाधारणस्याग्नेः प्रतिपत्तेः। अत्राप्येवं बुद्धिमत्सामान्यप्रसिद्धेर्न विरुद्धत्वमित्यप्ययुक्तं दृश्यविशेषाधारस्यैव तत्सामान्यस्य कार्यत्वहेतोः प्रसिद्धेर्नादृश्यविशेषाधारस्य। तस्य स्वप्नेऽप्यप्रतीतेः। खरविषाणाधारतत्सामान्यवत्। ततो यादृशात्कारणाद्यादृशं कार्यमुपलब्धं तादृशादेव तादृश्यमनुमातव्यं यथा यावद्धर्मात्मकाद्वह्नेर्यावद्धर्मात्मकस्य धूमस्योत्पत्तिः सुदृढप्रमाणात्प्रतिपन्ना तादृशादेव धूमात्तादृशस्यैवाग्नेरनुमानमिति। एतेन साध्यसाधनयोर्विशेषेण व्याप्तौ गृह्यमाणायां सर्वानुमानोच्छेदप्रसक्तिरित्याद्यपास्तं द्रष्टव्यमिति। तथाकृष्टप्रभवैस्तरुतृणादिभिर्व्यभिचार्ययं हेतुः। द्विविधानि कार्याण्युपलभ्यन्ते, कानिचिद्बुद्धिमत्पूर्वकाणि यथा घटादीनि कानिचित्तु तद्विपरीतानि यथाकृष्टप्रभवतृणादीनि। तेषां पक्षीकरणादव्यभिचारे स श्यामस्तत्पुत्रत्वादितरतत्पुत्रवदित्यादेरपि गमकत्वप्रसङ्गान्न कश्चिद्धेतुः व्यभिचारी स्यात् व्यभिचारविषयस्य सर्वत्रापि पक्षीकर्तुं शक्यत्वात्। ईश्वरबुद्ध्यादिभिश्च व्यभिचारः तेषां कार्यत्वे सत्यपि समवायिकारणादीश्वराद्विभिन्नबुद्धिमत्पूर्वकत्वाभावात्। तदभ्युपगमे चानवस्था। तथा कालात्ययापदिष्टश्चायं अकृष्टप्रभवाङ्कुरादौ कर्तृभावस्याध्यक्षेणाध्यवसायात् अग्नेरनुष्णत्वे साध्ये द्रव्यत्ववत्। ननु तत्राप्यदृश्य ईश्वर एव कर्तेति चेत् तन्न। यतस्तत्र तत्सद्भावोऽस्मादेवान्यतो वा प्रमाणात्सिध्येत्। प्रथमपक्षे चक्रकम्। अतो हि तत्सद्भावे सिद्धेऽस्यादृश्यत्वेनानुपलम्भसिद्धिः तत्सिद्धौ च कालात्ययापदिष्टत्वाभावः ततश्चास्मात्तत्सद्भावसिद्धिरिति। द्वितीयपक्षोऽप्ययुक्तः, तत्सद्भावावेदकस्य प्रमाणान्तरस्यैवाभावात्। अस्तु वा तत्र तत्सद्भावः तथाप्यस्यादृष्टत्वे शरीराभावः कारणं विद्यादिप्रभावः जातिविशेषो वा। प्रथमपक्षे कर्तृत्वानुपपत्तिः अशरीरत्वात् मुक्तात्मवत्। ननु शरीराभावेऽपि ज्ञानेच्छाप्रयत्नाश्रयत्वेन शरीरकरणे कर्तृत्वमुपपद्यत इत्यप्यसमीक्षिताभिधानं शरीरसंबन्धेनैव तत्प्रेरणोपपत्तेः शरीराभावे मुक्तात्मवत्तदसंभवात्। शरीराभावे च ज्ञानाद्याश्रयत्वमप्यसंभाव्यं तदुत्पत्तावस्य निमित्तकारणत्वात्। अन्यथा मुक्तात्मनोऽपि तदुत्पत्तिप्रसक्तेः। विद्यादिप्रभावस्य चादृश्यत्वहेतुत्वे कदाचिदसौ दृश्यते न खलु विद्याभृतां शाश्वतिकमदृश्यत्वं दृश्यते पिशाचादिवत्। जातिविशेषोपि नादृश्यत्वे हेतुरेकस्य जातिविशेषाभावादनेकव्यक्तिनिष्ठत्वात्तस्य। अस्तु वा दृश्योऽदृश्यो वासौ तथापि किं सत्तामात्रेण १ ज्ञानवत्त्वेन २ ज्ञानेच्छाप्रयत्नवत्त्वेन ३ तत्पूर्वकव्यापारेण ४ ऐश्वर्येण ५ वा क्षित्यादेः कारणं स्यात्। तत्राद्यपक्षे कुलालादीनामपि जगत्कर्तृत्वमनुषज्यते सत्त्वाविशेषात्। द्वितीये तु योगिनामपि कर्तृत्वापत्तिः। तृतीयोऽप्यसाम्प्रतः। अशरीरस्य पूर्वमेव ज्ञानाद्याश्रयत्वप्रतिषेधात्। चतुर्थोऽप्यसंभाव्यः। अशरीरस्य कायवाक्कृतव्यापारवत्त्वासंभवात्। ऐश्वर्यमपि ज्ञातृत्वं कर्तृत्वमन्यद्वा। ज्ञातृत्वं चेत् तत्किं ज्ञातृत्वमात्रं सर्वज्ञातृत्वं वा। आद्यपक्षे ज्ञातैवासौ स्यान्नेश्वरः अस्मादाद्यन्यज्ञातृत्ववत्। द्वितीयेऽप्यस्य सर्वज्ञत्वमेव स्यान्नैश्वर्यं सुगतादिवत्। अथ कर्तृत्वं, तर्हि कुम्भकारादीनामप्यनेककार्यकारिणामैश्वर्यप्रसक्तिः। नाप्यन्यत्

इच्छाप्रयत्नव्यतिरेकेणान्यस्यैश्वर्यनिबन्धनस्येश्वरेऽभावात् ॥ किं चेश्वरस्य जगन्निर्माणे यथारुचि प्रवृत्तिः १ कर्मपारतन्त्र्येण २ करुणया ३ क्रीडया ४ निग्रहानुग्रहविधानार्थं ५ स्वभावतो ६ वा । अत्राद्यविकल्पे कदाचिदन्यादृश्येव सृष्टिः स्यात् । द्वितीये स्वातन्त्र्यहानिः । तृतीये सर्वमपि जगत्सुखितमेव करोति । अथेश्वरः किं करोति ! पूर्वार्जितैरेव कर्मभिर्वशीकृता दुःखमनुभवन्ति । तदा तस्य कः पुरुषकारः । अदृष्टापेक्षस्य च कर्तृत्वे किं तत्कल्पनया । जगतस्तदधीनतैवास्तु । चतुर्थपञ्चमयोस्तु रागद्वेषवत्ताभावः प्रसज्यते । तथा हि रागवानीश्वरः क्रीडाकारित्वाद्बालवत् तथा अनुग्रहप्रदत्वाद्राजवत् तथा द्वेषवानसौ निग्रहप्रदत्वात्तद्वदेव इति । अथ स्वभावतः तर्ह्यचेतनस्यापि जगत एव स्वभावतः प्रवृत्तिरस्तु किं तत्कर्तृकल्पनयेति । न कार्यत्वहेतुर्बुद्धिमन्तं कर्तारमीश्वरं साधयति । एवं संनिवेशविशिष्टत्वादचेतनोपादानत्वादभूतभावित्वादित्यादयोऽपि स्वयमुत्थाप्याः तुल्याक्षेपसमाधानत्वात्। किं च क्षित्यादेर्बुद्धिमत्पूर्वकत्वे साध्ये प्रदीयमानाः सर्वेऽपि हेतवो विरुद्धाः । दृष्टान्तानुग्रहेण सशरीरासर्वज्ञासर्वकर्तृपूर्वकत्वसाधनात् । न च धूमात्पावकानुमानेऽप्ययं दोषः तत्र तार्णपार्णादिविशेषाधारवह्निमात्रव्याप्तस्य धूमस्य दर्शनात् । नैवमत्र सर्वज्ञकर्तृविशेषाधिकरणतत्सामान्येन कार्यत्वस्यास्ति व्याप्तिः सर्वज्ञस्य कर्तुरतोऽनुमानात्प्रागसिद्धेः । व्यभिचारिणश्चामी बुद्धिमन्तमन्तरेणापि विद्युदादीनां प्रादुर्भावविभावनात् स्वप्नाद्यवस्थायामबुद्धिमत्पूर्वस्यापि कार्यस्य दर्शनाच्चेति । कालात्ययापदिष्टाश्चैते । प्रत्यक्षागमबाधितपक्षानन्तरं प्रयुक्तत्वात् । तद्बाधा च पूर्वमेव दर्शिता । प्रकरणसमाश्चामी। प्रकरणचिन्ताप्रवर्तकानां हेत्वन्तराणां सद्भावात् । तथा हि। ईश्वरो जगत्कर्ता न भवति निरुपकरणत्वात् दण्डचक्रचीवराद्युपकरणरहितकुलालवत् तथा व्यापित्वादाकाशवत् एकत्वात्तद्वदित्यादय इति । नित्यत्वादीनि तु विशेषणानि तद्व्यवस्थापनायानीयमानानि षण्ढं प्रति कामिन्या रूपसम्पन्निरूपणप्रायाण्यपकर्षणीयान्येव ॥ विचारासहत्वाख्यापनार्थं तु किंचिदुच्यते । तत्रादौ नित्यत्वं विचार्यते । तच्चेश्वरे न घटते । तथा हि । नेश्वरो नित्यः स्वभावभेदेनैव क्षित्यादिकार्यकर्तृत्वात् । अप्रच्युतानुत्पन्नस्थिरैकस्वभावं कूटस्थं नित्यमिति हि नित्यत्वलक्षणाभ्युपगमात् । स्वभावभेदानभ्युपगमे च सृष्टिसंहारादिविरुद्धकार्यकारित्वमतिदुर्घटम् । नापि तज्ज्ञानादीनां नित्यत्वं वाच्यम् । प्रतीतिविरोधात्। ईश्वरज्ञानादयो न नित्या ज्ञानादित्वादस्मदादिज्ञानादिवदित्यनुमानविरोधाच्च । एतेन तदीयज्ञानादयो नित्या इत्यादि यदवादि तदपोहितममूहनीयम् । सर्वज्ञत्वमप्यस्य केन प्रमाणेन ग्राह्यम् । न तावत्प्रत्यक्षेण तस्येन्द्रियार्थसन्निकर्षोत्पन्नत्वेनातीन्द्रियार्थग्रहणासमर्थत्वात् । नाप्यनुमानेन अव्यभिचारिलिङ्गाभावात् । ननु जगद्वैचित्र्यान्यथानुपपत्तिरूपं तदस्त्येवेति चेत् न । तेन सहाविनाभावाभावात् । जगद्वैचित्र्यस्य सार्वज्ञ्यं विनापि शुभाशुभकर्मपरिपाकादिवशेनोपपद्यमानत्वात् । किं चायं यदि सर्वज्ञः तदा जगदुपप्लवकरणस्वैरिणः पश्चादपि कर्तव्यनिग्रहानसुरादींस्तदधिक्षेपकृतोऽस्मदादींश्च किमर्थं सृजतीति नायं सर्वज्ञः । तथा बहूनामेककार्यकरणे वैमत्य-

संभावनाभयेन महेशितुरेकत्वकल्पना भोजनादिव्ययभयात् कृपणस्यात्यन्तवल्लभपुत्रकलत्रमित्रादिपरित्यजनेन शून्यारण्यानीसेवनतुलामाकलयति । अनेककीटिकासरघाशतसंपाद्यत्वेऽपि शक्रमूर्धमधुच्छत्रादिकार्याणामेकरूपतया विगानेनोपलम्भात् । किं चेश्वरस्याखिलजगत्कर्तृत्वेऽभ्युपगम्यमाने शास्त्राणां प्रमाणेतरताव्यवस्थाविलोपः स्यात् । तथा हि । सर्वं शास्त्रं प्रमाणमीश्वरप्रणीतत्वादितरप्रणीतशास्त्रवत् प्रतिवाद्यादिव्यवस्थाविलोपश्च सर्वेषामीश्वरादेशविधायित्वेन तत्प्रतिलोमाचरणानुपपत्तेः प्रतिवाद्यभावप्रसङ्गात् । इति न सृष्टिकरस्य महेश्वरस्य कथंचिदपि सिद्धिः । ततः सद्भूतार्थप्रकाशकत्वाद्वीतराग एव सर्वज्ञो देवो देवत्वेनाभ्युपगमनार्हो नापरः कश्चिदिति स्थितम् ॥ Guṇaratna's Com. on षड्०, pp. 115-124.

4.

यत्प्रमाणं सर्वं धरणिधरणीधरतरुपुरप्राकारादिकं बुद्धिमत्पूर्वकं कार्यत्वात् यद्यत् कार्यं तत्तद्बुद्धिमत्पूर्वकं यथा घटः कार्यं चेदं तस्माद्बुद्धिमत्पूर्वकमिति प्रयोगः । स भगवानीश्वर एवेत्यर्थः । व्यतिरेके गगनम् । न चायमसिद्धो हेतुः । भूभूधरादीनां स्वकारणकलापजन्यत्वेनावयवितया वा कार्यत्वस्य जगत्प्रसिद्धत्वात् । नापि विरुद्धानैकान्तिकदोषौ । विपक्षादत्यन्तव्यावृत्तत्वात् । नापि कालात्ययापदिष्टः । प्रत्यक्षानुमानोपमानागमाबाध्यमानधर्मधर्मित्वात् । नापि प्रकरणसमः । तत्परिपन्थिपदार्थस्वरूपसमर्थनप्रथितप्रत्यनुमानोदयाभावात् । अथ निर्वृतात्मशरीरत्वादेव न संभवति सृष्टिसंहारकर्तेश्वर इति प्रत्यनुमानोदयात् कथं प्रकरणसमदूषणाभाव इति चेत् । उच्यते । अत्र साध्यमान ईश्वररूपो धर्मी प्रतीतोऽप्रतीतो वानुमन्यते सुहृदा । अप्रतीतश्चेद्भवत्परिकल्पितहेतोरेवाश्रयासिद्धिदोषप्रसङ्गः । प्रतीतश्चेत्तर्हि येनैव प्रमाणेन प्रतीतस्तेनैव स्वयमुद्भावितस्वतनुरपि किमर्थं नाभ्युपगम्यते इति कथमशरीरत्वम् । अतो न दुष्टो हेतुरिति साधूक्तं सृष्टिसंहारकृच्छिवः । तथा विभुः सर्वव्यापकः । एकनियतयथावन्निर्माणानुपपत्तेः । न ह्येकस्थानस्थितकुम्भकारोऽपि दूरदूरतरघटघटनायां व्याप्रियते । तस्माद्विभुर्भगवान् । तथा नित्यैकः । नित्यश्चासावेकश्चेति यतो नित्योतऽएव एकः । अप्रच्युतानुत्पन्नस्थिरैकरूपं नित्यम् । भगवतो ह्यनित्यत्वे पराधीनोत्पत्तिसव्यपेक्षतया कृतकत्वप्राप्तिः । स्वोत्पत्तावपेक्षितपरव्यापारो हि भावः कृतक इष्यते इति । अथ चेत्कश्चिज्जगत्कर्तारमपरमभिदधाति स एवानुयुज्यते । सोऽपि नित्योऽनित्यो वा । नित्यश्चेदधिकृतेश्वरेण किमपराद्धम् । अनित्यश्चेत्तस्याप्यन्येनोत्पादकान्तरेण भाव्यमनित्यत्वादेव तस्याप्यन्येनेति नित्यानित्यवादविकल्पशिल्पशतस्वीकारे कल्पान्तेऽपि न जल्पसमाप्तिः । तस्मान्नित्य एव भगवान् । अन्यच्चैकोऽद्वितीयः बहूनां हि जगत्कर्तृत्वस्वीकारे परस्परं पृथक् पृथगन्योन्यसदृशमतिव्यापारतयैकैकपदार्थस्य विसदृशनिर्माणे सर्वमसमञ्जसमापद्येतेति भगवानेक एवेति युक्तियुक्तं नित्यैकेतिविशेषणम् । तथा सर्वज्ञ इति सर्वपदार्थानां सर्वविशेषज्ञाता । सर्वज्ञत्वाभावे हि विधित्सितपदार्थोपयोगयोग्यजगत्प्रसृमरविप्रकीर्णपरमाणुकणप्रचयसम्यक्सामग्रीमीलनाक्षमतया याथातथ्येन पदार्थनिर्माण-

रचना दुर्घटा। सर्वज्ञश्च सन् सकलप्राणिनां संमीलितसमुचितकारणकलापानुरूपपरिमाणडल्यानुसारेण कार्यवस्तु निर्मिमाणः स्वार्जितपुण्यपापानुमानेन च स्वर्गनरकयोः सुखदुःखोपभोगं ददानः केषां नाभिमतः। तथा चोक्तम्—

ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा।
अन्यो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः॥ इति Maṇibhadra's
Com. on षड्., pp. 12-13.

5.

यदुक्तम्—तनुभुवनकरणादिकं विमत्याधिकरणभावापन्नं विशिष्टबुद्धिमत्कारणपूर्वकं कार्यत्वाद् घटवदिति तदयुक्तम्। तथाविधविशिष्टकारणपूर्वकत्वेन व्याप्त्यसिद्धेः। कारणपूर्वकत्वमात्रेण तु कार्यं व्याप्तं कार्यविशेषोपलब्धौ कारणविशेषप्रतिपत्तिर्गृहीतप्रतिबन्धस्यैव भवति। न चात्यन्तादृष्टे तथा प्रतीतिर्भवति। घटे तत्पूर्वकत्वं प्रतिपन्नमिति चेत् युक्तं तत्र घटस्य कार्यविशेषत्वप्रतिपत्तेः। न त्वेवं सरित्समुद्रपर्वतादौ बुद्धिमत्कारणपूर्वकत्वेन संबन्धो गृहीत इति। नन्वत एव घटसंस्थानविशेषदर्शनवत्पर्वतादावपि विशिष्टसंस्थानदर्शनाद् बुद्धिमत्कारणपूर्वकत्वस्य साधनं क्रियते। नैतदेवं युक्तम्। यतो न हि संस्थानशब्दप्रवृत्तिमात्रेण सर्वस्य बुद्धिमत्कारणपूर्वकत्वावगतिर्भवति। यदि तु स्यात् मृद्विकारत्वाद्वल्मीकस्यापि घटवत् कुम्भकारकृतिः स्यात्। तथा चोक्तम्—"अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित्। घटादेः करणात् सिध्येद्वल्मीकस्यापि तत्कृतिः" ॥ इति। तदेवं यस्यैव संस्थानविशेषस्य बुद्धिमत्कारणपूर्वकत्वेन संबन्धो गृहीतस्तद्दर्शनमेव तथाविधकारणानुमापकं भवति न संस्थानमात्रमिति। Sûtrakṛtâṅga Com., I. iii., pp. 43-44.

6.

अत्राहुः—सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते। भवन्ति च प्रयोगाः। विवादाध्यासितं भूभूधरादि कार्यं सावयवत्वात् घटादिवत्। तथा विवादाध्यासितमवनिजलधिमहीधरादि कार्यं महत्त्वे सति क्रियावत्त्वात् घटवत्। तनुभुवनादि कार्यं महत्त्वे सति मूर्तत्वात् घटवत् इति। सावयवेषु द्रव्येषु इदमेव क्रियते नान्यत् इति कार्यत्वस्य नियामकं सावयवत्वातिरेकरूपान्तरं नोपलभामहे। कार्यत्वप्रतिनियतं शक्यक्रियत्वं शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति चेत् न कार्यत्वेनानुमितेऽपि विषये ज्ञानशक्ती कार्यानुमेये इत्यन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति ते च प्रतिपन्ने एवेति न कश्चिद्विशेषः। तथा हि घटमणिकादिषु कृतेषु कार्यदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसंनिवेशं नरेन्द्रभवनमालोक्यावयवसंनिवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति। अतस्तनुभुवनादेः कार्यत्वे सिद्धे सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् पुरुषविशेषः सिध्यत्येव............

कुलालादीनां दण्डचक्राद्यधिष्ठानं शरीरद्वारेणैव दृष्टमिति जगदुपादानोपकरणाधिष्ठानमीश्वरस्याशरीरस्यानुपपन्नमिति चेत्। न। संकल्पमात्रेणैव परशरीरगतभूतवे-

तालगरलाद्यपगमविनाशदर्शनात्। कथमशरीरस्य परप्रवर्तनरूपः संकल्प इति चेत्। न शरीरापेक्षः संकल्पः शरीरस्य संकल्पहेतुत्वाभावात्। मन एव हि संकल्पहेतुः। तदभ्युपगतमीश्वरेऽपि कार्यत्वेनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात्। मानसः संकल्पः सशरीरस्यैव समनस्कत्वादिति चेत् न। मनसो नित्यत्वेन देहापगमेऽपि मनसः सद्भावेनानैकान्त्यात्। अतो विचित्रावयवसंनिवेशविशेषतनुभुवनादिकार्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञोऽपि प्रभवतीति निखिलभुवननिर्माणचतुरोऽचिन्त्यापरिमितज्ञानशक्त्यैश्वर्योऽशरीरः संकल्पमात्रसाधनं परिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोनुमानेनैव सिध्यति।

यदुक्तं सावयवत्वादिना कार्यं सर्वं जगत् कार्यं च तदुचितकर्तृविशेषपूर्वकं दृष्टमिति निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति। तदयुक्तम्। महीमहार्णवादीनां कार्यत्वेऽप्येकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात्। न चैकस्य घटस्येव सर्वेषामेकं कार्यत्वम्। येनैकदैवैकः कर्ता स्यात्। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमादर्शनात्।......

भवन्ति च प्रयोगाः—तनुभुवनादि क्षेत्रज्ञकर्तृकम् कार्यत्वात् घटवत्। ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वात् मुक्तात्मवत्। ईश्वरः कर्ता न भवति अशरीरत्वात्तद्वदेव। न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः। तत्राप्यनादेः सूक्ष्मशरीरस्य सद्भावात्। विमतिविषयः कालो न लोकशून्यः कालत्वाद्वर्तमानकालवत् इति।

अपि च किमीश्वरः सशरीरोऽशरीरो वा कार्यं करोति। न तावदशरीरः अशरीरस्य कर्तृत्वानुपलब्धेः। मानसान्यपि कार्याणि सशरीरस्यैव भवन्ति। मनसो नित्यत्वेऽप्यशरीरेषु मुक्तेषु तत्कार्यादर्शनात्। नापि सशरीरः विकल्पासहत्वात्। नापि सशरीरः विकल्पासहत्वात्। तच्छरीरं किं नित्यम् उतानित्यम्। न तावन्नित्यम्। सावयवस्य तस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः। नाप्यनित्यम्। तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात्। स्वयमेव हेतुरिति चेत्। न अशरीरस्य तदयोगात्। अन्येन शरीरेण सशरीर इति चेत्। न। अनवस्थानात्। स किं सव्यापारो निर्व्यापारो वा। अशरीरत्वादेव न सव्यापारः। नापि निर्व्यापारः कार्यं करोति मुक्तात्मवत्। कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वात्। दृष्टान्तस्य च साध्यहीनता। अतो दर्शनानुगुण्येन ईश्वरानुमानं दर्शनानुगुण्यपराहतम् इति शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः॥ Râm. S'rî-Bhâṣya, I.i. 3, pp.133-37 (Vâṇî. Ed.)

———

Stanza VII.

Another doctrine of the Vaiśeṣika school which is next criticized is the *Doctrine of Samavâya.*

'व्यवहारनय' is the common-sense or popularly accepted view of things. Thus the commonly accepted view which speaks of प्रमाण, प्रमेय, and प्रमिति is an example of व्यवहारनय. (लोकप्रतीतापथानुसारेण प्रतिपत्तिगौरवपरिहारेण प्रमाण-प्रमेय-प्रमिति-प्रतिपादनं व्यवहारप्रसिद्ध्यर्थं परीक्षकैः समाश्रितमिति व्यवहारनयाभिप्रायः —Com.): So far we have been dealing with द्रव्यास्तिकनय. Next we come to षाण्मासिक. ऋजुसूत्र is the naive view which takes note of what appears to be only now and here (देशकालान्तर-संबद्धस्वभावरहितं वस्तुतत्त्वं सांप्रतिकमेकस्वभावमकुटिलं ऋजु सूत्रयतीति ऋजुसूत्रः—Com.). The Buddhist क्षणभङ्गवाद view that all reality is क्षणिक, is an example of this kind. It arises from confining the attention to things here and now, that is, क्षणs. Similary विज्ञानमात्रवाद—another Buddhist view—which attempts to avoid all the difficulties of epistemology by regarding ideas as the only reals may be looked upon as ऋजुसूत्र. Or, one may get rid of even this trouble, that of affirming the reality of विज्ञान, and thus hold the simplest of all doctrines, viz. शून्यवाद. The first it the doctrine of Buddhist realists, सौत्रान्तिक and वैभाषिक; the second of the योगाचार; and the third of the माध्यमिक.

Next, शब्दनयः—"शब्दनयश्च ऋजुसूत्राभिमतपर्यायात् शुद्धतरं पर्यायं स्वविषयत्वेन व्यवस्थापयति। तथाहि—तटः, तटी, तटम् इति विरुद्धलिङ्गलक्षणधर्माक्रान्तं भिन्नमेव वस्तु, नहि तत्कृतं धर्मभेदमननुभवतस्तत्संबन्धो युक्तः। तद्धर्मभेदे वा स्वयं धर्मी कथं न भिद्यते?......एकस्मिन्नुदकपरमाणौ आपः इति बहुत्वसंख्याया निर्देशोऽनुपपन्नः॥ न ह्येकत्वसंख्यासमाध्यासितं तदेव विरुद्धबहुत्वसंख्योपेतं भवतीत्येकसंख्ययैव तन्निर्देष्टव्यम्। कालभेदाद्वस्तुभेदः ऋजुसूत्रेणाप्यभ्युपगम्यत एव।...विरमति इति न युक्तः। आत्मार्थतायां हि विरमते इत्यस्यैव प्रयोगसंगतेः। न चैवं लोकशास्त्रव्यवहारविलोप इति वक्तव्यम्। सर्वत्रैव नयमते तद्विलोपस्य समानत्वात्। इति यथार्थशब्दनात् शब्दनयो व्यवस्थितः।"

It will be noticed that शब्दनय insists upon punctiliousness of language so much so that it would not permit the use of the plural 'आपः' for a drop of water or even 'विरमति' (although

grammatically sound) instead of 'विरमते' where the क्रिया is आत्मने. Of course, this would involve a great deal of revolution in the use of words, but this is necessary if we are to avoid looseness of language and secure complete correspondence between language and things, expression and things expressed. ऋजुसूत्र recognises the distinctions made by time; शब्दनय recognises distinctions due to language. Moreover, it frankly admits that in doing so it has frequently to override व्यवहार.

समभिरूढ—carries the punctiliousness of language still further (शुद्धतर). It recognises differences of things corresponding to those of synonyms. "एकसंज्ञासमभिरोहणात् समभिरूढस्त्वाह यथा हि विरुद्धलिङ्गादियोगाद् भिद्यते वस्तु तथा संज्ञाभेदादपि। तथाहि—संज्ञाभेदः प्रयोजनवशात् संकेतकर्तृभिर्विधीयते न व्यसनितया। अन्यथाऽनवस्था-प्रसक्तेः। ततो यावन्तो वस्तुनः स्वाभिधायकाः शब्दास्तावन्तोऽर्थभेदाः। नैकस्यार्थस्यानेकेनाभिधानं युक्तम्।...क्रियाशब्दत्वाद्वा सर्वशब्दानां सर्वेऽप्यन्वर्था एव वाचकाः।"

"एवंभूतः शब्दाभिधेयक्रियापरिणतिवेलायामेव तद्वस्तु इति भूत एवंभूतः प्राह—यथा संज्ञाभेदाद् भेदवद् वस्तु तथा क्रियाभेदादपि। सा च क्रिया तद्धेत्री यदैव तामाविशति तदैव तन्निमित्तं तत्तद्व्यपदेशमासादयति नान्त्यदेत्यतिप्रसङ्गात्। "तथाहि यदा घटते तदैवासौ घटः॥" *i. e.* एवंभूत goes even beyond समभिरूढ. While the latter insists upon recognising distinctions of things corresponding to distinctions of synonyms, एवंभूत would confine the word to the thing just while it performs the क्रिया which it connotes.

2. नय is thus characterised in the Râja-Vârtika: "प्रमाण-प्रकाशितोऽर्थविशेषप्ररूपको नयः" which is explained as follows: "प्रकर्षेण मानं प्रमाणं सकलादेश इत्यर्थः। तेन प्रकाशितानां न प्रमाणाभास-परिगृहीतानामित्यर्थः। तेषामर्थानामस्तित्वनास्तित्वनित्यत्वाद्यन्तात्मनां जीवादीनां ये विशेषाः पर्यायास्तेषां प्रकर्षेण रूपकः प्ररूपकः।" Its primary varieties are said to be 'द्रव्यास्तिक,' and 'पर्यायास्तिक', also called 'द्रव्यार्थिक' and 'पर्यायार्थिक' which practically convey the same meanings. The words are explained as follows: द्रव्यमस्तीति मतिरस्य द्रव्यभवनमेव नातोऽन्ये भावविकाराः नाप्यभावस्तद्व्यतिरेकेणानुपलब्धेरिति द्रव्यास्तिकः। पर्याय एवास्ति इति मतिरस्य जन्मादिभावविकारमात्रमेव भवनं न ततोऽन्यद् द्रव्यमस्ति तद्व्यतिरेकेणानुपलब्धेरिति पर्यायास्तिकः॥ अथवा द्रव्य-

मेवार्थोऽस्य न गुणकर्मणी तदवस्थारूपादिति द्रव्यार्थिकः । पर्याय एवार्थोऽस्य रूपाद्युत्क्षेपणादिलक्षणादिलक्षणो न ततोऽन्यद् द्रव्यमिति पर्यायार्थिकः । अथवा अर्यते गम्यते निष्पाद्यत इत्यर्थः । कार्यं द्रवति गच्छतीति द्रव्यं कारणम् । द्रव्यमेवार्थोऽस्य कारणमेव कार्यं नार्थान्तरं, न च कार्यकारणयोः कश्चिद्रूपभेदः तदुभयमेकाकारमेव पर्वाङ्गुलिद्रव्यवदिति द्रव्यार्थिकः । परि समन्ताद् आयः पर्यायः । पर्याय एवार्थः कार्यमस्य न द्रव्यमतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् स एवैकः कार्यकारणव्यपदेशभागिति पर्यायार्थिकः । अथवाऽर्थनमर्थः प्रयोजनं द्रव्यमेवार्थोऽस्य प्रत्ययाभिधानानुप्रवृत्तिलिङ्गदर्शनस्य निह्नोतुमशक्यत्वादिति द्रव्यार्थिकः । पर्यायोऽर्थः प्रयोजनमस्य वाग्विज्ञानव्यावृत्तिनिबन्धव्यवहारप्रसिद्धेरिति पर्यायार्थिकः ॥

Next the नयs are classified and defined as follows:

(1) अर्थसंकल्पमात्रग्राही नैगमः—which is explained thus: निगच्छन्त्यस्मिन्निति निगमनमात्रं वा निगमः, निगमे कुशलो भवो वा नैगमः तस्य लोके व्यापारः. निगम means that to which one goes, *i. e.* object aimed at, the idea of an object (अर्थसंकल्पमात्र) as distinguished from its accomplishment; the end, purpose, intention, objective. नैगमनय—is a statement with reference to the objective. It is illustrated thus: अर्थसंकल्पमात्रग्रहणं प्रस्थेन्द्रगृहगम्यादिषु—तद्यथा कंचित् प्रगृह्य परशुं पुरुषं गच्छन्तमभिसमीक्ष्याह किमर्थं गच्छति भवान् इति स तस्मै व्याचष्टे प्रस्थार्थमिति । तथा इन्द्रगृहादावपि । तथा कतरोऽत्र गमीत्युक्ते आचष्टे अहं गमीति संप्रत्यगच्छत्यपि गमीति व्यवहारः *e. g.* A man goes out, axe in hand, to fell a tree, take some wood out of it and make a प्रस्थ (a wooden measure for measuring grain). When asked 'why are you going?' he answers 'for a प्रस्थ.' Now here the immediate object of going is to cut a tree, but he says "for a प्रस्थ"—which is done with reference to the final purpose of going.

(2) स्वजात्यविरोधेनैकत्वोपनयात् समस्तग्रहणं संग्रहः—'संग्रह' is that in which many are *collected into one* without contradicting their own nature *e. g.* when one says सद्द्रव्यं घटः—the द्रव्यत्व (स्वजाति) of घट is not denied, but it is subsumed under the higher category of सत्; similarly, all the घटs whether made of gold or clay may be called by the class-name घट, which does not deny the individual natures of different घटs and yet brings

together all the घटs and calls them by a class-name, घट. (घट इति चोक्ते नामादिभेदान्मृत्सुवर्णादिकारणविशेषाद्वर्णसंस्थानादिविकाराच्च भिन्नानां घटशब्दवाच्यानां तदव्यतिरेकत्वेन संग्रहः ")

(3) अतो विधिपूर्वकमवहरणं व्यवहारः—When without denying the general (संग्रह) one specifies a particular, for that alone would serve his purpose, the नय is called व्यवहार. (वि=विधिपूर्वकम्+अवहरणम्)—taking out (अवहरणं) a part from the class, affirmatively (विधिपूर्वकम्) that is, without denying the truth of संग्रह. The necessity and scope of this नय are thus explained in detail: सर्वसंग्रहेण यत्संगृहीतं तच्चानपेक्षितविशेषं नालं संव्यवहारायेति व्यवहारनय आश्रीयते ।—यत् सत् तद् द्रव्यं गुणो वेति । द्रव्येणापि च संग्रहक्षिप्तेन जीवाजीवविशेषानपेक्षेण न शक्यः संव्यवहार इति । जीवद्रव्यमजीवद्रव्यमिति वा व्यवहार आश्रीयते । जीवाजीवावपि च संग्रहाक्षिप्तौ नालं संव्यवहारायेति प्रत्येकं देवनारकादिर्घटादिश्च व्यवहारेणाश्रीयते । कषायो भैषज्यमित्युक्ते च सामान्यस्य विशेषात्मकत्वान्नैयग्रोधादिविशेषसामर्थ्यं नहि शक्यः प्रभुणापि चक्रभृता सर्वः कषायसमाहारः कर्तुम् । नामस्थापनाद्रव्याणि च संग्रहोपात्तानि नालं व्यवहारायेति भाव एव गृह्यते । एवमयं नयस्तावद्वर्तते यावत् पुनर्नास्ति विभागः ।

This detail shows that व्यवहार is the opposite of संग्रह, and takes note of the particular instead of the general which is the viewpoint of संग्रह.

(4) सूत्रपातवदृजुसूत्रः—यथा ऋजुः सूत्रपातस्तथा ऋजु प्रगुणं सूत्रयति तन्त्रयति ऋजुसूत्रः । सर्वांस्त्रिकालविषयानतिशय्य वर्तमानविषयकालमादत्ते । ऋजुसूत्र *i. e.* the straight or direct point of view, which takes note of the present only, for this alone is directly the object of knowledge.

(5) (शब्दः) स च लिङ्गसंख्यासाधनादिव्यभिचारनिवृत्तिपरः—'शब्द' is the नय which insists upon accuracy of language. It tolerates no looseness of language in point of gender, number etc. if it conflicts with reality, not even if it be allowed by grammar. (See the examples given above.)

(6) नानार्थसमभिरोहणात् समभिरूढः—यतो नानार्थान् समतीत्यैकमर्थमाभिमुख्येन रूढस्ततः समभिरूढः । कुतः वस्त्वन्तरासंक्रमेण तन्निष्ठत्वात् ।...... एकस्यार्थस्यैकेन गतत्वात् पर्यायशब्दप्रयोगोऽनर्थकः शब्दभेदश्चेदस्ति अर्थ-

भेदेनाप्यवश्यं भवितव्यमिति । नानार्थसमभिरोहणात् समभिरूढः । इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात् पुरन्दर इत्येवं सर्वत्र ॥ अथवा यो यत्राभिरूढः स तत्र समेत्याभिमुख्येनारोहात् समभिरूढः ।

Synonyms connote differences of meaning, and so they should be employed with strict adherence to their connotation. This is the point of view of 'समभिरूढ'—*i. e.* the presentation of the connotation before the mental eye.

(7) येनात्मनाभूतस्तेनैवाध्यावसाययतीत्येवंभूतः। which is explained: येनात्मना येनाभिधेयेन भूतः शब्दस्तेनैवाध्यवसाययति । यथेन्द्रशब्दः परमेश्वरत्वाभिधेयः स परिणामो यत्र यदा वर्तते तत्र तदैव युक्तो न नामस्थापनाद्रव्येषु तत्परिणामाभावात् । इत्येवमितरेष्वपि शब्देषु स्वाभिधेयक्रियापरिणतिक्षण एव युक्तिर्नान्यदेति ॥ अथवा येनात्मना येन स्वरूपेण भूतोऽर्थस्तेनैवाध्यवसाययति यथा गच्छतीति गौरिति यदैव गच्छति तदैव गौरिति न स्थितो न शयित इति । पूर्वोत्तरकालयोस्तदर्थाभावात् दण्डिवत् ॥ अथवा येनात्मना येन ज्ञानेन भूतः परिणतस्तेनैवाध्यवसाययति यथेन्द्राग्निज्ञानपरिणत आत्मैवेन्द्रोऽग्निश्चेत्येवं भूतार्थप्रत्यायनाच्छब्द एवंभूतः तत्कार्यीत्ताच्छब्यसिद्धेः ॥

3. The author of the Tattvârtha–S'loka–Vârtika observes:

सामान्यादेशतस्तावदेक एव नयः स्थितः ।
स्याद्वादप्रविभक्तार्थविशेषव्यञ्जनात्मकः ॥ I. 33.

—In its most general form, नय is but one, and it consists of the presentation of a particular truth—which is part of the comprehensive truth which is expressed in स्याद्वाद. He next divides them into two main types: संक्षेपाद् द्वौ विशेषेण द्रव्यपर्यायगोचरौ ॥ *i. e.* द्रव्य and पर्याय (the latter including गुण)—of which the first comprises the three नैगम, संग्रह and व्यवहार, and the second the remaining four, ऋजुसूत्र, शब्द, समभिरूढ and एवंभूत. The term 'नय' is explained thus: नीयते गम्यते येन श्रुतार्थांशो नयो हि सः ।—*i. e.* that by which *part* of the truth is conveyed. The different नयs mentioned in the Tattva-Sûtra (I. 33) spring from the two primary नयs, द्रव्य० and पर्याय० (प्रमाणगोचरार्थांशा नीयन्ते यैरनेकधा । ते नया इति व्याख्याता जाता मूलनयद्वयात्). The author rejects the view of those who hold that there are four नयs, सामान्य० and विशेष being added to द्रव्य० and पर्याय. The ground for the rejection is that they are included in द्रव्य and

पर्याय. Next, 'नैगम' is defined तत्र संकल्पमात्रस्य ग्राहको नैगमो नयः and is explained in two ways: (1) संकल्पो निगमस्तत्र भवोऽयं तत्प्रयोजनः *e.g.* तथा प्रस्थादिसंकल्पः तदभिप्राय इष्यते, and (2) यद्वा नैकंगमो योऽत्र स सतां नैगमो मतः। It is distinct from संग्रह and व्यवहार; for these refer only to a part of नैगम—संग्रहे व्यवहारे च नान्तर्भावः समीक्ष्यते। नैगमस्य, तयोरेकवस्त्वंशप्रवणत्वतः। नैगम being thus shown to be indispensable, the total number of नयs is seven and not six as some have urged. Others, again, speak of nine नयs thus:—पर्यायनैगमः, द्रव्यनैगमः, द्रव्यपर्यायनैगमश्चेति। तत्र प्रथमस्त्रेधा अर्थपर्यायनैगमो व्यञ्जनपर्यायनैगमोऽर्थव्यञ्जनपर्यायनैगमश्चेति। द्वितीयो द्विधा। शुद्धद्रव्यनैगमः, अशुद्धद्रव्यनैगमश्चेति। तृतीयश्चतुर्धा शुद्धद्रव्यार्थपर्यायनैगमः, शुद्धद्रव्यव्यञ्जनपर्यायनैगमः, अशुद्धद्रव्यार्थपर्यायनैगमः, अशुद्धद्रव्यव्यञ्जनपर्यायनैगमश्चेति नवधा नैगमः। संग्रहादयस्तु वक्ष्यमाणा षडिति पञ्चदश नयाः समासतः प्रतिपत्तव्याः।

Next coming to संग्रह, the term is thus defined and explained

एकत्वेन विशेषाणां ग्रहणं संग्रहो नयः।
सजातेरविरोधेन दृष्टेष्टाभ्यां कथंचन ॥
समेकीभावसम्यक्त्वे वर्तमानो हि गृह्यते।

Next is व्यवहार, which is defined and explained as in the Râjavârtika:—

संग्रहेण गृहीतानामर्थानां विधिपूर्वकः।
योऽवहारो विभागः स्याद्व्यवहारो नयः स्मृतः।

Next ऋजुसूत्र—

"ऋजुसूत्रं क्षणध्वंसि वस्तु सत् सूत्रयेदृजु।
प्राधान्येन गुणीभावाद् द्रव्यस्यानर्पणात् सतः।

Next शब्दनय—

"कालादिभेदतोऽर्थस्य भेदं यः प्रतिपादयेत्।
सोऽत्र शब्दनयः शब्दप्रधानत्वादुदाहृतः ॥"

Lastly, समभिरूढ—

"पर्यायशब्दभेदेन भिन्नार्थस्याधिरोहणात्।"

नयः समभिरूढः स्यात्। *e. g.* इन्द्रः पुरन्दरः शक्र इत्याद्या भिन्नगोचराः। शब्दा विभिन्नशब्दत्वाद्वाजिवारणशब्दवत्—*i. e.* synonyms are really words with different meanings.

In conclusion, the division of नयs into शब्दनयs and अर्थनयs and their comparative extents are thus stated in the T. S'l. Vârtika:

तत्रर्जुसूत्रपर्यन्ताश्चत्वारोऽर्थनयाः स्मृताः ।
त्रयः शब्दनयाः शेषाः शब्दवाच्यार्थगोचराः ॥
पूर्वपूर्वनयो भूमविषयः कारणात्मकः ।
परः परः पुनः सूक्ष्मगोचरो हेतुमानिह ॥
सन्मात्रविषयत्वेन संग्रहस्य न युज्यते ।
महाविषयताभावाभावार्थान्नैगमान्नयात् ॥
यथा हि सति संकल्पस्तथैवासति वेद्यते ।
तत्र प्रवर्तमानस्य नैगमस्य महार्थता ॥
संग्रहाद्व्यवहारोऽपि सद्विशेषावबोधकः ।
न भूमविषयो शेषसत्समूहोपदर्शितः ॥
नर्जुसूत्रप्रभूतार्थो वर्तमानार्थगोचरः ।
कालत्रितयवृत्त्यर्थगोचराद्व्यवहारतः ॥
कालादिभेदतोऽप्यर्थमभिन्नमुपगच्छतः ।
नर्जुसूत्रान्महार्थोऽत्र शब्दस्तद्विपरीतवत् ॥
शब्दात् पर्यायभेदेनाभिन्नमर्थमभीप्सितः ।
न स्यात् समभिरूढोऽपि महार्थस्तद्विपर्ययः ॥
क्रियाभेदेऽपि चाभिन्नमर्थमभ्युपगच्छतः ।
नैवंभूतः प्रभूतार्थो नयः समभिरूढतः ॥

The Tattva S'l. Vârtika applies the principle of सप्तभङ्गी to the नयs—which is detailed in the commentary as follows:

इह तावन्नैगमस्य संग्रहादिभिः सह षड्भिः प्रत्येकं षट् सप्तभङ्ग्यः संग्रहस्य व्यवहारादिभिः सह वचनात्। पंच व्यवहारस्य । ऋजुसूत्रादिभिश्चतस्रः; ऋजुसूत्रस्य शब्दादिभिस्तिस्रः, शब्दस्य समभिरूढादिभ्यां द्वे, समभिरूढस्यैवंभूतेनैका, इत्येकविंशतिमूलनयसप्तभङ्ग्यः ।

4. Siddharṣi's commentary on the Nyâyâvatâra of Siddhasena Divâkara deals with the subject of नयs in full detail, and like the commentary on the Saṁmatitarka, it shows how the different systems of Brâhmaṇa and Bauddha philosophy represent particular नयs or partial viewpoints only, that is to say, they are नयs and not प्रमाण. See—

अनेकात्मकं वस्तु गोचरः सर्वसंविदाम् ।
एकदेशविशिष्टोऽर्थः नयस्य विषयो मतः ॥

Nyâyâvatâra, 29.

...एतेनास्य हेतोः कापिला अप्यसिद्धतादिदोषमभिधित्सवो मौक्यमानीताः ....॥ तथा सुगतमतानुसारिणामपि मध्ये सौत्रान्तिकस्तावदस्य हेतोरसिद्धतामाविर्भावयितुं नोत्सहते, तदभ्युपगतिव्यतिरेकेण निजदर्शनव्यवस्थानुपपत्तेः.........॥

तथोररीकृतयोगाचारमतमपि बलादनेकान्तप्रकाशरज्जुरावेष्टयति एकस्यापि ज्ञानस्यानेकवेद्यवेदकाकारतया प्रथनोपगतेः।.........॥

शून्यवादिनः समस्ताभावादसिद्धोऽनेकान्तप्रकाश इति चेन्न, तस्यापि प्रमाणप्रमेयाभावेन सर्वाभाववेदनं समस्ति, अन्यथाऽप्रमाणकं सर्वं सर्वत्र विद्यते इति परस्यापि वदतो न वदनभङ्गः स्यात्, तदभ्युपगमेऽभ्युपगमक्षतिः।...........

नयस्तर्हि किंभूतं मन्यते इति वचनावकाशे सत्याह एक इत्यादि। अनन्तधर्माध्यासितं वस्तु स्वाभिप्रेतैकधर्मविशिष्टं नयति प्रापयति संवेदनमारोहयतीति नयः प्रमाणप्रवृत्तेरुत्तरकालभावी परामर्श इत्यर्थः। तस्य विषयो गोचरोऽभिमतः अभिप्रेतैकदेशेनानित्यत्वादिधर्मलक्षणेन विशिष्टः पररूपेभ्यो व्यवच्छिन्न इत्यर्थः॥...

ननु चादिवाक्यतः प्रमाणव्युत्पादनमात्रं प्रतिज्ञातं तत् किमयमप्रस्तुतोऽत्र नयगोचरः प्रतिपाद्यत इति।

न नयः प्रमाणादत्यन्तं दूरयायी; किं तर्हि? तदंशभूत एव; नयसमुदायसंपाद्यत्वात् प्रमाणस्य, अतस्तद्व्युत्पादनप्रतिज्ञातेऽसावपि तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति न्यायाद् गृहीत एव तन्नायमप्रस्तुत इति तत्र प्रमाणप्रतिपन्नार्थैकदेशपरामर्शो नय इति लक्षणम्। सर्वनयविशेषानुयायित्वात् पररूपव्यावर्तनक्षमत्वाच्चास्य। संख्यया पुनरनन्ता इति। अनन्तधर्मत्वाद्वस्तुनः, तदेकदेशधर्मपर्यायावसिताभिप्रायाणां च नयत्वात्। तथापि चिरंतनाचार्यैः सर्वसंग्राहिसत्ताभिप्रायपरिकल्पनाद्वारेण सप्त नयाः प्रतिपादिताः। तद्यथा—नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नया इति। अतोऽस्माभिरपि त एव वर्ण्यन्ते। कथमेते सर्वाभिप्रायसंग्राहका इति चेत् उच्यते। अभिप्रायस्तावदर्थद्वारेण शब्दद्वारेण वा प्रवर्तेत, गत्यन्तराभावात्। अर्थश्च सामान्यरूपो विशेषरूपो वा। शब्दोऽपि रूढितो व्युत्पत्तितश्च। व्युत्पत्तिरपि सामान्यनिमित्तप्रयुक्ता तत्कालभाविनिमित्तप्रयुक्ता वा स्यात्। तत्र ये केचनार्थनिरूपणप्रवणाः प्रमात्रभिप्रायास्ते सर्वेऽप्याद्ये नयचतुष्टयेऽन्तर्भवन्ति। तत्रापि ये परस्परविशकलितौ सामान्यविशेषाविच्छन्ति तत्समुदायरूपो नैगमः। ये पुनः केवलं सामान्यं वाञ्छन्ति तत्समूहसंपाद्यः संग्रहः। ये पुनरनपेक्षितशास्त्रीयसामान्यविशेषं लोकव्यवहारमवतरन्तं

घटादिकं पदार्थमभिप्रेयन्ति तन्निचयजन्यो व्यवहारः। ये सौगतास्तु क्षणक्षयिणः परमाणुलक्षणा विशेषाः सत्या इति मन्यन्ते तत्संघातघटित ऋजुसूत्र इति। तथा ये मीमांसकाः रूढितः शब्दानां प्रवृत्तिं वाञ्छन्ति तन्निवहसाध्यः शब्द इति। ये तु व्युत्पत्तितो ध्वनीनां प्रवृत्तिं वाञ्छन्ति नान्यथा, तद्द्वारजन्यः समभिरूढ इति। ये तु वर्तमानकालभाविव्युत्पत्तिनिमित्तमाधिकृत्य शब्दाः प्रवर्तन्ते नान्यथेति मन्यन्ते तत्संघटितः खल्वेवंभूत इति। तदेवं न स कश्चन विकल्पोऽस्ति वस्तुगोचरो योऽत्र नयसप्तके नान्तर्यातीति सर्वाभिप्रायसंग्राहका एते इति स्थितम् ॥

Since the different systems of Bauddha and Brâhmaṇa philosophy arise, as shown above, from the fact that their teachers have failed to see things whole, it follows that their teachings are not प्रमाण. If so, a question arises: Why has the subject of partial viewpoints—called नय—been discussed here, in connection with प्रमाण? The answer given is: Because नय, though wrong (अप्रमाण) as statements of whole truth, do deal with part truth, (प्रमाणप्रतिपन्नार्थैकदेशपरामर्शो नयः), and so come to be considered in the chapter on प्रमाण. Siddharṣi next proceeds to show how all 'अभिप्राय's or truths which the different systems purport to convey are embraced in the classification of नय which is here given. Thus, अभिप्राय-स्तावदर्थद्वारेण शब्दद्वारेण प्रवर्तेत। Next, अर्थश्च सामान्यरूपो विशेषरूपो वा। P. N. T. [These—सामान्य and विशेष—again may be taken as independent of each other (विशकलितौ—severed, distinct,) or only one of them may be recognised and the other overlooked, or only the popular view—as distingnished from the logical view—of सामान्य and विशेष—may be accepted.] Similarly, शब्दोऽपि रूढितो व्युत्पत्तितश्च। व्युत्पत्ति, again, may be सामान्यनिमित्त-प्रयुक्ता or तत्कालभाविनिमित्तप्रयुक्ता. Thus will arise the different नयs.

5. भवन्ति नैगमादयः—उक्तं च "नैगमसंग्रहव्यवहारऋजुसूत्रशब्दसमभिरूढैवंभूता नयाः"। एते च द्रव्यास्तिकपर्यायास्तिकलक्षणे नयद्वयेऽन्तर्भाव्यन्ते। द्रव्यमेव परमार्थतोऽस्ति न पर्याया इत्यभ्युपगमपरो द्रव्यास्तिकः। पर्याया एव वस्तुतः सन्ति न द्रव्यमित्यभ्युपगमपरः पर्यायास्तिकः। तत्राद्यास्त्रयो द्रव्यास्तिकाः, शेषास्तु पर्यायास्तिकाः। पुनर्द्रव्यास्तिकोऽपि सामान्यतो द्विविधो विशुद्धोऽविशुद्धश्च। तत्र नैगमव्यवहाररूपोऽविशुद्धः संग्रहरूपस्तु विशुद्धः। कथम्?। यतो नैगम-व्यवहारावनन्तपरमाण्वनन्तद्व्यणुकाद्यनेकव्यक्त्यात्मकं कृष्णाद्यनेकगुणाधारं त्रिकाल-

विषयं वाऽविशुद्धं द्रव्यमिच्छतः। संग्रहश्च परमाण्वादिकं परमाण्वादिसाम्यादेकं तिरोभूतगुणकलापमविद्यमानपूर्वापरविभागं नित्यं सामान्यमेव द्रव्यमिच्छति। एतच्च किलानेकताद्यभ्युपगमकलङ्केनाकलङ्कितत्वाच्छुद्धम्। ततः शुद्धद्रव्याभ्युपगमपरत्वादयमेव शुद्धः ॥—अनुयोगमलधारीया. Com. on अनुयोग. This illustrates the नयs in their relation to the problem of the nature of substance and forms or modes.

6. "निलयनप्रस्थके"त्यादि—तत्र निलयनं वसनमित्यनर्थान्तरम्। तद्दृष्टान्तो यथा—कश्चित् केनचित् पृष्टः क्व वसति भवान्? स प्राह—लोके। तत्रापि जम्बूद्वीपे, तत्रापि भरतक्षेत्रे, तत्रापि मध्यमखण्डे, तत्राप्येकस्मिन् जनपदे नगरे गृहे इत्यादीन् सर्वानपि विकल्पान् नैगम इच्छति ॥ प्रस्थको धान्यमानविशेषः तद्दृष्टान्तो यथा—सद्योग्यं काष्ठं वृक्षावस्थायामपि तदनुकीर्तिकं स्कन्धे कृतं गृहमानीतमित्यादि सर्वास्वप्यवस्थासु नैगमः प्रस्थकमिच्छति। ग्रामोदाहरणं यथा—विवक्षितग्रामवास्तव्यप्रधानकतिपयपुरुषदर्शनेऽपि ग्रामोऽत्रावितीच्छति नैगमः ॥ "भमराइ गाहा"। इह भ्रमरकोकिलादिः कृष्णतयोपलभ्यमानोऽपि निश्चयमतेन पञ्चवर्णः, शेषवर्णचतुष्टयं हि न्यग्भूतत्वात्तत्र न दृश्यते न पुनर्नास्तीति प्रतिपद्यतेऽसौ। तथा प्रज्ञप्तिः—"भमरेणं भंते! कइवण्णे कइगंधे कइरसे कइफासे? गौतमा—इत्थं दो नया कज्जंति। तं जहा—निच्छनए य वावहारियनए अ। वावहारिअनयस्स कालए भमरे, निच्छनयस्स पंचवण्णे दुगंधे पंचरसे अट्ठफासे" इत्यादि। एवं नीललोहितपीतशुक्लतया व्यवहारतोऽवगतेष्वपि वस्तुषु निश्चयतः पञ्चवर्णताऽवगन्तव्या। तदेवं भ्रमरादौ निश्चयनयमतेन पञ्चवर्णे निश्चिते सति व्यवहारस्य को निश्चयार्थ इत्याह—"सो विणिच्छयत्थोत्ति" स विनिश्चयार्थ इति ज्ञेयः।......। यस्मिन् वा कस्मिंश्चिदर्थे जनपदस्य गोपालाङ्गनादिरूपस्य नामस्थापनाद्रव्यभावानामन्यतररूपेण वा निश्चयः समुत्पद्यते स विनिश्चयार्थः।......। अन्येषु सत्स्वपि बहुष्वशेषगोपालाङ्गनादिजनपदस्योद्भूतशक्तितया यो ग्राह्योंऽशः स विनिश्चयार्थः। तदर्थं व्रजति व्यवहार इति गाथार्थः। यस्मिन्नेवांशे जनपदस्य निश्चयो भवति किमित्यसौ तमेव गमयति सतोऽपि शेषांशान् मुञ्चतीत्याह—'बहुतर उत्ति य' इत्यादि। स एव बहुतरांशो यत्र जनपदस्य निश्चय उत्पद्यत इति तमेवांशं गमयति व्यवहारपथमवतारयति। येषु त्वंशेषु लोकस्य निश्चयो न भवति तान् सतोऽपि मुञ्चति व्यवहारो नयः किं कुर्वन्?। लोकं लोकव्यवहारमिच्छन्। कया?। संव्यवहारपरतया, संव्यवहारस्वरूपत्वादेव तस्येति गाथार्थः। "प्रति प्रति वोत्पन्नमिति"। एकैकं स्वामिनमाश्रित्योत्पन्नम्। एतदेवाह। "भिन्नव्यक्ती"त्यादि। भिन्ना व्यक्तयः स्वामिन्यो यस्य तत्तथाभूतम्। ऋजुसूत्रो हि वर्तमानक्षणभाव्येव वस्त्विच्छति तदपि भिन्नव्यक्तिस्वामिकम्। तन्मतेन हि यद्देवदत्तस्य वित्तं तद् यज्ञदत्तस्याविक्तमेव तदपेक्षया वित्तकार्याकारणाद् यज्ञदत्तस्यापि यद्वित्तं तद्देवदत्तस्याप्यवित्तमेव तत एव हेतोः। तस्माद् द्वयोरपि वित्तयोभिन्नस्वाम्यपेक्षयैव वित्तत्वमिति भिन्नव्यक्तिस्वामिता। "ऋजुसूत्रः ऋजुश्रुतो वेति"। शब्दद्वयस्य यथाक्रमं व्युत्पत्तिमाह—"तत्र ऋजुवर्तमान" मित्यादि ॥ "नामस्थापनाद्रव्यविरहेण समानलिङ्गवचनेत्यादि" लिङ्गं च

वचनं च लिङ्गवचने येषां ते च ते पर्यायध्वनयश्च-इन्द्रः शक्रः पुरन्दर इत्यादयस्तद्वाच्यत्वेन च। तदनेनातिक्रान्तवक्ष्यमाणनयद्वयाद्भिन्नताऽस्य सूचिता। अतिक्रान्तनयो हि नामादिचतुर्विधमपि भिन्नलिङ्गवचनपर्यायध्वनिवाच्यमेव वस्त्विच्छति, अयं तु भावरूपमेव समानलिङ्गवचनपर्यायध्वनिवाच्यमेव च तदिच्छतीत्यनयोर्भेदः। वक्ष्यमाणस्त्वेकस्मिन् वस्तुन्येक एव ध्वनिः प्रवर्तते न समानलिङ्गवचना अपि बहव इत्यभिमंस्यते। अतो नयादप्यस्य भिन्नता। एवमन्येष्वपि नयेषु विशेषणानि यथासंभवपूर्वोत्तरनयाभिन्नता सूचकात्वेन द्रष्टव्यानि। "तस्यार्थपरिगहादि"त्यादि तस्य प्राधान्येनाङ्गीकृतशब्दस्य वाच्यत्वेन संबन्धी योऽर्थो घटादिलक्षणस्तं परिगृह्णाति नयो ज्ञानविशेष इत्युपचारात् सोऽपि ज्ञानस्वरूपो नयः शब्द इत्युच्यते। "न च भिन्नेत्यादि" ननु भिन्नवचनत्वादेकत्वाभावे कुटवृक्षवदित्युदाहरणमसंगतम् कुटश्च वृक्षश्च कुटवृक्षौ ताविव कुटवृक्षवदिति। न ह्यत्र क्वचिद्वचनभेदोऽस्ति। सत्यम्। स्यादेतद् यद्येकवचनान्तपदद्वयस्यात्र समासोऽभिप्रेतः स्यात्। किंतु कुटश्च वृक्षौ चेति समस्य वतिः क्रियते इत्यस्ति वचनभेदः। ननु भवत्वेवं तथाप्ययुक्तमिदमुदाहरणम्। न ह्यत्र वचनाभेदेऽपि कुटवृक्षशब्दयोः पर्यायता युज्यते। भिन्नजातीयवस्तुवाचकत्वात्। तथाहि—कुटशब्देन घट उच्यते वृक्षशब्देन तु शाखादिमान् पदार्थः तत्कुतो वचनाभेदेऽप्यनयोः पर्यायशब्दता?। नैवम्। भिन्नजातीयवस्तुवाचित्वादित्यस्यासिद्धत्वात्। यतः कौ पृथिव्यामटतीति व्युत्पत्तेः कुटशब्देन वृक्ष एवात्र विवक्षित इत्यनयोः पर्यायशब्दता। क्वचित्तु कूटवृक्षवदिति पाठस्तत्रनिर्विवादं कूटशब्देन वृक्ष एवाभिधीयत इति। अस्माकं तावदयं संप्रदायः, सुधिया त्वन्यथापि भाव्यमिति॥ "न स्थानभरणक्रियामि"ति—स्थानस्थस्यैव भरणक्रिया स्थानभरणक्रिया तां न विशेषयतीत्यर्थः। यदा स्थानस्थित एव जलादिना भ्रियते तदा घटो न भवति किंतु योषिन्मस्तकारूढो जलाहरणचेष्टां कुर्वन्नेवेति भावार्थः॥ समाप्ता नयाः॥

—आवश्यक-हारिभद्रटिप्पणे नयाधिकारः

The importance of this long extract lies in the fact that the doctrine of नय is traceable to the Sûtras or Âgama. In the first few lines the illustrations of नैगमनय referred to in the Sûtras (see our Text p. 162–168 St. XXVIII) are explained in detail. These are old and obscure, but the commentator does his best to explain them. Next a very important point is introduced viz. the distniction between 'निश्चयनय' and 'व्यवहारनयः' that is the scientific view and the popular view. This corresponds to the distinction drawn in Vedânta betwen the points of view of परमार्थ and व्यवहार—which has also its parellel in Buddhism. A very interesting point, which is supported by an extract from the Prajñapati (one of the Âgamas), is

the strange doctrine that as a matter of absolute or scientific truth every object—*e. g.* even a black bee—possesses all the five colours but only one of them is patent—the black in the case of the bee—while the rest are latent. A simlar doctrine regarding the constitution of matter is held by Ramânujâcârya who says that when a piece of mother-of-pearl is mistaken for silver, it is because the silver is in the mother-of-pearl; and so is even a serpent in a rope!

7. नत्थि नयेहिं विहूणं सुत्तं अत्थोय जिणमए किंचि।
आसज्ज उ सोयारं नयेणय विसारओ बूया ॥
[=नास्ति नयैर्विहीनं सूत्रमर्थश्च जिनमते किंचित्।
आसाद्य तु श्रोतारं नयेन च विशारदो ब्रूयात् ॥]

इति वचनाज्जिनमते सर्वेऽपि पदार्था नयैर्विचारणीयाः। इत्यतो द्रव्यमङ्गलमपि नयैर्विचारयन्नाह—

एगो मङ्गलमेगं णेगा णेगाइं णेगमनयस्स।
संगहनयस्स एक्कं सव्वं चिय मंगलं लोए ॥
[=एको मङ्गलमेकमनेकेऽनेकानि नैगमनयस्य।
संग्रहनयस्यैकं सर्वमेव मङ्गलं लोके ॥]

वक्ष्यमाणशब्दार्थस्य नैगमनयस्य मतेनैकोऽनुपयुक्तो मङ्गलशब्दार्थप्ररूपक एकं द्रव्यमङ्गलम्। अनेके त्वनुपयुक्तास्तत्प्ररूपका अनेकानि द्रव्यमङ्गलानि। अयं हि नयः सामान्यं विशेषांश्चाभ्युपगच्छत्येव। तत्र विशेषवादिस्वपक्षे एकोऽनुपयुक्त एकं द्रव्यमङ्गलम् अनेके त्वनुपयुक्ता अनेकानि द्रव्यमङ्गलानीत्युपपद्यत एव, विशेषाणां पृथग् भिन्नत्वादिति। संग्रहनयस्य तु वक्ष्यमाणस्वरूपस्य केवलसामान्यवादिनो मतेन सर्वस्मिन्नपि लोके एकमेव द्रव्यमङ्गलम्। सर्वेषां द्रव्यमङ्गलत्वप्राप्तेः सामान्यस्य च त्रिभुवनेऽप्येकत्वात्। इति गाथार्थः ॥

एक्कं निच्चं निरवयवमक्कियं सव्वगं च सामन्नम्।
निस्सामन्नत्ताओ नत्थि विसेसो खपुप्फं व ॥
[=एकं नित्यं निरवयवमक्रियं सर्वगं च सामान्यम्।
निःसामान्यत्वान्नास्ति विशेषः खपुष्पमिव ॥]

एकमद्वितीयत्वादेकसंख्योपेतं सामान्यम्। एकमपि क्षणिकं स्यात्। तत्राह—नित्यमनपायि। नित्यमप्याकाशवत् सावयवं स्यात्, तन्निरवयवत्वे सवितुरुदयास्तमनायोगात्। इत्यत्राह—निरवयवमनंशम्। पूर्वापरकोटिशून्यत्वादिति। निरवयवमपि परमाणुवत् सक्रियं स्यात्। अत आह—अक्रियं क्रियारहितं परिस्पन्दविनिर्मुक्तत्वादिति। अक्रियमपि दिगादिवत् सर्वगतं न स्यात्। अत्राह—सर्वगं च सकललोकाऽवाप्तसत्ताकम्। इदमित्थंभूतं सामान्यमेवाऽस्ति, न तु विशेषः कश्चनाऽपि विद्यते। कुत इत्याह—निःसामान्यत्वात् सामान्यविरहितत्वात्, खपुष्पवत्, यच्चास्ति

तत् सामान्यविरहितं न भवति यथा घटः। तस्मादेकस्माद् द्रव्यमङ्गलसामान्या-दव्यतिरिक्तत्वाद् तद्व्यतिरेके चाद्रव्यमङ्गलताप्रसङ्गात् सामान्यस्य च त्रिभुवनेऽप्येकत्वादेकमेव संग्रहनयमते द्रव्यमङ्गलम् इति स्थितम् ॥ इति गाथार्थः ॥

अत्र विशेषवादिनयमतस्थितः कश्चिदाह--ननु कथमनेकानि द्रव्यमङ्गलानि न संभवन्ति यथा हि वनस्पतिरित्युक्ते वृक्ष-गुल्म-लता-वीरुदादयो विशेषा एव प्रतीयन्ते न पुनस्तदतिरिक्तः कश्चिद् वनस्पति एवमिहापि द्रव्यमङ्गलमित्युक्तेऽनुपयुक्ततत्प्ररूपकलक्षणा विशेषा एवावगम्यन्ते न तु तदधिकं किंचित् सामान्यम् अतः किं शून्य इवास्मिन् जगत्येवमभिधीयते--'निस्सामन्नत्ताओ नत्थि विसेसो खपुष्फं व' इति. इति विशेषवादिना प्रोक्ते सामान्यवादी संग्रहः प्राह--ननु यत एव वनस्पतित्युरिक्ते वृक्षादयः प्रतीयन्ते अत एव ते तदनर्थान्तरभूताः हस्तस्येवाङ्गुलयः इह यस्मिन्नुच्यमाने यत् प्रतीयते तत् ततो व्यतिरिक्तं न भवति यथा हस्त इत्युक्तेऽङ्गुल्यादयः प्रतीयमाना हस्ताद् न व्यतिरिक्ताः प्रतीयन्ते च वनस्पतिरित्युक्ते वृक्षादयः इत्यमी न वनस्पतिव्यतिरिक्ताः ततो न सामान्यदतिरिक्तः कोऽपि विशेषः समस्ति। इत्येकमेव सर्वत्र द्रव्यमङ्गलमिति। अथोपपत्त्यन्तरेणाऽपि सामान्यवाद्येव वृक्षादीनां सर्वेषामपि वनस्पतिसामान्यरूपतां समर्थयन्नाह--

चूओ वणस्सइच्चिय मूलाइगुणो त्ति तस्समूहो व्व।
गुम्मादओ वि एवं सव्वे न वणस्सइविसिट्ठे ॥
[=चूतो वनस्पतिरेव मूलादिगुण इति तत्समूह इव।
गुल्मादयोऽप्येवं सर्वे न वनस्पतिविशिष्टाः ॥]

'चूतः' आम्रो वनस्पतिरेव वनस्पतिसामान्यं न व्यभिचरतीत्यर्थः इति प्रतिज्ञा। मूल-कन्द-स्कन्ध-त्वक्-शाखा-प्रवाल-पत्र-पुष्प-बीजादिगुणत्वादिति हेतुः चूतसमूहवदिति दृष्टान्तः इह यो यो मूलादिगुणः स स वनस्पतिसामान्यरूप एव यथा चूतसमूहः, मूलादिगुणश्च चूतः तस्माद् वनस्पतिसामान्यरूप एव। गुल्मादयोऽप्येवं वाच्याः। तथाहि--विशेषवादिना विशेषतयाऽभ्युपगम्यमानो गुल्मोऽपि वनस्पतिसामान्यरूप एव मूलादिगुणत्वात् गुल्मसमूहवत् इति। एवमन्येषामपि लतादिविशेषाणां वनस्पतिसामान्यादव्यतिरिक्तत्वं साधनीयम्। तद्व्यतिरेके सर्वत्र मृण्मयत्वादिप्रसङ्गो बाधकं प्रमाणम्। तस्मात् सामान्यमेवास्ति न विशेषाः ॥ इति गाथार्थः ॥

किं च—

सामान्नाउ विसेसो अन्नोऽणन्नो व होज्ज जइ अण्णो।
सो नत्थि खपुप्फं पिवऽणण्णो सामान्नमेव तयं ॥
[=सामान्याद् विशेषोऽन्योऽनन्यो वा भवेत् यद्यन्यः।
स नास्ति खपुष्पमिव, अनन्यः सामान्यमेव तत् ॥]

भो विशेषवादिन्! सामान्याद् विशेषोऽन्यो वा स्यात् अनन्यो वा इति विकल्पद्वयम्। यद्याद्यो विकल्पः तर्हि नास्त्येव विशेषः निःसामान्यत्वात् खपुष्पवत्—इह यद् यत् सामान्यविनिर्मुक्तं तत् तद् नास्ति यथा गगनारविन्दम्

सामान्यविरहितश्च विशेषवादिना विशेषोऽभ्युपगम्यते तस्माद् नास्त्येवायमिति। अथानन्य इति द्वितीयः पक्षः कक्षीक्रियते हन्त तर्हि सामान्यमेवाऽसौ तदनन्यत्वात् सामान्यात्मवत् यद् यस्मादनन्यत् तत् तदेव यथा सामान्यस्यैवात्मा अनन्यश्च सामान्याद् विशेषः इति सामान्यमेवायमिति। यदि चातिपक्षपातितया सामान्येऽपि विशेषोपचारः क्रियते तर्हि न काचित् क्वचित् क्षतिः न ह्युपचारेणोच्यमानो भेदस्तात्त्विकमेकत्वं बाधितुमलम्, तस्मात् सामान्यमेवास्ति न विशेषः। इति संग्रहनयमतेन सर्वत्रैकमेव द्रव्यमङ्गलम्॥ इति गाथार्थः॥

तदेवं संग्रहेण स्वाभिमते सामान्ये प्रतिष्ठिते विशेषवादिनौ नैगमव्यवहारावाहतुः-

न विसेसत्थंतरभूअमत्थि सामण्णमाह ववहारो।
उवलंभववहाराभावाओ खरविसाणं व॥
[=न विशेषार्थान्तरभूतमस्ति सामान्यमाह व्यवहारः।
उपलम्भव्यवहाराभावात् खरविषाणमिव॥]

ननु भोः सामान्यवादिन् भवताऽपि वनस्पतिसामान्यं बकुलाशोक-चम्पक-नाग-पुन्नागा-म्र-सर्जार्जुनादिविशेषेभ्योऽर्थान्तरं वाऽभ्युपगम्येत अनर्थान्तरं वा। यद्यर्थान्तरं तर्हि नास्त्येव तद् विशेषव्यतिरेकेण उपलब्धिलक्षणप्राप्तस्य तस्योपलम्भव्यवहाराभावात् खरविषाणवत्। क एवमाह व्यवहारानयः उपलक्षणत्वाद् विशेषवादी नैगमश्च। एतौ हि लोकव्यवहारानुयायिनौ तद्व्यवहारश्च प्रायो विशेषनिष्ठ एव इति विशेषानेव समर्थयत इति भावः। अथानुपलब्धिलक्षणप्राप्तं तदभ्युपगम्यते तथाऽपि नास्ति विशेषेभ्यः सर्वथाऽन्यत्वात् गगनकुसुमवदिति। अथ विशेषेभ्योऽनर्थान्तरं तदिति द्वितीयपक्षः तर्हि विशेषा एव तत् तेभ्योऽनर्थान्तरभूतत्वात् विशेषाणामात्मस्वरूपवदिति। यदि च विशेषेष्वपि सामान्योपचारः क्रियते तर्हि न काचित् क्षतिः न ह्यौपचारिकमेकत्वं तात्त्विकमनेकत्वं बाधते॥ इति गाथार्थः॥

एतदेव समर्थयते

चूयाईएहिंतो को सो अण्णो वणस्सई नाम।
नत्थि विसेसत्थंतरभावाओ सो खपुप्फं व॥
[चूतादिभ्यः कः सोऽन्यो वनस्पतिर्नाम।
नास्ति विशेषार्थान्तरभावात् स खपुष्पमिव॥]

चूतादिभ्यो विशेषेभ्योऽन्यः को नाम वनस्पतिः यो व्रण-पिण्डी-पादलेपादिके लोकव्यवहारे उपयुज्येत न कोऽपीत्यर्थः। तस्मात् समस्तलोकसंव्यवहारानुपयोगित्वाद् नास्ति सामान्यम् खपुष्पवत् इति पूर्वोक्तमेवार्थं निगमनद्वारेणाह—'नत्थीत्यादि' तस्माद् नास्त्यसौ सामान्यवादिनाऽभ्युपगम्यमानो वनस्पतिः सद्रूपेभ्यो हि विशेषेभ्योऽर्थान्तरभावात् खपुष्पवत्। सद्रूपेभ्यो हि विशेषेभ्योऽर्थान्तरं भवत् असद्रूपमेव भवति तथाभूतं च नास्त्येव खपुष्पवत्॥ इति गाथार्थः॥

किं पुनः कारणं येन नैगमव्यवहारौ विशेषान् समर्थयतः इत्याह—

जं नेगमववहारा लोअव्ववहारतप्परा सो य।
पाएण विसेसमओ तो ते तग्गाहिणो दो वि ॥
[=यद् नैगमव्यवहारौ लोकव्यवहारतत्परौ स च।
प्रायेण विशेषमयस्तस्मात् तौ तद्ग्राहिणौ द्वावपि ॥]

यद् यस्माद् नैगमव्यवहारौ लोकव्यवहारतत्परौ स च लोकव्यवहारस्त्यागादानादिकः प्रायेण विशेषमयो विशेषनिष्ठ एव दृश्यते सामान्यस्य व्रणपिण्ड्यादौ लोकेऽनुपयोगात्। 'वनं' 'सेना' इत्यादौ क्वचित् कश्चित् कथंचित् सामान्यस्यापि दृश्यते उपयोगः, इति प्रायोग्रहणम्। यत एवं तस्मात् तौ नैगमव्यवहारौ द्वावपि तद्ग्राहिणौ विशेषाभ्युपगमपरौ ॥ इति गाथार्थः ॥

—विशेषावश्यक Commentary.

8. सिद्धसेनीयाः पुनः षडेव नयानभ्युपगतवन्तः। नैगमस्य संग्रहव्यवहारयोरन्तर्भावविवक्षणात्। तथाहि—यदा नैगमः सामान्यप्रतिपत्तिपरस्तदा स संग्रहेऽन्तर्भवति सामान्याभ्युपगमपरत्वात्। विशेषाभ्युपगमनिष्ठस्तु व्यवहारे। आह च सिद्धसेनीयमतमुपसंजिघृक्षुर्भाष्यकृत्—"जो सामन्नग्गाही स नेगमो संगहं गओ अहवा इयरो ववहारमिओ जो तेण समाणनिद्देसो।" ततः सिद्धसेनीयाभिप्रायेण षड्भिरेव नयैरागमतो द्रव्यमङ्गलविचारः कर्तव्यः न सप्तभिरिति ॥—Com. on विशेषावश्यक सूत्र.

9. Malliṣeṇa's Commentary contains a reproduction of the following Sûtras of Pramâṇanaya-tattvālokālaṁkāra—

स्पष्टं प्रत्यक्षम्। अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वम् (ii. 2,3)। तद्द्विप्रकारम्—सांव्यवहारिकं पारमार्थिकं च (ii. 4)। संव्यवहारो बाधारहितप्रवृत्ति निवृत्ती प्रयोजनमस्येति सांव्यवहारिकं बाह्येन्द्रियादिसामग्रीसापेक्षत्वादपारमार्थिकम् अस्मदादिप्रत्यक्षमित्यर्थः। परमार्थे भवं पारमार्थिकं मुख्यम् आत्मसंनिधिमात्रापेक्षम् अवध्यादिप्रत्यक्षम्—Com. Note that सांव्यवहारिक is ordinary प्रत्यक्ष, while पारमार्थिक is extraordinary प्रत्यक्ष, no such distinction as that of the real and the unreal being implied, although the phraseology which is borrowed from Vedānta and Buddhism had this meaning.] तत्राद्यं द्विविधम्—इन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च (ii. 5)। एतद्द्वितयमवग्रहेहावायधारणाभेदादेकशश्चतुर्विकल्पम् (ii. 6)। The text omits the definitions of अवग्रह etc. as being too well-known ('सुप्रतीतत्वात्'), but they may well be reproduced here: विषयविषयिसंनिपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः (ii. 7)। अवगृहीतार्थविशेषाकाङ्क्षणमीहा (ii. 8)।

ईहितविशेषनिर्णयोऽवायः (ii. 9)। स एव दृढतमावस्थापन्नो धारणा (ii.10)॥ पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् (ii. 18)। [क्षय-क्षयोपशम-विशेषविशिष्टमात्मद्रव्यमेवाव्यवहितं समाश्रित्य पारमार्थिकमेतदवध्यादिप्रत्यक्ष-मुन्मज्जति न पुनः सांव्यवहारिकमिवेन्द्रियादिव्यवहितमात्मद्रव्यमाश्रित्येति भावः—Com.] तद्विकलं सकलं च (ii. 19)। तत्र विकलमवधिमनःपर्याय-ज्ञानरूपतया द्वेधा (ii. 20)। अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम् (ii. 21)। संयमविशुद्धिनिबन्धनाद् विशिष्टावरण-विच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम् (ii. 22)। सकलं तु सामग्रीविशेषतः समुद्भूतसमस्तावरणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् (ii. 23)।

The subject goes back to the Tattvārthādhigama-sûtra, (See T. Sûtra and T. Râja-Vārtika)—where मतिज्ञान is divided into इन्द्रियनिमित्त and अनिन्द्रियनिमित्त (तदिन्द्रियानिन्द्रियनिमित्तम्—i. 14); इन्द्रियनिमित्तं स्पर्शनादीनां पञ्चानां स्पर्शादिषु पञ्चस्वेव स्वविषयेषु अनिन्द्रियनिमित्तं मनोवृत्तिरोघज्ञानं च। This is further subdivided into अवग्रहेहावायधारणाः (i. 15), and each of these four is defined as follows: तत्राव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः। अवग्रहो ग्रहो ग्रहणमालोचनमवधारणमित्यनर्थान्तरम्। निश्चयविशेषजिज्ञासा चेष्टा ईहा। ईहा ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्यनर्थान्तरम्। अवगृहीते विषये सम्यगसम्यगिति गुणदोषविचारणा अध्यवसायापनोदोऽवायः। अवायोऽपगम अपनोदः अपव्याधः अपेतमपविद्धमनुत्तमित्यनर्थान्तरम्। धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणावस्थानं निश्चयोऽवमः अवबोध इत्यनर्थान्तरम्।

स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदतस्तत् पञ्चप्रकारम् (P.N.T. iii. 2)॥ तत्र संस्कारप्रबोधसंभूतमनुभूतार्थविषयं तदित्याकारं वेदनं स्मरणम् तत्तीर्थ-करबिम्बमिति यथा (iii. 3, 4)॥ अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादि-गोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम्। यथा तज्जातीय एवायं गोपिण्डः गोसदृशो गवयः स एवायं जिनदत्त इत्यादि ॥ (iii. 5,6) [तिर्यक्सामान्यं च गवादिषु गोत्वादिस्वरूपसदृशपरिणामात्मकम्। ऊर्ध्वतासामान्यं च परापरविवर्त-व्यापि मृत्स्नादिद्रव्यम् ।—Com. संकलनं विवक्षितधर्मयुक्तत्वेन वस्तुनः प्रत्यवमर्शनम्—Com.] उपलम्भानुपलम्भसंभवं त्रिकालीकलितसाध्यसाधन-संबन्धाद्यालम्बनमिदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनमूहापरनामा तर्कः (iii. 7, 8)। यथा यावान् कश्चिद् धूमः स सर्वो वह्नौ सत्येव भवतीति तस्मिन्न-सत्यसौ न भवत्येव। [उपलम्भानुपलम्भाभ्यां प्रमाणमात्रेण ग्रहणाग्रहणाभ्यां

संभव उत्पत्तिर्यस्येति कारणकीर्तनम्। त्रिकालीकलितयोः कालत्रयीवर्तिनोः साध्य-साधनयोर्गम्यगमकयोः संबन्धोऽविनाभावो व्याप्तिरित्यर्थः स आदिर्यस्याशेष-देशकालवर्तिवाचकसंबन्धस्यालम्बनं गोचरः यस्य तत्तथेति विषयाविष्करणम्। इदमस्मिन् सत्येव भवतीत्यादिशब्दादिदमस्मिन्न सति न भवत्येवाकारं साध्य-साधनसंबन्धालम्बनम्। एवंजातीयः शब्दः एवंजातीयस्यार्थस्य वाचकः सोऽपि तथाभूतस्तथाभूतस्य वाच्य इत्याकारं वाच्यवाचकभावालम्बनं च संवेदनमिहो-पादीयते इति स्वरूपप्रतिपादनम्। एवंरूपं यद्वेदनं स तर्क इति कीर्त्यते ऊह इति च संज्ञान्तरं लभते—Com.] अनुमानं द्विप्रकारं स्वार्थं परार्थं च (iii. 9)। तत्र हेतुग्रहणसंबन्धस्मरणकारकं साध्यविज्ञानं स्वार्थम् (iii. 10)। पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात् (iii. 23)। [पक्षहेतुवचनस्य च जडरूपतया मुख्यतः प्रामाण्यायोगे सति उपचारादित्युक्तम्। कारणे कार्योपचारादित्यर्थः। प्रतिपाद्यगतं हि यज्ज्ञानं तस्य कारणं पक्षादिवचनम्। कार्ये कारणोपचाराद्वा। प्रतिपादकगतं हि यत्स्वार्थानुमानं तस्य कार्यं तद्वचनमिति—Com.] आप्तवचनादाविर्भूतमर्थ-संवेदनमागमः (iv. 1) उपचारादाप्तवचनं च (iv. 2).

The same subject will be found in Hemacandra's Pramāṇa-mīmāṁsā. प्रमाणं द्विधा। प्रत्यक्षं परोक्षं च (I. i. 9,10) इन्द्रियमनोनिमित्तोऽव-ग्रहेहावायधारणात्मा सांव्यवहारिकम् (I. i. 21)। अक्षार्थयोगे दर्शनानन्तर-मर्थग्रहणमवग्रहः (I. i. 27)। अवगृहीतविशेषाकाङ्क्षणमीहा (I. i. 28)। ईहितविशेषनिर्णयोऽवायः (I. i. 29)। स्मृतिहेतुर्धारणा (I. i. 30).

अविशदः परोक्षम् (प्र॰ मी॰ १-२-१)॥ स्मृति-प्रत्यभिज्ञो-हा-ऽनुमाना-गमास्तद्विधयः (१-२-२)॥ वासनोद्बोधहेतुका, तदित्याकारा, स्मृतिः(१-२-३)॥ दर्शनस्मरणसंभवं तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादिसंकलनं प्रत्यभि-ज्ञानम् (१-२-४)॥ उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः (१-२-५)॥ साधनात् साध्यविज्ञानमनुमानम् (१-२-७)॥ तद् द्विधा स्वार्थं परार्थं च (१-२-८)॥ स्वार्थं स्वनिश्चितसाध्यविनाभावैकलक्षणात् साधनात् साध्यज्ञानम् (१-२-९)॥ यथोक्तसाधनाभिधानजः [निर्णयः] परार्थम् (२-१-१)॥ वचनमुपचारात् (२-१-२)॥

Note 1. वासनोद्बोधहेतुका (प्र॰ मी॰)='संस्कारप्रबोधसंभूतं' (Text) The text adds अनुभूतार्थविषयम्.

2. दर्शन-स्मरणसंभवं (प्र॰ मी॰) अनुभव-स्मृतिहेतुकं (Text). The text omits the details तदेवेदं to तत्प्रतियोगि and inserts तिर्यगूर्ध्वतादि-सामान्यगोचरम्.

3. उपलम्भानुपलम्भनिमित्तं (प्र॰ मी॰)=उप ('पा' in the text is a misprint)-लम्भानुपलम्भसंभवं (Text). The text substitutes for

व्याप्तिज्ञान of (प्र. मी.) " त्रिकालीकलितसाध्यसाधनसंबन्धाद्यालम्बनमिदमस्मिन् सत्येव भवतीत्याद्याकारं संवेदनं " which is only an explanation of the nature of व्याप्तिज्ञान of प्र. मी. It adds that 'तर्क' is another word for 'ऊह'.

4. साधनात् साध्यविज्ञानम्—the definition of अनुमान given in प्र. मी. where अनुमान is characetrised as " अन्यथानुपपत्त्येकलक्षण " *i, e.* the conclusion or hypothesis without which the position becomes absurd.

वचनमुपचारात् (प्र. मी. २-१-२). If is thus explained by Hemacandra himself in his स्वोपज्ञवृत्तिः—" अचेतनं हि वचनं न साक्षात् प्रमितिफलहेतुरिति न निरुपचरितप्रमाणभावभाजनं मुख्यानुमानहेतुत्वेन तूपचरितानुमानाभिधानपात्रतां प्रतिपद्यते। उपचारश्च कारणे कार्यस्य यथोक्तसाधनाभिधानात् तद्विषया स्मृतिरुत्पद्यते स्मृतेश्चानुमानं तस्मादनुमानस्य परंपरया यथोक्तसाधनाभिधानं कारणं तस्मिन् कारणे वचने कार्यस्यानुमानस्योपचारः समारोपः क्रियते। ततः समारोपात् कारणं वचनमनुमानशब्देनोच्यते। कार्ये वा प्रतिपादकानुमानजन्ये वचने कारणस्यानुमानस्योपचारः वचनमौपचारिकमनुमानं न मुख्यमित्यर्थः॥ *i. e.* Two ways of understanding उपचार in the present case: (1) कार्य (अनुमान) used for the कारण (वचन) and (2) कारण (अनुमान=प्रतिपादक अनुमान) used for the कार्य (वचने).

अवग्रहेहा०—See Tv. Sûtra I.15. Bhâṣya, Rāj. Vārt. and Com.

क्षायोपशमिक— „ II. 5.

तिर्यगूर्ध्वतादि—See "एककाले नानाव्यक्तिगतोऽन्वयस्तिर्यक्सामान्यं भण्यते। तत्र दृष्टान्तो यथा—नानासिद्धजीवेषु सिद्धोऽयं सिद्धोऽयमित्यनुगताकारः सिद्धजातिप्रत्ययः। नानाकालेष्वेकव्यक्तिगतोऽन्वय ऊर्ध्वतासामान्यं भण्यते। तत्र दृष्टान्तो यथा—य एव केवलज्ञानोत्पत्तिलक्षणे मुक्तात्मा द्वितीयादिलक्षणेष्वपि स एवेति प्रतीतिः॥ अथवा नानागोशरीरेषु गौरयं गौरयमिति गोजातिप्रतीतिस्तिर्यक्सामान्यम्। यथैव चैकस्मिन् पुरुषे बालकुमाराद्यवस्थासु स एवायं देवदत्त इति प्रत्यय ऊर्ध्वतासामान्यम्—Com. on Pravacanasâra. सामान्य is of two kinds which are graphically described as *horizontal* (तिर्यक्सामान्य) and *vertical* (ऊर्ध्वतासामान्य); the former represents unity in the plurality of different individuals of the same class, the latter represents unity in the plurality of different conditions of the same individual. Cf. also तिर्यक्सामान्यं

च गवादिषु गोत्वादिस्वरूप सदृशपरिणामात्मकम्। ऊर्ध्वतासामान्यं च परापरविवर्तव्यापि मृत्स्नानादिद्रव्यम्। (Ratnâkarâvatârikâ on P.N.T. iii. 5).

उपलम्भानुपलम्भ०—Arising from the presence and absence.

त्रिकालीकलिता०--resting upon the eternal relation of concomitance between साध्य and साधन. Pr. N. T. III. 7.

ऊहः—Otherwise called तर्क, *e. g.* whatever धूम there is is only when there is वह्नि; it is not when वह्नि is not. See Pr. N. T. with Ratna. III. 7.

अनुमानं द्विधा etc.—See Pr. N. T. with Ratn. III. 9.

आप्तवचनात्तु०—The primary sense of आगम is the knowledge of things which springs from the words of a reliable person (आप्त); its secondary sense is the word itself. Pr. N. T. with Ratn. IV. 1,2.

प्रमाणान्तराणां-Cf.Tarka books, Muktâvalî and Nîlakaṇṭhî etc.

Reference Books.

1. Tv. Sû. Bhâṣya. Sarvârtha-Siddhi.
2. ,, Râjavârtika.
3. Pramâṇa-Mîmaṁsâ.
4. Pr. N. Tattv. with Ratnâkarâvatârikâ.
5. ,, Syâdvâda-Ratnâkara.
6. Saptabhaṅgî T.
7. Sammatitarka with Commentary.
8. Nyâyâvatâra with Commentary.
9. Viśeṣâvas'yaka.
10. "A History of Indian Philosophy"—by S. N. Dasgupta Vol. I pp. 176–179.
11. "Indian Philosophy"—by Radhakrishnan Vol. I pp. 299–302.
12. "A History of Indian Logic"—by S. C. Vidyâbhûṣaṇa pp. 170–171.
13. "An Epitome of Jainism"—by Nahar and Ghosh Ch. VII pp. 78–102.

Stanza XXIX.

इदानीं सप्तद्वीप etc.—Refer also to the Brahmanical geography of seven islands and seven oceans. As against it, the Jaina holds that the oceans and the islands are infinite in number. For Brahmanical and Jaina cosmographies see Barnett's "Antiquities of India" pp. 196-99.

The Stanza: According to Jainas, souls are infinite in number. The stanza contains a criticism of the contrary doctrine.

इदमत्राकूतम् etc.—If there be only a finite number of souls, a time is conceivable when all the souls shall have achieved मुक्ति, leaving the world empty; or the once emancipated soul should return to the world to keep it ever populated! The second alternative is absurd, for all thinkers are agreed that emancipation once accomplished is accomplished for ever; in fact, it would be contrary to the notion of emancipation to suppose that emancipated souls are born again in the world and subjected to the round of births and deaths. For, is not emancipation an end of *all karmans*? And if *all karmans* have once ended, how can there be a return to bondage? Is not bondage a necessary result of karmans only? The first alternative is also impossible. For, it would be contrary to the very nature of the world (संसार) to be emptied of all souls.

दग्धे बीजे etc.—Quoted also in the Râj. Vārt. p. 361, which the editor traces to तत्त्वार्थसार.

आह च पतञ्जलिः—Vide Yogasûtras. II, 13.

एतट्टीका—The com. by Vyâsa on the same. 'वात्स्यायनभाष्य' in the AMP edition of the Syâdvâdamañjarî is a mistake for व्यासभाष्य.

सत्सु क्लेशेषु— While the root, viz. the passions, lasts, the abode of कर्म produces their fruition; but not when the root is eradicated. For example, paddy which is rice with their encasing husk will become the seed of the next paddy crop, but

the paddy from which husk has been removed or which is scorched by fire will never do so.

तथा क्लेशावनद्ध etc.—In the same way the abode of karmans, while it is wrapped in passions, has the power to germinate into Saṁsāra, but when it is stripped of them, or the root is scorched, it is no longer capable of doing so. प्रसंख्यानदग्ध–burnt deliberately.

विपाकस्त्रिविधः etc.—The three varieties of the fruition of karman are: (1) जातिः (quality of birth) (2) आयुः (duration life) and (3) भोग (joy or suffering).

अक्षपादोऽप्याह—Vide Nyâyasûtras IV, i, 64. When the passions have been destroyed no action (कर्म) makes for fruition.

विभङ्गज्ञानिशिवराजर्षि—One whose wisdom was mutilated or incomplete, having been hindered by jñânâvaraṇîya karma.

भगवदुपज्ञम्—Discovered and taught by the master.

षड्जीवकायम् पृथिव्यब्वनस्पतयः स्थावराः; तेजोवायू द्वीन्द्रियादयश्च त्रसाः—Tv. Sûtra: II, 13-14. Souls of Earth, Water, and the Vegetable Kingdom are immobile; and those of Light, Air and those possessed of two or more senses are mobile.

अजीवन् etc.—Those that have lived, are living or will live, *i. e.* जीव connotes potential as well as actual life.

इन्द्रियादि—इन्द्रियs are called ' द्रव्यप्राणs ', and ज्ञान etc. ' भावप्राणs '. By ' प्राण ' we here understand not vital airs but vital energies manifested either on the physical or the mental plane. The former are called ' द्रव्यप्राणs', and the latter ' भावप्राणs '. The point of calling both of them ' प्राण ' is to emphasise that one set of activities is as much a part of life as the other. That the प्राणs at first meant not the vital airs but all organs of vital activity may be seen in the सप्तप्राणसंवाद of the Upaniṣads. And this fact throws a new and interesting light on the meaning of 'प्राणायाम' as a spiritual exercise. It will not then mean a control of the vital airs of exhalation and inhalation, but a

control of the very physical basis of life. The Jaina extends the meaning still further.

संघेनूर्ध्वं (Hema V, iii, 80)—काय=समूह; from the root चि.

पृथिव्यादि षण्णां etc.—'षड्जीवकायम्' a compound dissolved in two ways: (1) षण्णां जीवकायानां समाहारः षड्जीवकायम्; (2) षण्णां जीवानां कायः...तम्।

The six kinds of संसारि जीवs are those of (1) Earth, (2) Water, (3) Fire, (4) Air, (5) Vegetable Kingdom and (6) Animal Kingdom, called respectively: (1) पृथ्वीकाय, (2) अप्काय, (3) तेजःकाय, (4) वायुकाय, (5) वनस्पतिकाय, and (6) त्रसकाय. See Âcârânga Sûtra 1. Adh. 2; Tattvârtha II, 13–14.

पृथिव्यादीनां पुनर्जीवत्वं etc.—अत्र च पृथिव्येव, कायो येषामिति विग्रहः Sîl. com. on Âcâr. Sû. I. ii. 79, 84, 85, and Sîl. com. pp.30–31.

Mrs. Sinclair Stevenson asks us to note and rightly: " The Jaina believes that water itself (not as is so often supposed, the animalculæ living in it) is inhabited by Ekendriya Jîva called Apkâya ekendriya. See " Heart of Jainism " p. 98.

भगवन्मते हि etc.—The six classes of Jîvas may be arranged thus in the ascending order of their numbers:

त्रस–, तेजः–, पृथिवी–, अप्–, वायु–, and वनस्पति–कायिकs.

The तेजःकायिकs are infinitely more numerous than the त्रसकायिकs; similarly still more numerous are पृथिवीकायिकाः; still more numerous are अप्कायिकाः; still more are वायुकायिकाः infinitey multiplied in number are वनस्पतिकायिकs and so on.

ते च व्यावहारिकाः etc.—The वनस्पतिकायिकs are व्यावहारिक and अव्यावहारिक.

गोला etc.—Quoted partly in S'îl. com. Âcârânga. (p. 59). See Bhagavatî, X, XI.

अनाद्यनन्तेऽपि काले etc.—Even if we were to put together all the Jîvas who have attained निर्वाण (मोक्ष), who are now attaining it, and who will attain it hereafter, still their number falls infinitely short of the number of निगोदs. Hence the

world will never get emptied of souls, and the Saṁsâra will never end. As many fresh souls are supplied from the reservoir of निगोदs as pass out into मुक्ति.

अभिप्रेतं चैतद्—Certain Brahmanical Schools share this doctrine.

Mrs. Sinclair learns from a S'v. Sâdhu that *nigoda* is a kind of hell in which are thrown evil Jîvas who have committed specially heinous sins like murder, and who have no hope of ever coming out. See her " Heart of Jainism " p. 272.

Evidently this statement that they have " no hope of ever coming out " does not agree with the statement in the text. See also Herbert Warren, p. 45.

गोलाय असंखिज्जा etc. = गोलाश्च असंख्येया असंख्यनिगोदो गोलको भणितः। एकैकस्मिन् निगोदे अनन्तजीवा ज्ञातव्याः। सिध्यन्ति यावन्तः खलु इह संव्यवहारजीवराशेः। आयान्ति अनादिवनस्पतिराशेस्तावन्तस्तस्मिन् ॥

There are innumerable spheres (गोलs) in the Universe and in each sphere there are innumerable reservoirs (निगोदs) of jîvas; and in each such, again, there are innumerable lives or souls (जीवs). From this infinite reservoir or rather from the particular part which lies immediately below animal life, that is, the vegetable kingdom (वनस्पतिराशि), there emerge souls to make up the deficiency caused by the emancipation of the souls that achieve मोक्ष from time to time.

" The storehouse of unevolved *Jîvas* is the region called *nigoda* where an infinite number of them exist from all eternity. The *nigoda* is the portion of the universe situated below the hells. Here evolution is almost at a stand-still and is proceeding so slowly as to be almost imperceptible. From this condition *jîvas* are constantly passing into the higher states of evolution."—Champat Rai Jain's " Key of Knowledge " p. 715.

अत्र च पृथिव्येव कायो येषामिति विग्रहः।.........

कथं पुनरिदमवगन्तव्यं सन्ति पृथिवीकायिका इति । उच्यते —तदधिष्ठितशरीरोपलब्धेः । अधिष्ठातरि प्रतीतिर्गवाश्वादाविव इति । न हि उपयोगादीनि लक्षणानि पृथिवीकायेषु व्यक्तानि समुपलक्ष्यन्ते । सत्यमेतद् । अव्यक्तानि तु विद्यन्ते । यथा कस्यचित् पुंसः हृत्पूरकव्यतिमिश्रमदिरातिपानपित्तोदयाकुलीकृतान्तःकरणविशेषस्याव्यक्ता चेतना न चैतावता तस्याश्चिद्रूपता एवमत्राप्यव्यक्तचेतनासंभवोऽभ्युपगन्तव्यः । ननु चात्रोच्छ्वासादिकमव्यक्तचेतनालिङ्गमस्ति न चेह तथाविधं किंचिच्चेतनालिङ्गमस्ति । नैतदेवम्—इहापि समानजातीयलतोद्भेदादिकमर्शोमांसाङ्कुरवच्चेतनाचिह्नमस्त्येव । अव्यक्तचेतनानां हि संभावितैकचेतनालिङ्गानां वनस्पतीनामिव चेतनाऽभ्युपगन्तव्येति । वनस्पतेश्च चैतन्यं विशिष्टर्तुपुष्पफलप्रदत्वेन स्पष्टं साधयिष्यते च । ततोऽव्यक्तोपयोगादिलक्षणसद्भावात् सचित्ता पृथिवीति स्थितम् ।

S'îl. Com. on Acârânga I. ii. 84.

सचेतना आपः क्वचित् खातभूमिस्वाभाविकसंभवत्वात् । दर्दुरवत् । अथवा सचेतना अन्तरिक्षोद्भवा आपः स्वाभाविकव्योमसंभूतसंपातित्वात् । मत्स्यवत् ।

सचेतनं तेजो यथायोग्याहारोपादानेन वृद्धिविशेषतद्विकारवत्त्वात् पुरुषवत् । एवमादिलक्षणेनाग्नेया जीवा निश्चेया इति ।

चेतनावान् वायुः अपरप्रेरिततिर्यगनियमितगतिमत्त्वात् । गवाश्वादिवत् ।

For त्रस see Sîlāṅkâ's Com. on Âcârâṅga I. vi. 50, and Sarvârthasiddhi on Tattvârtha II. 14. "त्रसत्वं च द्विविधं क्रियातो लब्धितश्च । तत्र क्रिया कर्म चलनं देशान्तरप्राप्तिः । अतः क्रियां प्राप्य तेजोवाय्वोस्त्रसत्वम् । लब्धिस्तु त्रसनामककर्मोदयो यस्माद्द्वीन्द्रियादीनां क्रिया च देशान्तरप्राप्तिलक्षणेति । लब्ध्या पृथिव्यप्तेजोवायुवनस्पतयः सर्वे स्थावरनामकर्मोदयात् स्थावरा एव । सास्नाविषाणादिसंघाता हि छेद्यभेद्योत्क्षेप्यभोग्याघ्रेयरसनीयस्पृश्यद्रव्यत्वे सति जीवशरीरतया प्रसिद्धाः । पृथिव्यादीनां च छेद्यत्वादि दृष्टमपह्नोतुं न शक्यते जीवशरीरत्वेन निरूपितत्वात् । पाणिपादसंघातानामिव पृथिव्यादीनामपि कदाचिच्चैतन्यं न चात्यन्तमचित्ततेति कदाचित् किंचिदचेतनमपि शस्त्रोपहतत्वात् पाण्यादिवदेवेति ।"

—Sarvârtha-Siddhi II. 13.

A similar doctrine of sentiency of matter held by a certain school of Vedântins on the basis of an Upaniṣad text is noticed by S'aṁkara in his Com. on Br. Sûtra II. i. 4.

Stanza XXX.

प्रकर्षेण etc.—प्रवादाः The blatant heresies.

अतिशायिने etc.—Hem.

मत्सरिणः Full of jealousies or angry passions. The poss. term. applied in the sense of excessiveness. Quoted in S. K. on Pâṇ. V. ii. 94.

अन्योन्यपक्ष etc.—पक्षः=पच्यते etc.—पक्ष is so called because it is put forth (पच्यते व्यक्तीक्रियते) as possessed of the साध्य by means of the हेतु. It is thus the presentation of the साधन (हेतु) in order to prove the साध्य (धर्म).

य एव मीमांसकानां etc.—The Mim. hold that शब्द is नित्य; the Buddhists on the other hand hold that शब्द is अनित्य. Here is an example of two schools diametrically opposed to each other.

सम्यगेति etc.—समय explained in different ways: "(1) सम्यगेति शब्दोऽनेनेति: संकेतः that by which the word goes well to the Reality; the teaching in whih the word harmonizes with truth. प्रज्ञाभिधे—Hem.

(2) यद्वा सम्यगवैपरीत्येनेयन्ते ज्ञायन्ते जीवाजीवादयोर्था अनेनेति समयः=सिद्धान्तः. The doctrine which gives correct knowledge of the nine categories viz. जीव, अजीव etc.

(3) अथवा सम्यगयन्ते......समयः आगमः The teaching of the Master in which the above-mentioned categories come to their own, that is to say, appear in their true nature.

(4) अथवा...समयः—The doctrine of उत्पाद, व्यय and ध्रौव्य. (See supra Notes on St. V. pp.31–32) which has been declared by the Master as "the Mother" (cf. 'अष्टप्रचनमाता') that is to say, good and kind like a mother.

न पक्षपाती :—Not leaning exclusively towards either side. When there are no passions such as jealousy and hatred, there is no partisanship.

तव समय इति etc.—'Yours' *i. e.* proclaimed by you. Has Mahâvîra proclaimed the Jaina Âgama? Yes, in a way. For,

although the Gaṇadharas have presented it in the form of the Sûtras, it is Mahâvîra who has been the real author of the teaching.

नयानशेषान् etc.—Welcoming all the नयs without distinction. His teaching is like a necklace of pearls, wherein every system has its proper place like a pearl. This synthetic teaching is the Syâdvâda. A similar claim can be made by the Vedântin of the Sâṅkara school who holds the doctrine of अनिर्वचनीयता.

ननु प्रत्येकं नयानां etc.—In the Syâdvâda, discordant notes are blended so as to make a perfect harmony. In it all the 'little systems' find their great conciliator or peacemaker. As rivers mingle in the ocean, so do all systems mingle in the Syâdvâda.

न त्ववाच्यं तर्हि etc.—How is it that we do not see the Syâdvâda in the 'little systems'? The question has been answered by Siddhasena Divâkara who, identifying Mahâvîra with his great teaching, says: "Oh Lord! all views find their place in you like rivers in the ocean; you do not appear in them just as an ocean does not appear in the rivers."

अन्ये etc.—Another way of construing the passage is to take पक्षपाती as an enlargement of the subject समयः, and make मत्सरी (corresponding to मत्सरिणः in the correlative passage) the predicate.

अत्र च क्लिष्टाक्लिष्ट०—The author seems a bit too anxious to avoid मत्सर and पक्षपात. So he would not say that the second explanation is क्लिष्ट.

Appendices.

(१) एते हि बौद्धादयः स्वयं स्याद्वादवादं युक्त्याभ्युपगच्छन्तोऽपि तं वचनैरेव निराकुर्वन्तो नूनं कुलीनताभिमानिनो मानवस्य स्वजननीमाजन्मतोऽप्यसतीमाचक्षाणस्य वृत्तमनुकुर्वन्ति। तथाहि—प्रथमतः सौगताभ्युपगतोऽनेकान्तः प्रकाश्यते। दर्शनेन क्षणिकाक्षणिकत्वसाधारणस्यार्थस्य विषयीकरणात् कुतश्चिद्भ्रमनिमित्तादक्षणिकत्वारोपेऽपि न दर्शनमक्षणिकत्वे प्रमाणं किंतु प्रत्युताप्रमाणम्। विपरीता-

ध्यवसायाक्रान्तत्वात् । क्षणिकत्वेऽपि न तत्प्रमाणम् । अनुरूपाध्यवसायाजननात् । नीलरूपे तु तथाविधनिश्चयकरणात् प्रमाणमित्येवंवादिनां बौद्धानामेकस्यैव दर्शनस्य क्षणिकाक्षणिकत्वयोरप्रामाण्यं नीलादौ तु प्रामाण्यं प्रसक्तमित्यनेकान्तवादाभ्युपगमो बलादापतति ॥ १ ॥ तथा दर्शनोत्तरकालभाविनः स्वाकाराध्यवसायिन एकस्यैव विकल्पस्य बाह्येऽर्थे सविकल्पकत्वमात्मस्वरूपे तु सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमिति वचनान्निर्विकल्पकत्वं च रूपद्वयमभ्युपगतवतां तेषां कथं नानैकान्तवादापत्तिः ॥ २ ॥ तथा हिंसाविरतिदानादि चित्तं यदेव स्वसंवेदनगतेषु सत्त्वबोधरूपत्वसुखादिषु प्रमाणं तदेव क्षणक्षयित्वस्वर्गप्रापणशक्तियुक्तत्वादिष्वप्रमाणमित्यनेकान्त एव ॥ ३ ॥ तथा यद्वस्तु नीलचतुरस्रोर्ध्वतादिरूपतया प्रमेयं तदेव मध्यभागक्षणविवर्तादिनाप्रमेयमिति कथं नानेकान्तः ॥ ४ ॥ तथा सविकल्पकं स्वप्नादिदर्शनं वा यद्बहिरर्थापेक्षया भ्रान्तं ज्ञानं तदेव स्वस्वरूपापेक्षयाऽभ्रान्तमिति बौद्धाः प्रतिपन्नाः ॥५॥ तथा यन्निशीथिनीनाथद्वयादिकं द्वित्वेऽलीकं तदपि धवलतानियतदेशचारितादौ तेऽनलीकं प्रतिपद्यन्ते ॥ ६ ॥ कथं च भ्रान्तज्ञानं भ्रान्तिरूपतयाऽत्मानमसंविन्दत् ज्ञानरूपतया चावगच्छत् स्वात्मनि भावद्वयं विरुद्धं न साधयेत् ॥ ७ ॥ तथा पूर्वोत्तरक्षणापेक्षयैकस्यैव क्षणस्य जन्यत्वं जनकत्वं चाभ्युपागमन् ॥ ८ ॥ तथाऽर्थाकारमेव ज्ञानमर्थस्य ग्राहकं नान्यथेति मन्यमानाश्चित्रपटग्राहकं ज्ञानमेकमप्यनेकाकारं संप्रतिपन्नाः ॥ ९ ॥ तथा सुगतज्ञानं सर्वार्थविषयं सर्वार्थाकारं चित्रं कथं न भवेत् ॥ १० ॥ तथैकस्यैव हेतोः पक्षधर्मसपक्षसत्त्वाभ्यामन्वयं विपक्षेऽविद्यमानत्वाद्व्यतिरेकं चान्वयविरुद्धं ते तात्त्विकमूरीचक्रिरे ॥ ११ ॥ एवं वैभाषिकादिसौगताः स्वयं स्याद्वादं स्वीकृत्यापि तत्र विरोधमुद्भावयन्तः स्वशासनानुरागान्धकारसंभारविलुप्तविवेकदृशो विवेकिनामपकर्णनीया एव भवन्ति । किंच । सौत्रान्तिकमत एकमेव कारणमपरापरसामग्र्यन्तःपातितयानेककार्यकारि विद्यते यथा रूपरसगन्धादिसामग्रीगतं रूपमुपादानभावेन स्वोत्तरं रूपक्षणं जनयति रसादिक्षणांश्च सहकारितया तदेव च रूपं रूपालोकमनस्कारचक्षुरादिसामग्र्यन्तरगतं सत्पुरुषस्य ज्ञानं सहकारितया जनयति । आलोकाद्युत्तरक्षणांश्च तदेवमेकं कारणमनेकानि कार्याणि युगपत्कुर्वाणं किमेकेन स्वभावेन कुर्यात् नानास्वभावैर्वा । यद्येकेन स्वभावेन तर्ह्येकस्वभावेन कृतकत्वात् कार्याणां भेदो न स्यात् । अथवा नित्योऽपि पदार्थ एकेन स्वभावेन नानाकार्याणि कुर्वाणः कस्मान्निषिध्यते । अथ नित्यस्यैकस्वभावत्वेन नानाकार्यकरणं न घटते तर्ह्यनित्यस्यैकस्वभावत्वेन नानाकार्यकरणं न घटते तर्ह्यनित्यस्यापि तेषां करणं कथमप्यस्तु निरंशैकस्वभावत्वात् । सहकारिभेदाच्चेत् कुरुते तर्हि नित्यस्यापि सहकारिभेदात्तदस्तु । अथ नानास्वभावैरनित्यः कुर्यादिति चेत् नित्यस्यापि तथा तत्करणमस्तु । अथ नित्यस्य नानास्वभावा न संभवन्ति कूटस्थनित्यस्यैकस्वभावात् । तर्ह्यनित्यस्यापि नानास्वभावा न सन्ति निरंशैकस्वभावत्वात् । तदेवं नित्यस्यानित्यस्य च समानदोषत्वान्नित्यानित्योभयात्मकमेव वस्तु मानितं वरम् । तथा चैकान्तनित्यानित्यपक्षसंभवं दोषजालं सर्वं परिहृतं भवतीति ॥ १२ ॥ ज्ञानवादिनोऽपि ताथागताः स्वार्थाकारयो-

रभिन्नमेकं संवेदनं संवेदनाच्च भिन्नौ ग्राह्यग्राहकाकारौ स्वयमनुभवन्तः कथं स्याद्वादं निरस्येयुः ॥ १ ॥ तथा संवेदनस्य ग्राह्यग्राहकाकारविकलता स्वप्नेऽपि भवद्भिर्नानुभूयते । तस्या अनुभवे वा सकलासुमतामधुनैव मुक्ततापत्तेः । तत्त्वज्ञानोत्पत्तिर्मुक्तिरिति वचनात् । अनुभूयते च संवेदनं संवेदनरूपतया कथंचित् । तत एकस्यापि संवेदनस्यानुभूतानुभूततयानेकान्तप्रतिभासो दुःशंकोऽपह्नोतुमिति ॥ २ ॥ तथा सर्वस्य ज्ञानं संविद्रूपस्वसंवेदनेन ग्राह्यग्राहकाकारशून्यतयात्मानमसंविदत् संविद्रूपतां चानुभवद्विकल्पेतरात्मकं सदेकान्तवादस्य प्रतिक्षेपकमेव भवेत् ॥ ३ ॥ तथा ग्राह्याकारस्यापि युगपदनेकार्थावभासिनश्चित्रैकरूपता प्रतिक्षिपत्येवैकान्तवादमिति ॥४॥

(२) नैयायिकैर्वैशेषिकैश्च यथा स्याद्वादोऽभ्युपजग्मे तथा प्रदर्श्यते । इन्द्रियसंनिकर्षादेर्धूमज्ञानं जायते । तस्माच्चाग्निज्ञानम् । अत्रेन्द्रियसंनिकर्षादिः प्रत्यक्षं प्रमाणं तत्फलं धूमज्ञानं धूमज्ञानं चाग्निज्ञानापेक्षयानुमानं प्रमाणम् । अग्निज्ञानं त्वनुमानफलम् । तदेवं धूमज्ञानस्य प्रत्यक्षफलतामनुमानप्रमाणतां चोभयरूपतामभ्युपगच्छन्ति । एवमन्यत्रापि ज्ञाने फलता प्रमाणता च पूर्वोत्तरापेक्षया यथार्हमवगन्तव्या ॥ १ ॥ एकमेव चित्रपटादेरवयविनो रूपं विचित्राकारमभ्युपयन्ति । न च विरोधमाचक्षते । तदुक्तं कन्दलयाम् । विरोधादेकमनेकस्वभावमयुक्तमिति चेन्न । तथा च प्रावादुकप्रवादः ।

एकं चेत् तत्कथं चित्रं चित्रं चेदेकता कुतः ।
एकं चैव तु चित्रं चेत्येतच्चित्रतरं मतम् ॥

इति को विरोध इत्यादि । चित्रात्मनो रूपस्य नायुक्तता । विचित्रकारणसामर्थ्यभाविनस्तस्य सर्वलोकप्रसिद्धेन प्रत्यक्षेणैवोपपादितत्वादित्यादि ॥ २ ॥ एकस्यैव धूपकटच्छुकस्यैकस्मिन् भागे शीतस्पर्शः परस्मिंश्च भाग उष्णस्पर्शः । अवयवानां भिन्नत्वेऽप्यवयविन एकत्वादेकस्यैव द्वौ विरुद्धौ तौ स्पर्शौ यतस्तेषामेवं सिद्धान्तः एकस्यैव पटादेश्चलाचलरक्तारक्तावृतानावृताद्यनेकविरुद्धधर्मोपलम्भेऽपि दुर्लभो विरोधगन्धः इति ॥ ३ ॥ नित्यस्येश्वरस्य सिसृक्षा संजिहीर्षा च रजस्तमोगुणात्मकौ स्वभावौ क्षितिजलाद्यमूर्तिता च सात्त्विकस्वभावाः परस्परं विरुद्धाः॥४॥ एकस्यामलकस्य कुवलयबिल्वाद्यपेक्षया महत्त्वमणुत्वं च विरुद्धे ॥ ५ ॥ एवमिक्षोः समिद्वंशापेक्षया ह्रस्वत्वदीर्घत्वे अपि ॥ ६ ॥ देवदत्तादेः स्वपितृसुतापेक्षया परत्वापरत्वे अपि ॥ ७ ॥ अपरं सामान्यं नाम्ना सामान्यविशेष इत्युच्यते । सामान्यविशेषश्च द्रव्यत्वगुणत्वकर्मत्वलक्षणः । द्रव्यत्वं हि नवसु द्रव्येषु वर्तमानत्वात् सामान्यं गुणकर्मभ्यो व्यावृत्तत्वाद्विशेषः । एवं गुणत्वकर्मत्वयोरपि सामान्यविशेषता विभाव्या । ततश्च सामान्यं च तद्विशेषश्चेति सामान्यविशेषः । तस्यैकस्य सामान्यता विशेषता च विरुद्धे ॥ ८ ॥ एकस्यैव हेतोः पञ्च रूपाणि संप्रतिपद्यते ॥ ९ ॥ एकस्यैव पृथिवीपरमाणोः सत्तायोगात् सत्त्वं द्रव्यत्वयोगाद्द्रव्यत्वं पृथिवीत्वयोगात् पृथिवीत्वं परमाणुत्वयोगात् परमाणुत्वम् अन्त्याद्विशेषात् परमाणुभ्यो भिन्नत्वं

चेच्छतां परमाणोस्तस्य सामान्यविशेषात्मकता बलादापतति, सत्त्वादीनां परमाणुतो भिन्नतायां तस्यासत्त्वाद्रव्यत्वापृथिवीत्वाद्यापत्तेः ॥ १० ॥ एवं देवदत्तात्मनः सत्त्वं द्रव्यत्वमात्मत्वयोगादात्मत्वमन्त्याद्विशेषाद्यज्ञदत्ताद्यात्मभ्यो भिन्नतां चेच्छतां तस्यात्मनः सामान्यविशेषरूपतावश्यं स्यात् । एवमाकाशादिष्वपि सा भाव्या ॥ ११ ॥ योगिनां नित्ये तु तुल्याकृतिगुणक्रियेषु परमाणुषु मुक्तात्मसु च प्रत्याधारं विलक्षणोऽयमिति प्रत्ययो येभ्यो भवति तेऽन्त्या विशेषा इत्यत्र तुल्याकृतिगुणक्रियत्वं विलक्षणत्वं चोभयं प्रत्याधारमुच्यमानं स्याद्वादमेव साधयेत् ॥ १४ ॥ एवं नैयायिकवैशेषिका आत्मनानेकान्तमुररीकृत्यापि तत्प्रतिक्षेपायोद्यच्छन्तः सतां कथं नोपहास्यतां यान्ति ? । किं च । अनेकान्ताभ्युपगमे सत्येव गुणः परस्परविभक्तेष्ववयवावयव्यादिषु मिथोवर्तनचिन्तायां यद्दूषणजालमुपनिपतति तदपि परिहृतं भवति । तथाहि । अवयवानामवयविनश्च मिथोऽत्यन्तं भेदोऽभ्युपगम्यते नैयायिकादिभिर्न पुनः कथंचित् । ततः पर्यनुयोगमर्हन्ति । अवयवेष्ववयवी वर्तमानः किमेकदेशेन वर्तते किं वा सामस्त्येन । यद्येकदेशेन, तदयुक्तम् । अवयविनो निरवयवत्वाभ्युपगमात् । सावयवत्वेऽपि तेभ्योऽवयवी यद्यभिन्नः, ततोऽनेकान्तापत्तिः । एकस्य निरंशस्यानेकावयवत्वप्राप्तेः । अथ तेभ्यो भिन्नोवयवी तर्हि तेषु स कथं वर्तत इति वाच्यम् । एकदेशेन सामस्त्येन वा । एकदेशपक्षे पुनस्तदेवावर्तत इत्यनवस्था । अथ सामस्त्येन तेषु स वर्तते, तदप्यसाधीयः । प्रत्यवयवमवयविनः परिसमाप्ततयावयविबहुत्वप्रसङ्गात् । ततश्च तेभ्यो भिन्नोऽवयवी न विकल्पभाग् भवति । नन्वभेदपक्षेऽप्यवयविमात्रमवयवमात्रं वा स्यादिति चेत् न । अभेदस्याप्येकान्तेनानभ्युपगमात् । किं तर्ह्यन्योन्याविश्लिष्टस्वरूपो विवक्षया संदर्शनीयभेदोऽवयवेष्ववयव्यभ्युपगम्यते । अबाधितप्रतिभासेषु सर्वत्रावयवावयविनां मिथो भिन्नाभिन्नतया प्रतिभासनात् । अन्यथा प्रतिभासमानानामन्यथा परिकल्पने ब्रह्माद्वैतशून्यतावादादेरपि कल्पनाप्रसङ्गात् । एवं संयोगिषु संयोगः समवायिषु समवायो गुणिषु गुणो व्यक्तिषु सामान्यं चात्यन्तं भिन्नान्यभ्युपगम्यमानानि तेषु वर्तनचिन्तायां सामस्त्यैकदेशविकल्पाभ्यां दूषणीयानि । तदेवमेकान्तभेदेऽनेकदूषणोपनिपातादनेकान्ते च दूषणानुत्थानादनेकान्ताभ्युपगमान्न मोक्ष इति । अतो वरमादावेव मत्सरितां विहायानेकान्तोऽभ्युपगतः । किं भेदैकान्तकल्पनया अस्थान एवात्मना परिक्लेशितेनेति ? ॥

(३) सांख्यः सत्त्वरजस्तमोभिरन्योन्यं विरुद्धैर्गुणैर्ग्रथितं प्रधानमभिदधान एकस्याः प्रकृतेः संसारावस्थामोक्षसमययोः प्रवर्तननिवर्तनधर्मौ विरुद्धौ स्वीकुर्वाणश्च कथं स्वस्यानेकान्तमतवैमुख्यमाख्यातुमीशः स्यात् ॥ ?

मीमांसकास्तु स्वयमेव प्रकारान्तरेणैकान्तेकाद्यनेकान्तं प्रतिपद्यमानास्तत्प्रतिपत्तये सर्वथा पर्यनुयोगं नार्हन्ति । अथवा शब्दस्य तत्संबन्धस्य च नित्यत्वैकान्तं

प्रति तेऽप्येवं पर्यनुयोज्याः। त्रिकालशून्यकार्यरूपार्थविषयविज्ञानोत्पादिकानोदनेति मीमांसकाभ्युपगमः। अत्र कार्यतायास्त्रिकालशून्यत्वेऽभावप्रमाणस्य विषयता स्यात्। अर्थत्वे तु प्रत्यक्षादिविषयता भवेत्। उभयरूपतायां पुनर्नोदनाया विषयतेति ॥

—Guṇaratna's Com. on Ṣaḍdarśana Samuccaya.

——:o:——

Stanza XXXI.

विभव एव०—वैभव = विभव–Wealth 'प्रज्ञादिभ्योण्'. Pâṇ. V.iv. 38; 'प्रज्ञादिभ्यश्च' Hem. VII. ii. 165. विभोर्भावः कर्म etc.—Or वैभव=the quality and the act of विभु *i. e.* all-comprehensiveness.

हे महनीयमुख्य etc.—The best of the adorable viz. the Pañca Parameṣṭhins to whom obeisance is offered in the famous formula "णमो अरिहंताणम्" etc.

ननु सिद्धेभ्यो etc.—Why Arhats first? Are not they lower than the Siddhas? Do not the Arhats bow to the Siddhas on entering the life of asceticism? काऊण etc.=कृत्वा नमस्कारं सिद्धेभ्योऽभिग्रहं तु सोऽग्रहीत्.

मैवं etc.—They do. But it is the teaching of the Arhats that reveals the existence of the Siddhas. अरहन्तु etc.="अर्हदुपदेशेन सिद्धा ज्ञायन्ते तेनार्हदादिः"—विशेषावश्यकगाथा–३२१३.

लङ्घेमेत्यादि—Nidarśanālaṁkāra. अथवा लघु शोषणे etc.—लघ् लङ्घ् in the sense of 'to cross' being Âtm. pada लङ्घेम may have to be defended by the rule of elasticity of the rule as to padas (आत्मनेपदमनित्यम्); or it may be taken as a form of लघ्, लङ्घ् to dry up which M. seems to prefer.

अत्र चौद्धत्यपरिहारेण etc.—A very ingenious bit of commentary. Why is there the plural number in आशास्महे, लङ्घेम and वदेम, when the person to whom they refer is but one? Answer: It is intended to suggest that there are numberless souls

in the position of the author who venture to describe the greatness of his teaching but fail to do it justice. Thus, the plural number instead of betraying egotism places 'a banner at the top of the palace of humanity'.

एषु एकत्रिंशति—Up to this, from I to XXXI stanzas, the metre was उपजाति. That in XXXII is शिखरिणी.

Stanza XXXII.

विप्रतारक—deceitful.

अव्यभिचारि—His teaching is in no point wrong, and consequently he is able to show that no other system which differs from it can claim to be altogether right (अव्यभिचारि).

अन्ययोग etc.—Exclusion of all the other systems from the laim of bringing salvation to mankind.

हतपरे—The wretched heretics.

मायाकाराः—Jugglers *i. e.* the deceitful teachers.

शाम्बरीयप्रयोग—Practice of the science tanght and practised by the demon शम्बर *i. e.* sorcery.

अन्धं करोति etc.—अन्ध, that which blinds + तमः darkness = अन्धतमसम्. For the affix अ applied to तमस्, see अवसमन्धेभ्यस्तमसः Pâṇ. V.iv. 79; Hem. VII.iii. 80.

यत्रान्धतमसे etc.—Twofold error of confounding तत्त्व with अतत्त्व and अतत्त्व with तत्त्व, A with not-A and not-A with A.

अनेन च विशेषणेन—Thus the Error is what is technically known in the Jaina S'âstras as मिथ्यात्व मोहनीय कर्मन्. मिथ्यात्व मोहनीय—See Tattvârtha Sûtra VIII.9. and Râj Vârt. मोहनीय कर्म is of two kinds: दर्शन° and चारित्र°. The former is of three kinds: (1) सम्यक्त्वदर्शन-मोहनीय ('which makes right faith or perception defective'), (2) मिथ्यात्वदर्शन-मोहनीय ('that which leads the soul away from right faith or perception')

and (3) सम्यक्त्वमिथ्यात्व° ('mixed right and wrong faith')—Jaini's "Outlines of Jainism" p. 92. On मिथ्यात्वमोहनीय° Mrs. Sinclair Stevenson writes: "The last of the eighty-two fruits of sin (मिथ्यात्व-मोहनीय) is the most terrible of all, for it deprives a man of the power of believing in the truth. He is forced by it to believe in a false instead of in a true god; and in an evil guru and not in a good one; and in a false creed instead of the true faith." ("The Heart of Jainism"—p. 139).

तथा च ग्रन्थान्तरे See Hem. Yogaśâstra II. 3.

अविसंवादिवचनः—Whose teaching never swerves from Truth.
कष-च्छेद-ताप—the three tests of real gold. The same are explained in the Gâthâs "पाणव ...." See below.

कष—To avoid the life of sin such as Hiṁsâ, and practise Dhyâna, Adhyayana, *i. e.* meditation, study etc. Mark the homogeneity of Brâhmaṇa and Jaina religious disciplines and practices.

छेद—To see that the outward conduct is in harmony with the laws of धर्म and makes for purity.

ताप—To undergo pain and bondage connected with the life of a Jîva.

पाणवहाई आणं etc.—

> "प्राणवधादीनां पापस्थानानां यस्तु प्रतिषेधः ।
> ध्यानाध्ययनादीनां यश्च विधिरेष धर्मकषः ॥
> बाह्यानुष्ठानेन येन न बाध्यते तन्नियमात् ।
> संभवति च परिशुद्धः स पुनर्धर्मे छेद इति ॥
> जीवादिभाववादो बन्धादिप्रसाधक इह तापः ।
> एतैः परिशुद्धो धर्मो धर्मत्वमुपैति ॥"

—Traced to हरिभद्रसूरिकृत पञ्चवस्तुक चतुर्थद्वार by AMP.

तीर्थान्तरीयास्ता हि etc.—The teachers of the other schools of thought teach doctrines which cannot stand the test laid down above (कष, च्छेद and ताप), and are, therefore, not gold but

base metal. They can only sink the world in the depths of false knowledge.

त्रातः—One who has saved himself and knows how to save others (त्रिभुवनपरित्राणप्रवीण).

त्वयि etc.—त्वयि = त्वय्येव, न देवान्तरे.

कृतधियः=कृता...संस्कृता...बुद्धिर्येषां ते कृतधियः चिद्रूपाः पुरुषाः—Those who have 'made' their intellect; those who have cultivated and refined their mind; the wise.

कृता in कृतधियः=परिकर्मिता *i. e.* refined, cultivated, adorned, *i. e.* adorned with wisdom; कृता in कृतसपर्याः=प्रकृता; कर्तुमारब्धा (प्रादिकं विनाप्यादिकर्मणो गम्यमानत्वात्).

S'l. 1. येषामुज्ज्वलहेतुहेति etc.—One shining with bright weapons consisting of arguments or reason.

प्रामाणिकाध्वस्पृशाम्—Those who tread the path which is 'प्रामाणिक' or which belonged to those who are 'प्रामाणिक'. Not much difference in sense. It means—those who tread the path of reason or those who follow reason.

हेमाचार्य—Who have a powerful friend in the shape of thought arising from this Song of Praise addressed by Hemâcârya to Jina Mahâvîra.

तेषां दुर्नयदस्यु॰—They are never afraid of the robbers, namely, false systems of philosophy.

आयासेन विना—They easily reach the city of जिनागम—the scriptures or teaching of Jaina.

Sl. 2. चातुर्विद्य—(1) लक्षण (Grammar), (2) आगम (Scriptures), (3) साहित्य (Literature and Rhetoric) and (4) तर्क (Logic). See Note on p. 7 and in the Supplementary Notes.

Hemācārya's works in all these branches are well known. (See Introduction).

Read गम्भीरार्थविलोकने and द्राघीयःसमया॰.

द्राघीयःसमया॰—Where many an evil has been averted by insistent regard for a long time. द्राघीयःसमय has been inter-

preted as 'महान् सिद्धान्त' (See Hiralal Hansraj's Gujarati translation). But I do not think द्राघीयः means 'महान्' and समय=सिद्धान्त here.

सिद्धाञ्जनम्—The miraculous application which gives a new power to the eye.

S'l. 3. अन्यान्यशास्त्रतरु...इव्यां मया—

Let those whose hearts are pure wear this commentary on the praise of the last Tirthaṁkara (Lord Mahâvira) like a garland made of a few dotrines which have been gathered here and which are like tempting flowers resting on the trees of different systems of philosophy.

प्रमाणसिद्धान्त—A good expression of modesty.

उर्व्यामेष सुधाभुजां गुरुरिति—to be construed with अनुमिति in the second line. It means: the inference that he is the teacher of gods on this earth. त्रैलोक्यविस्तारिणो to be construed with प्रतिभाभरात्—from the rich imagination which extends throughout the three worlds. निर्दम्भम्—rightly, honestly, सुधेति वचनोद्गारं=वचनोद्गारं सुधेति.

संवादमेदस्विनीम्—Construe with सुधा—full of consistency or agreement with truth. The verse is a relative clause, to be construed with ते विश्ववन्द्याः of the next line.

S'l. 6. नागेन्द्रगच्छ०—Who is in the नागेन्द्रगच्छ like the Kaustubha gem on the breast of Vishnu.

नन्द्यासुः—May he (उदयप्रभसूरि-the guru of मल्लिषेण) rejoice

S'l. 7. मनुरविमितशाकाब्दे—*i. e.* in the S'aka year 1214. मनु=१४ (चतुर्दश मनवः); रवि=१२ (द्वादश आदित्याः).

दीपमहसि—On the day of Divâli the thirtieth day of Âśvina.

S'l. 8. साहाय्यो०—Composed and made particularly 'fragrant' by the co-operation or rather help of जिनप्रभसूरि.

S'l. 9. विश्राणे कलिनिर्जयात्—One who has been like Jina (Lord Mahâvîra) owing to his achieving victory over Kali.

मिषात्—This is a commentary on the Song of Praise composed by Hemācārya; but, truth to say, it is not intended to be so much a literary composition as an expression of 'bhakti' towards Hemacandra.

निर्णेतुं etc.—'I do not submit it to the judgment of scholars.'

तस्यास्तित्वम् etc.—The author is confident that there is plenty of spontaneous thought in his work.

Supplementary Notes.

कलिकालसर्वज्ञ—A title well deserved by one who was 'probably the most learned man of his time'.

अन्ययोगव्यवच्छेदिका—The name of the text commented upon by Malliṣeṇa. If means: the work in which the claims of other (non-Jaina) systems of philosophy as expressions of Truth (*i. e.* the whole Truth) are disproved.

स्याद्वादमञ्जरी—The name of the commentary. In disproving the claims of other systems, the Jaina does not allege that they are wholly untrue, but maintains that they are broken lights of one entire Truth for which Jainism stands in its doctrine of Syâdvâda—*i. e.* the doctrine of 'May-be' or partial truths.

सारस्वतः......मन्त्रः—

श्रीरैवतावतारे च तीर्थे श्रीनेमिनामतः ।
सार्थे साधुमते तत्रावात्सीदवहितस्थितिः ॥
निशीथेऽस्याविनिद्रस्य नासाग्रन्यस्तचक्षुषः ।
आराधनात् समक्षाऽभूद् ब्राह्मी ब्रह्ममहोनिधिः ॥
वत्स स्वच्छमते यासीर्मास्य देशान्तरं भवान् ।
तुष्टा त्वद्भक्तिपुष्ट्याहं सेत्स्यतीहितमत्र ते ॥
इत्युक्त्वा सा तिरोधत्त देवी वाचामधीश्वरी ।
स्तुत्या तस्या निशां नीत्वा पश्चादागादुपाश्रयम् ॥
सिद्धसारस्वतोऽक्लेशात् सोमः सीमा विपश्चिताम् ।
अभूदभूमिरुन्निद्रान्तरवैरिकृतद्रुहः ॥

—Prabhâvakacarita of Candraprabhasûri, Hema. Prabandha vv. 42–46.

उदयप्रभः—Author of धर्मशर्माभ्युदय, a महाकाव्य. See Introduction.

दुःषमार—See Hemacandra's Abhidhânacintâmaṇi I. 42.

रैवत—Girnar, made holy by its association with the name of Neminâtha, twenty-second Tirthaṃkara, said to be a contemporary and kinsman of Kṛṣṇa.

ब्राह्मी=सरस्वती. The name points to the original solidarity of Jaina and Brâhmaṇa beliefs.

सोमः=सोमचन्द्रः, the name of हेमचन्द्र before he became a 'सूरि'.

सिद्धसारस्वतः—सिद्धः सारस्वतो (मन्त्रः) यस्य, to be construed with अभूत्.

चातुर्विद्यनिर्माणैकब्रह्मणा—Like Brahmâ who made the four Vedas, Hemacandra made the four vidyâs viz. लक्षण, आगम, साहित्य and तर्क. In earlier Gujarat inscriptions 'चातुर्विद्य' is often used for 'the four Vedas' declared by Brahmâ.

For चातुर्विद्य—Cf. Prabāvakacarita:—

"सोमचन्द्रस्ततश्चन्द्रोज्ज्वलप्रज्ञाबलादसौ ।
तर्कलक्षणसाहित्यविद्याः पर्यच्छिनद्द्रुतम् ॥

—Hema. 37.

Cf. also श्रीसिद्धराजेन वादनिष्णाततां पृष्टाः श्रीहेमाचार्याश्चतसृषु विद्यासु परं प्रावीण्यं बिभ्राणं..........कर्णावतीस्थितं श्रीदेवाचार्यं प्राहुः—Prabodha-cintâmaṇi, where 'the four branches of Knowledge' are, according to Tawney, "त्रयी, the triple Veda; आन्वीक्षिकी, logic and metaphysics; दण्डनीति, the science of government; and वार्ता, practical arts." This meaning does not seem likely, in view of the consensus of explanation given by Jaina writers that the word means लक्षण (Grammar), आगम (Canon), साहित्य (Literature including Poetics) and तर्क (Logic including Metaphysics.)

Bhoja, King of Mâlava, is said to have composed a set of four विद्याs which differed from the above in two. They are s'âstras of (1) शब्द, (2) अलङ्कार, (3) दैवज्ञ-(ज्योतिर्विद् or ज्यौतिष-) and तर्क.

Cf. "असौ हि मालवाधीशो विद्वच्चक्रशिरोमणिः ।
शब्दालङ्कारदैवज्ञतर्कशास्त्राणि निर्ममे ॥"

Prabhâvaka-Hema. 76.

For the meaning of 'लक्षण' cf. ibid:—

संक्षिप्तश्च प्रवृत्तोऽयं समयेऽस्मिन् कलापकः ।
लक्षणं तत्र निष्पत्तिः शब्दानां नास्ति तादृशी ॥

पाणिनेर्लक्षणं वेदस्याङ्गमित्यत्र च द्विजाः ।
अवलेपादसूयन्ति कोर्थऽस्तैरुन्मनायितैः ॥

— ,, 82-83.

श्रीहेमसूरयोऽप्यत्रालोक्य व्याकरणव्रजम् ।
शास्त्रं चक्रुर्नवं श्रीमत् सिद्धहेमाख्यमद्भुतम् ॥
मौलिं लक्षणशास्त्रेषु विश्वविद्वद्भिरादृतम् ॥

— ,, 96-98.

For the origin of the use of the word 'लक्षण' in this sense, Cf. कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् ?—Vyâkaraṇa Mahâbhâṣya, Introduction. The reason for the word लक्षण as applied to Grammar will be found in the following passage which precedes it: "अथैतस्मिन्शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः ? ।.........। कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? किंचित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम् ।—M. Bhâṣya *i. e.* Grammar lays down general rules, and does not deal with each individual word in the language. Cf. also" तस्मात् स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनम् व्याकरणं तु लक्षणप्रधानमिति विशेषः—Durga's Com. on Yâska's Nirukta, where लक्षण=forms in accordance with different senses.

अभयदानाभिधानजीवातु°—Vide "प्रभोरादेशाच्चाज्ञाकारिष्वष्टादशदेशेषु चतुर्दशवत्सरप्रमितां सर्वभूतेषु मारिं निवारितवान्"—Prabandhacintâmaṇi, Kumârapâla Prabandha; also, "श्रीकुमारपालदेवे तु द्वासप्तति सामन्ताः स्वाज्ञां ग्राहिताः । अष्टादशदेशेष्वमारिपटहो दापितः । चतुर्दशदेशेषु मैत्रीबलेनार्थबलेन च जीवरक्षा कारिता"—Kumārapāla Prabandha of Jinamaṇḍana gaṇi.

विज्ञान—See Hemacandra's Abhidhānacintāmaṇi II. 224:—
"पण्डा तत्त्वानुगा मोक्षे ज्ञानं, विज्ञानमन्यतः ।
शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ॥"

अष्टादशदोषसंक्षय—Cf. अन्तराया दानलाभवीर्यभोगोपभोगगाः । हासो रत्यरती भीतिर्जुगुप्सा शोक एव च ॥ कामो मिथ्यात्वमज्ञानं निद्रा चाविरतिस्तथा । रागो द्वेषश्च नो दोषास्तेषामष्टादशाप्यमी ॥—Abhidhāna I. 72-73.

अपायापगम—Destruction of अन्तरायकर्म, one of the *Karmans*, the eighth on the list, which impedes ज्ञान.

महाप्रातिहार्यसपर्या—This consists of the following: "कंकिल्लि कुसुमवुट्ठि देवज्झुणि चामरा सणाइं च । भावलय भेरि छत्तं जयन्ति जिण पाडि-

हेराई ॥" (Pravacana Sâroddhâra XXXIX, 440.) *i. e.* अशोकवृक्ष, कुसुमवृष्टि, दिव्यध्वनि, चामरs, आसनs, भावलय (प्रभामण्डल) भेरी and छत्र.

Cf. "अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यो ध्वनिश्चामरमासनं च। भामण्डलं दुन्दुभिरातपत्रं सत्प्रातिहार्याणि जिनेश्वराणाम्"—Quoted in नन्दिसूत्र हारिभद्रीयवृत्ति. The whole section on जिनस्तुति, in Haribhadra's Com. on Nandisûtra, will be found interesting in this connection.

जे एगं जाणइ etc.—Âcârâṅga I. iii. 1–4. Sûtra 122.

आत्ममात्रतारक etc.—Who brings about his own salvation only. अन्तकृत्—Who puts an end to his karmans. केवली is 'अतीतानागतसूक्ष्मव्यवहितपदार्थवेदी' and is described as 'द्रव्यभावमुण्डनप्रधानस्तथाविधबाह्यातिशयशून्यः।', that is, leading a life of asceticism, with the outward symbol and the inner mentality of the shaven-headed. मुण्डकेवली is thus described: "संविग्नौ भवनिर्वेदादात्मनिःसरणं तु यः। आत्मार्थं संप्रवृत्तोऽसौ सदा स्यान्मुण्डकेवली ॥" —Intense as is the asceticism of the मुण्डकेवलिन्, he still aims at *his own* salvation, and not of the world of living beings, as does the Tîrthâṁkara. Compare the distinction between अर्हत् and बोधिसत्त् or बुद्ध in Buddhism.

चतुस्त्रिंशदतिशयाः—Thirty-four excellences; 4 सहोत्थाः (सहजन्मानः) congenital, 11 कर्मघातजाः *i. e.* accruing from the destruction of karmans, and 19 दैव्याः (देवकृताः) made by gods. For further details see the footnote on p. 22 of Ârhata-Mata-Prabhâkara edition of प्रमाणमीमांसा.

निशीथचूर्णौ etc.—In the Niśîthacûrṇi, 17th Uddeśa,

गुणस्थान—*i. e.* 'Stages in the evolution of the soul' (Jaini). These are thus enumerated in Gommaṭasâra Jîvakâṇḍa, verses 9–10:—मिच्छो सासणमिस्सो अविरदसम्मो य देसविरदो य। विरदापमत्त इदरो अपुव्व अणियट्ट सुहमो य॥ उवसंतखीणमोहो सजोगकेवलिजिणो अजोगी य। चउदस जीव समासा कमेण सिद्धा च णादव्वा ॥—*i. e.* There are fourteen stages of the soul (गुणस्थानs): (1) False belief (मिच्छो or मिच्छे=मिथ्यात्व). (2) Backsliding (सासण=सासादन or सास्वादन); (3) Mixed right and wrong belief (मिस्सो=मिश्र); (4) Right faith, not acted on, that is, lacking in विरति or abstention (अविरदसम्मो अविरतसम्यक्त); (5) Beginning of right conduct (देसविरदो=देशविरतः

i. e. partial renunciation). (6) Slight negligence as to right conduct (विरदापमत्त=प्रमत्त-विरत *i. e.* विरत and yet प्रमत्त occasionally), (7) Right conduct free from all negligence (इदरो=इतरः the other *i. e.* right conduct without negligence अप्रमत्त°) (8) Initiation to the higher life (अपुव्व=अपूर्वकरण *i. e.* unprecedented or unique); (9) Incessant pursuit of the higher life (अणियट्ट अणिवृत्तिकरण); (10) Condition almost devoid of desires (सुहमो=सूक्ष्मसंपराय); (11) Condition entirely devoid of desires (उवसंत=उपशान्ति). *i.e.* (12) Infatuationlessness (खीणमोहो=क्षीणमोहः); (13) Omniscience in the embodied condition (सजोग केवलि=सयोग केवलिन्); and lastly, (14) Omniscience (अजोगी=अयोगकेवलिन्). When this perfection is reached the soul is called Siddha or Perfect. (See Jaini's "Outlines of Jainism" pp. 105–106, and for a fuller account, Mrs. Sinclair Stevenson's "Heart of Jainism" pp. 185 to 192, section on "the fourteen steps to Liberation from Karma").

श्रुतकेवल्यादिषु—Kevalins who were versed in all the parts of the Jaina Canon. These are six and they are enumerated in the Abhidhânacintâmaṇî Ch. I, 33–34—अथ प्रभवः प्रभुः । शय्यंभवो यशोभद्रः संभूतविजयस्ततः । भद्रबाहुः स्थूलभद्रः श्रुतकेवलिनो हि षट् ॥

श्रीवर्धमानाभिधमात्मरूपम् etc.—The whole stanza in the अयोगव्यवच्छेदद्वात्रिंशिका runs as follows:—"अगम्यमध्यात्मविदामवाच्यं वचस्विनामक्षवतां परोक्षम् । श्रीवर्धमानाभिधमात्मरूपमहं स्तुतेर्गोचरमानयामि ॥"

For वर्धमान and the age in which he lived cf. "भगवान् ऋषभस्वामी सुषमदुष्षमारकपर्यन्ते समुदपादि, एकोननवतिपक्षेषु शेषेषु सिद्धिमगमत् । वर्धमानस्वामी तु भगवान् दुष्षमसुषमारकपर्यन्तेषु एकोननवतिपक्षेषु शेषेषु मुक्तिसौधमध्यमाध्यास्त ।.........। उत्सर्पिण्यामपि च प्रथमतीर्थकरो दुष्षमसुषमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जायते, यतो भगवद्वर्धमानस्वामिसिद्धिगगनस्य भविष्यन्महापद्मतीर्थकरोत्पादस्य चान्तरं चतुरशीतिवर्षसहस्राणि सप्तवर्षाणि पञ्च मासाः पठ्यन्ते ।......। तत उत्सर्पिण्यामपि प्रथमतीर्थकरो यथोक्तकालमान एव जायते। तथा उत्सर्पिण्यां चतुर्विंशतितमः तीर्थकरः सुषमदुष्षमायामेकोननवति पक्षेषु व्यतिक्रान्तेषु जन्मासादयति । एकोननवतिपक्षाधिकचतुरशीतिपूर्वलक्षातिक्रमे च सिध्यति। तत उत्सर्पिण्यामवसर्पिण्यां वा दुष्षमसुषमसुषमदुषमयोरेव तीर्थकृतां जन्मनिर्वाणं च ॥"—Malayagiri's Com. on Nandî-sûtra.

St. III.

रूसउ वा परो वा etc.—Cf. "परो रुष्यतु वा मा वा विषवत् प्रतिभातु वा । भाषितव्या हिता भाषा स्वपक्षगुणकारिणी "—quoted in the footnote in A.M.P. edition of Syadvâdamañjarî p. 12 from Hemacandra's S'reṇikacaritra II 32.

न भवति धर्मः etc.—Tattvârtha-Sûtra-Sambandha-Kârika 29, attributed to Umâsvâti by Malliṣeṇa (For the quotation and the authorship of the work see Introduction p. 4 of AMP. editon of तत्त्वार्थ°).

St. VI.

In Notes p. 68 on Page 28 ll. 175–178 of the text read: "The passage that follows is reproduced verbatim in Guṇaratna's T. R. D. pp. 261–62". for "……..is taken verbatim from……" शिपिविष्ट—S'iva. See "स्याद्व्योमकेशः शिपिविष्टभैरवौ "—Abhidhânacintâmaṇi II. 112.

शम्भोरष्टगुणाधिकरणत्वे etc.—बुद्धि, इच्छा, प्रयत्न, संख्या, परिमाण, पृथक्त्व, संयोग and विभाग.

St. VIII.

किं शिखण्डिना सत्तायोगेन—Possession of सत्ता which is fruitless. The allusion is to the famous character (शिखण्डिन्) in the Mahâ-Bhârata, whom Bhîṣma refused to fight because he was originally a girl. शिखण्डिन् was thus neither a male nor a female and, therefore, the word stands for what is fruitless. The whole passage is borrowed from Hemacandra's Pramâna-Mîmâṃsâ I. i. 33: यदि द्रव्यादत्यन्तविलक्षणं सत्त्वं तदा द्रव्यमसदेव भवेत् । सत्तायोगात् सत्त्वमस्त्येवेति चेत् असतां सत्त्वयोगेऽपि कुतः सत्त्वम् । सतां तु निष्फलः सत्तायोगः । स्वरूपसत्त्वं भावान्तमस्त्येवेति चेत् तर्हि किं शिखण्डिना सत्तायोगेन । सत्तायोगान् प्राग्भावो न सन्नाप्यसन् । सत्तासंबन्धात्तु सन्निति चेत् वाङ्मात्रमेतत् सदसद्विलक्षणस्य प्रकारान्तरस्यासंभवात्—see pp. 49-50.

लाक्षणिकाः—Grammarians.

नष्टंभि etc.—उत्पन्नेऽनन्ते नष्टे च छाद्मस्थिके ज्ञाने । रात्र्यां संप्राप्तो महासेनवनमुद्यानम्—छाद्मस्थिकज्ञान is the state immediately preceding केवलज्ञान.

दानादिलब्धिवत्—See तत्त्वार्थसूत्रभाष्य on II. 5:—लब्धयः पञ्चविधा दानलब्धिर्लाभलब्धिर्भोगलब्धिरुपभोगलब्धिर्वीर्यलब्धिरिति—where लब्धि is something like the सिद्धि of Yoga. See Syâdvâda-Ratna.

St. IX.

द्रव्यालङ्कारकारः—Râmacandragaṇi. See Jainagranthâvali p. 73.

गन्धहस्त्यादिषु—गन्धहस्तिभाष्य is said to have been a commentary by Samantabhadra on तत्त्वार्थसूत्र, which is lost. आप्तमीमांसा of Samantabhadra is its Introduction, which has two commentaries one short (अष्टशती) and the other long (अष्टसहस्री) by Akalaṅka and Vidyânandin respectively. The last three are available and have been printed.

St. X.

वैशेषिकनैयायिकयोः समानतन्त्रत्वात्—For the latest discussion on the relative chronology of the Vaiśeṣika and the Nyâya Sûtras see Dr. H. N. Randle's "Indian Logic in the Early Schools" pp. 6-8. I agree in his conclusion.

यौगमत—The Nyâya system of Akṣapâda Gautama. The kinship of Nyâya and Vaiśeṣika is paralleled by the close connection of their religious schools, viz. 'शैव' and 'पाशुपत' which both belong to S'aivism. Guṇaratna observes: "परं शास्त्रेषु नैयायिकाः सदा शिवभक्तत्वात् शैवा इत्युच्यन्ते वैशेषिकास्तु पाशुपता इति ॥" The practice of योग, perhaps in a striking form, which seems to have given the name 'यौगs' to the Naiyâyikas (the school of गौतम अक्षपाद) was, however, no less a feature of the Vaiśeṣika school. Thus, Praśastapâda, a great Vaiśeṣika, concludes his Bhâṣya as follows;

"योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥"

For "the whole text from छलं तत्त्रिधा to इति निग्रहस्थानम् is taken verbatim from Guṇaratna's Tarkarahasyadîpikâ" read "The whole text from छलं तत्त्रिधा to इति निग्रहस्थानम् is reproduced verbatim in Guṇaratna's Tarakarahasyadîpikâ."

In the Bibliography suggested at the end, add Hemacandra's Pramâṇamîmâṃsâ.

अर्थोपलब्धिहेतुः प्रमाणम्—Vâtsyâyana Bhâṣya on the Nyâya-Sûtras, p. 94, l. 5. Quoted also in the Pramāṇamîmāṃsâ I. i. 8, p. 11.

St. XI.

चातुर्गतिकसंसारं etc.—नारक, तिर्यक्, मानुष and देव, enumerated here in the ascending order—perhaps with the exception of Tirthaṃkaras who though men are reckoned as superior to gods. For the classification see Tattvârtha-Sûtra.

त्रेताग्निः—The three fires viz. दक्षिण, आहवनीय and गार्हपत्य.

आरनालः—तन्दुलजातिविशेषः and

धूमांशः—सालवृक्षः साग इति भाषायाम्—says AMP.—I do not know on what authority.

ग्लानाद्यसंस्तरः—'संयमानिर्वाहः' AMP.=failure to observe the vow.

आधाकर्मादि°—आधाय साधूंश्चेतसि प्रणिधाय यत् क्रियते भक्तादि तदाधाकर्म । पृषोदरादित्वादिति यल्लोपः । आधानं साधुनिमित्तं चेतसः प्रणिधानं यथा मुक्तस्य साधोः कारणेन मया भक्तादि पचनीयमिति । आधया कर्म पाकादिक्रिया आधाकर्म । तद्योगाद् भक्ताद्यपि आधाकर्म । *i. e.*—Preparing a dinner with the object of serving it to a Sâdhu.

नवकोटि etc.—"१ स्वयं हननं, २ अन्येन घातनं, ३ अपरेण हन्यमानस्यानुमोदनं, ४ स्वयं पचनं, ५ अन्येन पाचनं, ६ अपरेण पाच्यमानस्यानुमोदनं, ७ स्वयं क्रयणं, ८ अन्येन क्रायणं, ९ अपरेण क्रीयमाणस्यानुमोदनम्—इति मलयगिर्याचार्यकृतायां पिण्डनिर्युक्तिविवृतौ उद्गमद्वारे गा. ४०२"—AMP. footnote on p. 88.

पञ्चकादियतनया etc.—" तत्थेव अन्यगामेवुच्छन्तर असंभरंत जयणाए। संथरणे सणमादि छन्नं कडजोगी गीयत्थे"—प्रथमतस्तत्रैव ग्रामे प्रायोग्यमन्वेषणीयम्। तत्र यदि न लभ्यते तदान्यग्रामेऽपि। अथासावन्यग्रामो दूरतरस्ततोऽन्तरालेऽप्यान्तरालग्राम उषित्वा द्वितीये दिने आनयन्ति। अथैवमप्यसंस्तरणं भवति ततः अकारप्रश्लेषादसंस्तरतोग्लानस्यार्थाय यतनया पञ्चपरिहारिण्या गृह्णन्ति। अथ ग्लानार्थं व्यापृतानां परिचारकाणां संस्तरणं तत एषणादोषेषु आदिशब्दादुद्गमादिदोषेषु च पञ्चकपरिहाण्या यतितव्यम्। अथ प्रतिदिवसं ग्लानप्रायोग्यं न लभ्यते ततश्छन्नमप्रकटं कृतयोगी गीतार्थो वा प्रायोग्यं द्रव्यं परिवासयन्ति। यथाकर्णितछेदश्रुतार्थः प्रत्युच्चारणासमर्थः कृतयोगी यस्तु छेदश्रुतार्थं श्रुत्वा प्रत्युच्चारयितुमीशः स गीतार्थ उच्यते।"—बृहत्कल्पसूत्रे उद्देशे बृहच्छालीयश्रीक्षेमकीर्तिसूरिकृतटीकायाम्। समासार्थोऽपि तत्रैव।"—AMP. footnote on p. 89.

Add as an Appendix to the discussion relating to हिंसा versus अहिंसा the following interesting and parallel passage from Kumârapāla Prabandha of Jinamaṇḍanagaṇi:—

1. न विना जीवघातेन मांसं भवति कुत्रचित्। जीवघातस्तु न श्रेयांस्तस्मान्मांसं परित्यजेत् ॥ १ ॥ न भक्षयति यो मांसं न हन्यान्न च घातयेत्। स मित्रं सर्वभूतानां मनुः स्वायंभुवोऽब्रवीत् ॥२॥ इति मनुस्मृतौ ॥ वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेत तयोः पुण्यफलं समम् ॥ स्कन्दपुराणे—" भोक्ताऽनुमन्ता संस्कर्ता क्रयिविक्रयिहिंसकाः। उपकर्ता घातयिता हिंसकश्चाष्टधाऽधमाः ॥ १ ॥ यः स्वार्थं मांसपचनं कुरुते पापमोहितः। यावन्ति पशुरोमाणि तावत्स नरकं व्रजेत्॥२॥ परप्राणैस्तु ये प्राणान् स्वान् पुष्णन्ति हि दुर्धियः। आकल्पं नरकान् भुक्त्वा ते युज्यन्तेऽत्र तैः पुनः ॥३॥ जातु मांसं न भोक्तव्यं प्राणैः कण्ठगतैरपि। भोक्तव्यं तर्हि भोक्तव्यं स्वमांसं नेतरस्य च ॥४॥ क्व मांसं क्व शिवे भक्तिः क्व मद्यं क्व शिवार्चनम्। मद्यमांसरतानां हि दूरे तिष्ठति शङ्करः ॥ ५ ॥ स्कन्दपुराणे—धनेन क्रायको हन्ति उपभोगेन खादकः। घातको वधबन्धाभ्यामित्येष त्रिविधो वधः ॥

यदि वेदेषु जीवदयाऽस्ति तर्हि सकलशास्त्रसंवादशुद्धां जीवदयां कुर्वाणाः कथं वेदबाह्याः। यदाहुः—अहिंसा प्रथमो धर्मः सर्वशास्त्रेषु विश्रुतः। यत्र जीवदया नास्ति तत्सर्वं परिवर्जयेत ॥ १ ॥ श्रूयतां धर्मसर्वस्वं, श्रुत्वा चैवावधार्यताम्। आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥ २ ॥ सर्वे वेदा न तत् कुर्युः सर्वे यज्ञाश्च भारत। सर्वे तीर्थाभिषेकाश्च यत्कुर्यात् प्राणिनां दयां ॥ ३ ॥ ध्रुवं प्राणिवधो यज्ञे नास्ति यज्ञस्त्वहिंसकः। सर्वसत्त्वेष्वहिंसैव दयायज्ञो युधिष्ठिर ॥ ४ ॥ अथ वेदेषु दया नास्ति तर्हि न प्रमाणं वेदाः नास्तिकधर्मशास्त्रवत्। जीवो यत्र शिवस्तत्र न भेदः शिवजीवयोः ॥ " न हिंस्यात् सर्व भूतानि " इति ॥ न वेदैर्नैव दानैश्च न तपोभिर्न चाध्वरैः। कथंचित्सद्गतिं यान्ति पुरुषाः प्राणिहिंसकाः ॥ इत्यादि धर्मशास्त्राणि जानद्भिः पठद्भिश्च वेदाः सर्वजीवहिंसा मातृपितृगोमेधादियज्ञप्ररूपकाः यैः

प्रमाणीक्रियन्ते तैर्नास्तिकशास्त्राणि कस्मान्निराक्रियन्ते ॥ अन्धे तमसि मज्जामः पशुभिर्ये यजामहे । हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति ॥ ....अथ भगवन् । यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । यज्ञोऽस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥ औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितिं पुनः । इत्यादि वदन्तो द्विजा वेदोक्तहिंसाया धर्मसाधनत्वं प्राहुः तत्कथम् । सूरिः—राजन् । नैतत् सत्यम् । यतः स्कन्दपुराणे—अग्निष्टोमीयमिति या पश्वालम्भनकारिका । सा न प्रमाणं ज्ञातॄणां भ्रामका सा सतामिह ॥ वृक्षांश्छित्त्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् । दग्ध्वा वह्नौ तिलाज्यादि चित्रं स्वर्गोऽभिलष्यते ॥ तथा श्रीभागवतपुराणे त्रयोविंशत्यध्याये शुकः—" ये त्विह दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिन् लोके वैशसे नरके पतितान् निरयपतयो यातयित्वा विशसन्ति " इत्यादि ॥ मीमांसायाम् " अन्धे तमसि मज्जामः पशुभिर्ये यजामहे । हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति ॥" श्रीभागवतपुराण एकादशाध्याये ब्राह्मण उवाच " तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु । न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धोऽनुचकास्ति साधुः " ॥ किंच " यज्ञार्थं पशवः सृष्टा यदीति वदति स्मृतिः । तन्मांसभक्षतः स्मार्ता वारयन्ति न किं नृपान् ॥ यदि यज्ञार्थं पशवः सृष्टास्तर्हि व्याघ्रादिभिर्दैवाः किं न तृप्यन्ते । अहिंसासंभवो धर्मः स हिंसातः कथं भवेत् ॥ न तोयजानि पद्मानि जायन्ते जातवेदसः ॥ तथाच धर्मसमुद्देशे—' आत्मवत् सर्वजीवेषु कुशलवृत्तिचिन्तनम् । धर्मस्याधिगमोपायः शक्तितस्त्यागतोऽप्ययम् ॥ इति ॥ श्रीभोजराजाग्रे धनपालवाक्यम्—' नाहं स्वर्गफलोपभोगतृषितो नाभ्यर्थितस्त्वं मया । संतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव । स्वर्गं यान्ति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बान्धवैः ॥" इत्यादिहेमसूरिवाक्यामृतसिक्तहृदयः श्रीचौलुक्यो वेदोक्तमार्गस्याप्रमाणत्वममन्यत ॥

—Kumârapâlaprabandha.

2. अविशेषश्चोभयोः ॥ १, ६ ॥—उभयोरेव दृष्टादृष्टयोरत्यन्तदुःखनिवृत्त्यसाधकत्वे यथोक्तहेतुत्वे चाविशेष एव मन्तव्य इत्यर्थः । एतदेव कारिकायामुक्तम्—दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः इति । गुरोरनुश्रूयत इत्यनुश्रवो वेदः तद्विहितयागादिरानुश्रविकः । स दृष्टोपायवदेवाशुद्ध्या हिंसादिपापेन विनाशिसातिशयफलकत्वेन च युक्त इत्यर्थः । न न वैधहिंसायाः पापजनकत्वे बलवदनिष्टाननुबन्धेष्टसाधनत्वरूपस्य विध्यर्थस्यानुपपत्तिरिति चेन्न । वैधहिंसाजन्यानिष्टस्येष्टोत्पत्तिनान्तरीयकत्वेनेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकत्वरूपस्य बलवदनिष्टाननुबन्धित्वस्य विध्यंशस्याक्षतेः । यत्तु वैधहिंसातिरिक्तहिंसाया एव पापजनकत्वमिति तदसत् । संकोचे प्रमाणाभावात् । युधिष्ठिरादीनां स्वधर्मेऽपि युद्धादौ ज्ञातिवधादिप्रत्यवायपरिहाराय प्रायश्चित्तश्रवणाच्च । तस्माद्यास्यामहं तात दृष्ट्वेमं दुःखसंनिधिम् । त्रयीधर्ममधर्माढ्यं किंपाकं फलसंनिभम् । इति मार्कण्डेयवचनाच्च । अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुतिस्तु वैधातिरिक्तहिंसानिवृत्तेरिष्टसाधनत्वमेव वक्ति न तु वैधहिंसाया अनिष्टसाधनत्वाभावमपीत्यादिकं योगवार्तिके

द्रष्टव्यमिति दिक् ॥ दुःखाद् दुःखं जलाभिषेकवन्न जाड्यविमोकः ॥ १८४ ॥ आनुश्रविकात्तु हिंसादिदोषेण दुःखात्मकभोगेन च दुखाद् दुःखं दुःखधारैव भवति, न तु जाड्यविमोकोऽविवेकनिवृत्तिः। दुःखविमोकस्त्वतिदूर एव तिष्ठति। यथा जाड्यार्तस्य जलाभिषेकाद् दुःखनिवृत्तिरेव भवति न तु जाड्यविमोक्ष इत्यर्थः। तदुक्तम्--यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम्। भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति।

—Sâmkhya-sûtras with Bhâṣya.

3. A few texts bearing on the subject of अहिंसा will also be found in Mâṭhara-Vṛtti on the Sâṃkhya Kârikâs.

4. For a fairly long list of texts bearing on अहिंसा and यज्ञ and translated in the various volumes of the "Sacred Books of the East" see "*Ahiṃsâ*" in (a) Jaina religion, (b) in Buddhism and (c) in Brahmanism on pp. 30–32 and "Sacrifice—(d) Relative value or worthlessness of sacrifice, and symbolical sacrifice" on pp. 482–83 in Winternitz' "Concise Dictionary of Eastern Religion."

5. A most interesting and instructive treatment of the subject with a long list of quotations made from the MBh and the Puraṇas and the Smṛtis will be found in the edition of the Sâmkhya Kârikas with Sâṃkhya-Tattvakaumudi annostated by Bâlârama Udâsîna of Benares.

The texts of S'ruti, Smṛti, Mahâbhârata and Purâṇas, as well as the views of Sâmkhya, Vedânta and Bhakti schools of religion cited in the Syâdvâdamañjari and in the extracts given above leave no doubt that there was a strong body of opinion even in Brahmanism which revolted against हिंसा, even वैधहिंसा (*i. e.* हिंसा prescribed in S'âstras, such as animal slaughter in a sacrifice). This trend of thought seems to have come down from times earlier than the rise of Jainism and Buddhism, mainly in the Bhakti and Jñâna schools as distinguished from the ritualist school of Brahmanism.

St. XII.

मीमांसकभेदभट्टानाम्—The school of Kumârila Bhaṭṭa is one of the two famous schools of Mîmâṃsâ *i. e.* Pûrva Mîmâṃsâ;

the other being that of Prabhâkara or 'Guru' as he is generally styled. The differences of the two schools on certain problems of philosophy are radical. See Dr. Ganganath Jha's thesis on the "Prabhâkara School."

यौगानां—see supra.

लब्ध्युपयोगं—लब्धिः=अर्थग्रहणशक्तिः, उपयोगः=अर्थग्रहणव्यापारः
(Footnote in AMP. p. 95).

"लब्ध्युपयोगौ भावेन्द्रियम्—लब्धिरुपयोगश्च भावेन्द्रियं भवति। लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीयकर्मक्षयोपशमजनिता चेन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवति। सा पञ्चविधा। तद्यथा। स्पर्शनेन्द्रियलब्धिः, रसनेन्द्रियलब्धिः, घ्राणेन्द्रियलब्धिः, चक्षुरिन्द्रियलब्धिः, श्रोत्रेन्द्रियलब्धिरिति"—Tattvârtha Sûtra II. 18 and Bhâṣya. भावेन्द्रियs *i. e.* subjective senses. Sense-faculties are of two kinds: (1) लब्धि (it is the attainment of manifestation of the sense-faculty by the partial destruction, subsidence and operation of the knowledge-obscuring karma relating to that sense.); (2) उपयोग (the conscious attention of the soul directed to that sense.)—Tattvârtha translated by Mr. J. L. Jaini in "The Sacred Books of the Jainas." More briefly, "इन्द्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः तन्निमित्तः परिणामविशेष उपयोगः।" (Headnote to the Tattvârtha-S'loka-Vârtika on T. S. II. 18).

भट्टास्तावदिदं वदन्ति—Partly drawn from Ratnaprabhâcârya's Ratnâkarâvatârikâ on P. N. T. (p. 37) and simplified: Cf. अत्रेयं भट्टचट्टघट्टना—ननु न स्वसंवेदनं वेदनस्य सुन्दरम्। स्वात्मनि क्रियाविरोधात् इत्यस्य पारोक्ष्यमेवाक्षुण्णं कक्षीकरणीयम्। तदेतदरमणीयम्। यतः—किमुत्पत्तिः ज्ञप्तिर्वा स्वात्मनि विरुध्येत? । यद्युत्पत्तिः, सा विरुध्यताम्। न हि ज्ञानमात्मानमुत्पादयतीति वयमध्यगीष्महि। अथ ज्ञप्तिः, नेयमात्मनि विरोधमदीधरत्। तदात्मनैव ज्ञानस्य स्वकारणकलापादुत्पादात् प्रकाशात्मनेव प्रदीपाकलिकालोकस्य। अथ प्रकाशात्मनैव प्रदीपालोकोऽयमुदयमासिवानिति परप्रकाशकोऽस्तु, आत्मानमप्येतावन्मात्रेणैव प्रकाशयतीति तु कौतुस्कुती नीतिः? इति चेत्। तत् किं तेनाप्रकाशितेनैव वराकेण स्थातव्यम् आलोकान्तराद् वा प्रकाशेनास्य भवितव्यम्?। प्रथमे, प्रत्यक्षबाधा। द्वितीयेऽपि, सैवानवस्थापत्तिश्च। अथ नाऽसौ स्वमपेक्ष्य कर्मतया चकास्ति, इत्यप्रकाशकः स्वीक्रियते, प्रकाशरूपतयानूत्पन्नत्वात् स्वय प्रकाशत एवेति चेत् अनेनैव सुधामहि। नहि वयमपि ज्ञानं कर्मतयैव प्रतिभसमानं स्ववेद्यमावेदयामहि, ज्ञानं स्वयं प्रतिभासत इत्याद्यकर्मकस्य तस्य

चकामनात्। यथा तु ज्ञानं जानामीति कर्मतयापि तद् भाति यथा प्रदीपः स्वं प्रकाशयतीत्ययमपि तथा प्रथत एव।.........

सत्संप्रयोगे........ इत्येवं त्रिपुटीकल्पना भट्टानां प्रयासफलैव ॥ Cf. Hemacandra's Pramâṇamîmâṃsâ for the necessary grounds: येऽपि "तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षं यद्विषयं ज्ञानं तेन संप्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म। सत्प्रत्यक्षं यदन्यविषयं ज्ञानमन्यसंप्रयोगे भवति न तत्प्रत्यक्षम्"—इत्येवं तत्सर्वतो व्यत्ययेन लक्षणमनवद्यमित्याहुः—तेषामपि क्लिष्टकल्पनैव संशयज्ञानेन व्यभिचारानिवृत्तेः। तत्र हि यद्विषयं ज्ञानं तेन संप्रयोग इन्द्रियाणामस्त्येव। यद्यपि चोभयविषयं ज्ञानं तथापि तयोरन्यतरेणेन्द्रियेण संयुक्तमेव। उभयावमर्शित्वाच्च संशयस्य। तेन संयुक्तं चक्षुस्तद्विषयमपि तज्ज्ञानं भवत्येवेति नातिव्याप्तिपरिहारः। अव्याप्तिश्च चाक्षुषज्ञानस्येन्द्रियसंप्रयोगत्वाभावात्। अप्राप्यकारि च चक्षुरित्युक्तप्रायम् ॥

यौगास्त्वाहुः—The whole of this is substantially and almost verbatim taken from Ratnaprabhācārya's Ratnākarāvatārikā. Cf. 'अथ यौगाः संगिरन्ते—अहो आर्हताः नास्मिन् मीमांसके वराके व्यपाकृतेऽपि संवेदने स्वसंवेदनदोहदः पूरयितुं पार्यते। तथाहि—ज्ञानं स्वान्यप्रकाश्यम् ईश्वरज्ञानान्यत्वे सति प्रमेयत्वात् यदेवं तदेवं यथा घटः तथा चेदं तस्मात्तथा। समुत्पन्नं हि ज्ञानमेकात्मसमवेतानन्तरसमयसमुत्पादिष्णुमानसप्रत्यक्षेणैव लक्ष्यते न पुनः स्वेन। न चैवमनवस्थावल्लेरुल्लासः अर्थावसायिवेदनोत्पादमात्रेणैवार्थसिद्धेः तद्धि पदार्थपरामर्शस्वभावमेवइत्युत्पन्नमात्रमेव पदार्थप्रथामनोरथस्थितं कृतार्थयति प्रमातारम्। अर्थज्ञानजिज्ञासायां तु तत्रापि ज्ञानमुत्पद्यत एवेति।

तदेतदेतेषां मतेस्तरलतां तनोति। प्रकटितप्रयोगे पक्षस्यानुमानेन मानखण्डनात्। तथा च तावकाकूनेन तत्र हेतोः कालात्ययापदिष्टत्वनिष्टङ्कनाच्च। तथाहि—विवादास्पदं ज्ञानं स्वसंविदितं ज्ञानत्वात् ईश्वरज्ञानवत्। वाद्यसिद्धमेतन्निदर्शनम् जैनैरीश्वरास्वीकारेण तज्ज्ञानस्य तेषामप्रसिद्धेः इति चेत्। तदचतुरस्रम्। अनवद्यविद्याविद्याधरीबन्धुरपरिष्वङ्गस्य पुरुषातिशेषविशेषस्य खण्डपरशोः स्वीकारात् त्रिविष्टपघटनलम्पटपटिम्नः सकलावलोकनकौशलशालिन एव चास्य तिरस्कारात्। व्यर्थविशेष्यश्चात्र हेतुः। समर्थविशेषणोपादानेनैव साध्यसिद्धेः धूमध्वजसिद्धौ धूमवत्त्वे सति द्रव्यत्वादितिवत्। न हीश्वरज्ञानादन्यत् स्वसंविदितमप्रमेयं चास्ति यदपोहाय प्रमेयत्वादिति क्रियते। अप्रयोजकश्चायं हेतुः। सोपाधिकत्वात्। साधनाव्यापकः साध्येन समव्याप्तिकः खलूपाधिरभिधीयते तत्पुत्रत्वादिना श्यामत्वे साध्ये शाकाद्याहारपरिणामवत्। कः पुनरुपाधिरत्र सूक्ष्मेक्षणैरीक्षाञ्चक्रे इति चेत् उच्यते—निबिडजडिमन् जडिमलक्षणः। तथाहि—ईश्वरज्ञानान्यत्वे प्रमेयत्वे सत्यपि यदेव जडिमपात्रं पात्रादि तदेव स्वस्मादन्येनैव प्रकाश्यते। स्वप्रकाशे

परमुखोत्प्रेक्षितत्वं हि जडस्य लक्षणम् । न च ज्ञानं जडस्वरूपम् इति सिद्धं साधनाव्यापकत्वं जाड्यस्य साध्येन समव्याप्तिकत्वं चास्य स्पष्टमेव जाड्यं विहाय स्वप्रकाशाभावस्य तं च त्यक्त्वा जाड्यस्य क्वचिदप्यदर्शनादिति ॥

यच्चोक्तं समुत्पन्नं हि ज्ञानमेकात्मसमवेतेत्यादि तदपि नावितथम् । इत्थमर्थज्ञानतज्ज्ञानयोरुत्पद्यमानयोः क्रमानुपलक्षणात् । आशूत्पादादत्र क्रमानुपलक्षणमुत्पलपत्रशतव्यतिभेदवदिति चेत् । तद्चारु । जिज्ञासाव्यवहितस्यार्थज्ञानज्ञानस्योत्पादप्रतिपादनात् । न च जिज्ञासासमुत्पाद्यत्वं संवेदनानां संगच्छते । अजिज्ञासितेष्वपि योग्यदेशेषु गोचरेषु तदुत्पादप्रतीतेः । न चायोग्यदेशमर्थज्ञानम् । आत्मसमवेतस्यास्य समुत्पादात् इति जिज्ञासामन्तरेणैवार्थज्ञाने ज्ञानोत्पादप्रसङ्गः । बाढमुत्पद्यतां नामेदम् । को दोषः इति चेत् । नन्वेवमेव तज्ज्ञानज्ञानेऽप्यपरज्ञानोत्पादप्रसङ्गः । तत्रापि चैवमेवायम् । इत्यपरापरज्ञानोत्पादपरम्परायामेकात्मनो व्यापाराद् न विषयान्तरसंचारः स्यात् । इति न ज्ञानस्य ज्ञानान्तरज्ञेयताऽपि युक्तिमार्गमवगाहते ॥

1. The position of the Jainas on the problem, whether ज्ञान is स्वतोग्राह्य (स्वयंप्रकाश) or परतोग्राह्य (परप्रकाश) is thus stated in the P. N. T. स्वपरव्यवसायिज्ञानं प्रमाणम् (I. 2.) ज्ञानादन्योऽर्थः परः (I. 15.) तदुभयमुत्पत्तौ परत एव, ज्ञप्तौ तु स्वतः परतश्च (I. 20).

2. See on a kindred point, Anantavîrya's लघुवृत्ति on Mâṇikyanandin's परीक्षामुखसूत्रः—

अत्र भवतु नाम उक्तलक्षणलक्षितं प्रमाणं तथापि तत्प्रामाण्यं स्वतः परतो वा । न तावत् स्वतः अविप्रतिपत्तिप्रसङ्गात् । नापि परतोऽनवस्थाप्रसङ्गात् । इति मतद्वयमाशङ्क्य तन्निराकरणेन स्वमतमवस्थापयन्नाह ॥...... अभ्यासदशायां स्वतोऽनभ्यासदशायां च परत इति । तेन प्रागुक्तैकान्तद्वयनिरासः । न चानभ्यासदशायां परतः प्रामाण्येऽप्यनवस्था समाना । ज्ञानान्तरस्याभ्यस्तविषयस्य स्वतः प्रमाणभूतस्याङ्गीकरणात् ॥

In a portion of his commentary Malliṣeṇa has drawn upon Hemacandra's gloss on his (Hemacandra's) own work—प्रमाणमीमांसाः—

नन्वनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गः । मैवं वोचः । ज्ञातुर्ज्ञातृत्वेनेवानुभूतेरनुभूतित्वेनैवानुभवात् । न चानुभूतेरनुभाव्यत्वं दोषः । अर्थापेक्षयानुभूतित्वात्, स्वापेक्षयाऽनुभाव्यत्वात् । स्वपितृपुत्रापेक्षयैकस्य पितृत्वपुत्रत्ववद्विरोधाभावात् । न च स्वात्मनि क्रियाविरोधः । अनुभवसिद्धेऽर्थे विरोधासिद्धेः । अनुमानाच्च स्वसंवेदनसिद्धिः । तथाहि—ज्ञानं प्रकाशमानमेवार्थं प्रकाशयति प्रकाशकत्वात् प्रदीपवत् संवेदनस्य प्रकाशकत्वात् । प्रकाशकमसिद्धमिति चेत्

न। अज्ञाननिरासादिद्वारेण प्रकाशकत्वोपपत्तेः। न च नेत्रादिभिरनैकान्तिकता। तेषां भावेन्द्रियरूपाणामेकमेव प्रकाशकत्वात् भावेन्द्रियाणां च स्वसंवेदनरूपतैव न व्यभिचारः। तथा संवित् स्वप्रकाशा अर्थप्रतीतित्वात्। यः स्वप्रकाशो न भवति नासावर्थप्रतीतिर्यथा घटः तथा यज्ज्ञानं तदात्मबोधं प्रत्यनपेक्षितपरव्यापारं यथा गोचरान्तरग्राहि ज्ञानप्राग्भाविगोचरान्तरग्राहि ज्ञानप्रतिबन्धस्यान्त्यज्ञानम्। ज्ञानं च विवादाध्यासितं रूपादिज्ञानमिति संवित् स्वप्रकाशे स्वावान्तरजातीयं नापेक्षते वस्तुत्वात् घटवत्। संवित् परप्रकाश्या वस्तुत्वात् घटवदिति चेत् न। अस्याप्रयोजकत्वात्। न खलु घटस्य वस्तुत्वात् परप्रकाश्यता अपि तु बुद्धिव्यतिरिक्तत्वात् ॥

Cf. also Hemacandra: स्वपराभासी परिणाम्यात्मा प्रमाता ॥ Pr. M. स्वमात्मानं परं चार्थमाभासयितुं शीलं यस्य स स्वपराभासी स्वोन्मुखतया चावभासनात् घटमहं जानामीति कर्मकर्तृक्रियाणां प्रतीतेः। अन्यतरप्रतीत्यपलापे प्रमाणाभावात्। न च परप्रकाशकत्वस्य स्वप्रकाशकत्वेन विरोधः प्रदीपवत्। नहि प्रदीपः स्वप्रकाशे परमपेक्षते। अनेनैकान्तस्वाभासिपराभासिवादिनिरासः ॥ (Pr. Mîm. 1.1.43 & Com.)

Note that Hemacandra's definition of प्रमाण differs from that of the authors of the Parîkṣâmukha Sûtra and its Vṛitti. He says: ननु च परिच्छिन्नधर्मं परिच्छिन्दता प्रमाणेन पिष्टं पिष्टं स्यात् तथा च गृहीतग्राहिणां धारावाहिकज्ञानानामपि प्रामाण्यप्रसङ्गः। ततोऽपूर्वार्थनिर्णय इत्यस्तु लक्षणम्। यथाहुः स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् इति। तथा अपूर्वार्थविज्ञानम्-इति च तत्राह—ग्रहीष्यमाणग्राहिण इव गृहीतग्राहिणोऽपि नाप्रामाण्यम्। (१-१-४) ॥

अयमर्थः द्रव्यापेक्षया वा गृहीतग्राहित्वं विप्रतिषिध्येत पर्यायापेक्षया वा। तत्र पर्यायापेक्षया धारावाहिकज्ञानानामपि गृहीतग्राहित्वं न संभवति। क्षणिकत्वात् पर्यायाणाम्। तत्कथं तन्निवृत्त्यर्थं विशेषणमुपादीयते। अथ द्रव्यापेक्षया। तदप्ययुक्तम्। द्रव्यस्य नित्यत्वादेकत्वेन गृहीतग्रहीष्यमाणावस्थयोर्न भेदः। ततश्च कं विशेषमाश्रित्य ग्रहीष्यमाणग्राहिणः प्रामाण्यं न गृहीतग्राहिणः। अपि च अवग्रहादीनां गृहीतग्राहित्वेऽपि प्रामाण्यमिष्यत एव ॥

प्रमाणं स्वपराभासि ज्ञानं बाधविवर्जितम्।—Nyāyāvatāra 1.

—इह च व्यवच्छेद्यापेक्षया लक्षणे विशेषणप्रवृत्तेः स्वपराभासि इत्यनेन ये स्वाभास्येव ज्ञानं मन्यन्ते ज्ञानवादिनो बौद्धविशेषाः ये च पराभास्येव मीमांसकनैयायिकादयः ते निरस्ताः ॥—Com. by Siddharṣi.

सर्वज्ञानमनध्यक्षं प्रत्यक्षोऽर्थः परिस्फुटः।
इति केचिदनात्मज्ञाः प्रमाणव्याहतं विदुः ॥

प्रत्यक्षमात्मनि ज्ञानमपरत्रानुमानिकम् ।
प्रत्यात्मवेद्यमाहन्ति तत्परोक्षत्वकल्पनाम् ॥
विज्ञानस्य परोक्षत्वे प्रत्यक्षोऽर्थः स्वयं कथम् ।
सर्वदा सर्वथा सर्वः सर्वस्य न तथा भवेत् ॥
ततः परं च विज्ञानं किमर्थमुपकल्प्यते ।
कादाचित्कत्वसिध्यर्थमर्थज्ञप्ते न सा परा ॥
विज्ञानादित्यनध्यक्षात् कुतो विज्ञायते परः ।
लिङ्गाचेत् तत्परिच्छित्तिरपि लिङ्गान्तरादिति ।
क्वावस्थानमनेनैव तयार्थापत्तिराहता ।
अविज्ञातस्य सर्वस्य ज्ञापकत्वविरोधतः ॥
स्वसंवेद्यान्तरादन्याद्विज्ञानं किं करिष्यते ।
करणेन विना कर्तुः कर्माणि व्यावृतिर्न चेत् ॥
स्वसंवित्तिक्रिया न स्यात् स्वतः पुंसोऽर्थवित्तिवत् ।
यदि स्वात्मा स्वसंवित्तावात्मनः करणं मतम् ॥
स्वार्थवित्तौ तदेवास्तु ततो ज्ञानं स एव नः ।
ज्ञानं ज्ञानान्तराद्वेद्यं स्वात्मज्ञप्तिविरोधतः ।
प्रमेयत्वाद्यथा कुम्भ इत्यप्यश्लीलभाषितम् ॥
ज्ञानान्तरं यदी ज्ञानादन्यस्मात्तेन विद्यते ।
तदानवस्थितिप्राप्तेरन्यथा ह्यविनिश्चयात् ॥
अर्थज्ञानस्य विज्ञानं नाज्ञातमवबोधकम् ।
ज्ञापकत्वाथाक्षालिङ्गलिङ्गिनो नान्यथा स्थितिः ॥

4. नान्यथा ह्यर्थसद्भावो दृष्टः सनुपपद्यते ।
ज्ञानं चेन्नेत्यतः पश्चात् प्रमाणमुपजायते ॥
—S'l. Vârt. V. S'ûnyavâda 182.

तत्र केचिदाहुः । सर्वथा तावदस्ति ज्ञानम् । तथा हि विद्यमान एव हि घटः कस्यचिदेव व्यवहारयोग्यतामापद्यते न सर्वेषां, नापि सर्वदा; तदवश्यं यो यदा तेन व्यवहरति तस्य तद्व्यवहारानुगुणः कश्चिदतिशयः संजात इति कल्पनीयम् स ज्ञानम् इति ॥ सत्यम् । एवं सिध्यति ज्ञानं किंतु प्रागपि व्यवहारादवगम्यते ज्ञानम् अव्यवहरन्नपि ज्ञातोऽयमर्थो मयेति आत्मनाऽर्थस्य ज्ञानत्वमनुसंधत्ते इति सर्वजनीनमेतत् । न च ज्ञानमविदुषां ज्ञातत्वरूपत्वं शक्यं वेदितुम् यदेव प्रागेव व्यवहारादुपजायमानो ज्ञातत्वावगमोऽसति ज्ञानस्य प्रत्यक्षत्वे कथमुपपद्यते ॥ अत्राहुः । ज्ञानजन्योऽर्थगतः कश्चिदतिशयः प्रकाशनभासनादिपर्यायपदवाच्यः । स च पाकगन्धौनादिगतातिशयवदनवरातेऽपि ज्ञाने शक्यतेऽवगन्तुम् । अतः ज्ञानस्य कल्पक इति । सत्यम् अस्त्यतिशयः, स च प्रत्यक्षेऽर्थे प्रत्यक्षावगतः कल्पयेदपि ज्ञानम् । अनुमानादिषु तु तस्या-

प्रत्यक्षत्वात् प्राग्व्यवहारात्तु व्याप्तलिंगाभावादप्रमितस्य चाकल्पकत्वान्न ज्ञानं कल्पयेत्। अनुमितेऽपि चार्थे ज्ञातो मयाऽग्निरिति अग्निं ज्ञातमनुसंधत्ते। अतस्तत्त्वं वक्तव्यम्। ज्ञाने प्रमाणमुच्यते। ज्ञानक्रियाजनितो ज्ञातुर्ज्ञेयेन सहाप्तत्वसंबन्धः। स मानसप्रत्यक्षावगतो ज्ञानं कल्पयति सत्यां जिज्ञासायाम्। यत्रापि च कश्चिदर्थमनुभूय तद्विषयं ज्ञानमकल्पयित्वैव कालान्तरे तमर्थं स्मरामि तत्रापि स्मृतिज्ञानेनैवात्मनोऽर्थस्य च दृश्यदृष्टत्वसंबन्धे निष्पन्ने मानसप्रत्यक्षेण चावगते तद्बलेन च ज्ञाने कल्पिते तस्य ज्ञानस्येन्द्रियादिप्रत्युत्पन्नकारणाऽसंभवेन स्मृतित्वं निश्चित्य तदनुपपत्त्या पूर्वानुभवः कल्प्यते। यथोक्तं तदैव ह्यस्य संवित्तिर्यापत्त्योपजायते इति। कः पुनरसौ संबन्धः? उक्तं प्राप्तिरिति। येऽपि च स्वप्रकाशां संविदं मन्यन्ते तेषामपि स्वोत्पत्तिसमये संवित्तिः स्वात्मानं कर्तारं वेद्यं च भासयति न तु स्वस्य वेत्तुर्वा संवेद्यसंबन्धः तस्य तदाऽनिष्पन्नत्वेनासत्त्वात् ततो निष्पन्नायां संवित्तौ तस्याः कर्तुश्च तद्द्वारा विषयसंबन्धे जाते ततो मानसेनैव प्रत्यक्षेणाऽर्थेन सह संवित्तेः संवेत्तुश्च संबन्धोऽवभासते इति अङ्गीकर्तव्यम्। संविदन्तरोत्पत्तिसमये च पूर्वसंविदा नष्टत्वान्न तद्धर्मत्वेन संवेद्यसंबन्धः शक्यते प्रत्यक्षेण ग्रहीतुमिति संवेत्तृधर्मभूत एव संवेद्यसंबन्धः कोऽपि नाम सर्वजनीनः प्राप्तिपर्यायो गृह्यत इति तत एव संवित्तिरूपक्रियाकल्पनासिद्धेरलं स्वप्रकाशतया। तत्सिद्धयुत्पत्तिवेलायामर्थस्य दृष्टत्वाभावेन फलांशाभावात् न ज्ञानं गृह्यते पश्चात्तु दृष्टत्वांशेन गृह्यत इति ॥

—Nyâyaratnâkara pp. 319–21.

In the Bibliography given at the end of the Notes on this Stanza, add Catuh–Sûtrî, Sûtra I, after S'rî-Bhâṣya on अनुभूति.

To the list add:

4. Tattvârtha S'loka-Vârtika I. Sûtra 10. Verses 35 etc.

And, for S'loka Vârtika on Sûtra 2–4 substitute Kumârila's S'loka Vârtika on प्रत्यक्षसूत्र relevant verses; more especially S'l. Vârt. on 182 etc. on Sûtra V.

St. XIII.

"सर्वं खल्विदं ब्रह्म etc." and "आहुर्विधातृप्रत्यक्षं etc." are quotations which seem to have been borrowed from Devasûri's Syâdvâda–Ratnâkara, the author's own commentary on P.N.T. where they are quoted.

आहुर्विधातृप्रत्यक्षं etc.—This verse, with a difference, occurs in the Tattvârtha S'loka Vârtika as a reply to the verse as it stands here. (See Aṣtasahasrî, Gândhi Nâthâraṅga Jaina Granthamâlâ, pp. 94–95.) Thus:—

आहुर्विधातृप्रत्यक्षं न निषेद्धृ विपश्चितः ।
न नानात्वागमस्तेन प्रत्यक्षेण विरुध्यते ।

भवतु नाम विधातृप्रत्यक्षमनिषेद्धृ च तथापि तेन नानात्वविधायिनो नागमस्य [सन्त्यनन्ता जीवा इत्यस्य] विरोधः संभवति एकत्वविधायिन इव । विधायकत्वाविशेषात् । कथमेकत्वमनिषेधत् प्रत्यक्षं नानात्वमात्मनो विदधातीति चेत्, नानात्वमनिषेधदेकत्वं कथं विदधीत ? । तस्यैकत्वविधानेन नानात्वप्रतिषेधकत्वमिति चेत् तदेकत्वस्य किम् ? । न ह्यस्मदादिप्रत्यक्षमिन्द्रियजं मानसं वा स्वसंवेदनमेक एवात्मा सर्वं इति विधातुं समर्थं नानात्मभेदेषु तस्य प्रवृत्तेः । योगिप्रत्यक्षसमर्थमिति चेत्, पुरुषनानात्वमपि विधातुं तदेव समर्थमस्तु तत्पूर्वकागमश्चेत्यविरोधः । स्वसंवेदनमेवास्मदादेः स्वैकत्वस्य विधायकमिति चेत्, तथान्येषां स्वैकत्वस्य तदेव विधायकमस्तुमन्यताम् । कथं—

यथैव च ममाध्यक्षं विधातृ न निषेद्धृ वा ।
प्रत्यक्षत्वात्तथान्येषामन्यथैतत्तथा कुतः ॥

परेषां प्रत्यक्षं स्वस्य विधायकं परस्य न निषेधकं वा, प्रत्यक्षत्वात्, मम प्रत्यक्षवत् । विपर्ययो वा अतिप्रसङ्गविपर्ययाभ्यां प्रत्यात्मसंवेदनस्यैकत्वविधायित्वासिद्धेरात्मबहुत्वसिद्धिरात्मैकत्वासिद्धिर्वा । न च विधायकमेव प्रत्यक्षमिति नियमोऽस्ति निषेधकत्वेनापि तस्य प्रतीयमानत्वात् ॥

It will be noticed that while the verse in the text is the Vedântic plea, the verse in the T. S. Vârtika is a reply to it in the same language taking up the contrary position.

अस्ति ह्यालोचनाज्ञानं etc.—This verse (Mîm. S'l. Vārtika on Sûtra IV (Pratyakṣa), 112) has been explained thus by Pārthasārathi in his commentary: यस्तु.........सर्वमेव ज्ञानं शब्दानुविद्धत्वात् सविकल्पकमेव न किंचिन्निर्विकल्पकमस्तीति मन्यते तं प्रत्याह— अस्तीति । बालानामिवाव्युत्पन्नानामस्माकमपि चक्षुःपातानन्तरं सविकल्पकात् प्रथममस्ति निर्विकल्पकं प्रतीतिसिद्धमालोचनविज्ञानं शुद्धवस्तुविषयं, तदभावे हि निर्निमित्तं शब्दस्मरणं स्यात् अस्मृतशब्दस्य च शब्दानुविद्धो विकल्पो न संभवतीति शुद्धवस्तुजमित्येतद्विवृणोति । न विशेषो न सामान्यं तदानीमनुभूयते । तयोराधारभूता तु व्यक्तिरेवावसीयते ॥

प्रत्यक्षाद्यवतारः स्यात्—This is the Mîmāṃsaka's and Vedāntin's plea for refusing to admit अभाव as a विषय of प्रत्यक्ष or any of the other प्रमाणs recognised by the Naiyâyika, and consequently for setting up a special प्रमाण for apprehending अभाव, called अनुपलब्धि. The verses on this point run as follows in Mîm. S'l. Vârt. V. 17–18:—

प्रत्यक्षाद्यवतारस्तु भावांशो गृह्यते यदा ।
व्यापारस्तदनुत्पत्तिरभावांशे जिघृक्षिते ॥

—*i. e.* प्रत्यक्ष is possible when something positive, or the positive aspect of a thing, is apprehended; but when अभाव—a negation or negative aspect of a thing—has to be apprehended, the method by which this is done is the fact of 'तदनुत्पत्ति'—*i. e.* प्रत्यक्ष etc. do not arise here to testify to anything positive. This is made clear in the next verse in the Mîm. S'l. Vârt.

न तावदिन्द्रियैरेषा नास्तीत्युत्पद्यते मतिः ।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥

निर्विशेषं हि सामान्यं etc.—The preceding verse (Mîm. S'l. Vārt. V.-आकृतिवाद, 9) will explain this:

अन्योन्यापेक्षिता नित्यं स्यात् सामान्यविशेषयोः ।
विशेषाणां च सामान्यं ते च तस्य भवन्ति हि ॥

—समानानां हि भावः सामान्यं तत्कथमस्तु बहुषु विशेषेषु स्यात् इदं च विशेषाणां विशेषत्वं यत्समानात्मनो भावात् विशिंषन्ति । तेनान्यतरेण विनेतरस्यात्मलाभाभावात् तस्यापि सिद्धिरिति—

तदेवमुपपादितं द्व्याकारत्वं प्रयोगेण दर्शयति—निर्विशेषं न सामान्यं भवेच्छशविषाणवत् । सामान्यरहितत्वाच्च विशेषास्तद्वदेव हि ॥ निर्विशेषं परकल्पितं सामान्यं धर्मि; नास्तीति साध्यं, तथा निःसामान्या विशेषा न सन्तीति; विशेषरहितत्वात् सामान्यरहितत्वादिति हेतुद्वयम् ॥......

तेन नात्यन्तभेदोऽपि स्यात् सामान्यविशेषयोः ।

The reader will notice how the Mîmâṁsaka, in recognising this aspect, admits the Jaina doctrine of अनेकान्त.

निर्विशेषं हि सामान्यम्—This occurs in Kumârila's S'l. Vârt. Âkṛti. Cf. सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका । जायते ह्यात्मकत्वेन

विना सा च न सिध्यति ॥ (S'l. Vârt. Âkṛti-vâda 5) विशेषमात्र इष्टे च न सामान्यमतिर्भवेत् । सामान्यमात्रबोधेन न निर्निमित्ता विशेषधीः ॥ (ibid. 6) —"यदि तावदसाधारणं स्वलक्षणमेव वस्तु स्यान्न सामान्यं यथा सौगतैरुच्यते ततोऽयं गौरयमपीति सामान्यबुद्धिर्न स्यात् । यदि तु गोत्वादिशाबलेयादिविशेषाननुवृत्तव्यावृत्तात्मनोऽपह्नुत्य महासामान्यं सन्मात्रमेव वस्त्वङ्गीक्रियते यथा वेदान्तवादिभिरुच्यते ततो गौरयमश्वोयं शाबलेयोयमिति विशेषबुद्धिर्न स्यात् ॥" —Nyâyaratnâkara, Com. on S'l. Vârt.

Kumârila makes a very close approach to the Jaina view on the subject when he says: "अन्योन्यापेक्षिता नित्यं स्यात् सामान्यविशेषयोः । विशेषाणां च सामान्यं ते च तस्य भवन्ति हि । निर्विशेषं न सामान्यं भवेच्छशविषाणवत् । सामान्यरहितत्वाच विशेषास्तद्वदेव हि ॥" (S'l. Vârt-Âkṛti 9–10); and further on, in answering the objection of विरोध, Kumârila says: "विरोधस्तावदेकान्ताद्वक्तुमत्र न युज्यते । सामान्यानन्यविज्ञाते विशेषे नैकवृत्तिता । सामान्यानन्यवृत्तित्वं विशेषात्मैकभावतः । एवं च परिहर्तव्या भिन्नाभिन्नत्वकल्पना ॥ केनचिद्व्यात्मनैकत्वं नानात्वं चास्य केनचित् । सामान्यस्य तु यो भेदं ब्रूते तस्य विशेषतः ॥ दर्शयिस्त्वाऽभ्युपेतव्यं विशेषैक्यं च जातितः । यथा कल्माषवर्णस्य यथेष्टं वर्णनिग्रहः ॥ चित्रत्वाद्वस्तुनोप्येवं भेदाभेदावधारणम् । सामान्यांशे तु निष्कृष्य भेदो येन प्रसाध्यते ॥" (S'l. Vârt. Âkṛti 54–57)—which N. R. elucidates in words which remind us of the Jaina doctrine of सामान्य and विशेष regarded as two aspects of one reality: "यदि ह्यनेकवृत्त्येव सामान्यं स्यात् अनन्यवृत्तय एव विशेषाः तयोरेकत्वं विरुध्यते । यदा तु विशेषा अपि सामान्यात्मनाऽनेकवृत्तयः सामान्यं च विशेषात्मनानन्यवृत्ति तदा को विरोध इति । यत्त्वन्याऽनन्यतैव कथमेकस्येत्युक्तं—तत्राह एवमिति । एतदेव दर्शयति केनचिदिति । गोत्वं हि शाबलेयात्मना बाहुलेयाद्भिद्यते । स्वरूपेण च न भिद्यते । तथा व्यक्त्यन्तरादपि व्यक्तिः जात्यात्मना न भिद्यते स्वरूपेण च भिद्यते इति अपेक्षाभेदादविरोधः । समाविशन्ति हि विरुद्धान्यपि एकत्वापेक्षाभेदात् । एकमपि हि किंचिदपेक्ष्य ह्रस्वं किंचिदपेक्ष्य दीर्घं यथैकोऽपि चैत्रो द्वित्वापेक्षया भिन्नोऽपि स्वात्मापेक्षया न भिद्यते । अनेनैकानेकत्वमपि परिहर्तव्यम् । तदेव हि वस्तुस्वरूपेण सर्वत्र सर्वदा चैकमपि शाबलेयादिरूपेणाऽनेकं भवतीति न विरोधः इति ।......... नानावर्णे हि वस्तुनि य एव वर्णो निष्कृष्य दर्शयितुमिष्यते स एव शक्यो दर्शयितुम् । एवं नानारूपे वस्तुनि सर्वस्य भेदाभेदादेः संभव इति ।"

हेतोरद्वैतसिद्धिश्चेत् etc.—(Âptamîmâṃsâ 26) is thus explained in अष्टसहस्री:—तत्सिद्धिर्यदि साधनात् साध्यसाधनयोस्तर्हि द्वैतं स्यात् ।

अन्यथाऽद्वैतसिद्धिवद्द्वैतसिद्धिः कथं न स्यात् ?। स्वाभिलाषमात्रादर्थसिद्धौ सर्वं सर्वस्य सिध्येत् ॥

कर्मद्वैतं फलद्वैतं etc.—(Âptamîmâmsâ 25) is thus explained in अष्टसहस्री:—लौकिकं वैदिकं च कर्मेति वा कुशलमकुशलं च कर्मानुष्ठानमिति वा, पुण्यं पापं च कर्मेति वा कर्मद्वैतं न स्यात्। तदभावात् इहामुत्र च श्रेयःप्रत्यवायलक्षणं फलद्वैतं न स्यात्, कारणाभावे कार्यस्यानुत्पत्तेः। तत एव इहलोकपरलोकलक्षणं लोकद्वैतं न स्यात्। कर्मादिद्वैतस्यानाद्यविद्योपदर्शितत्वाददोष इति चेन्न। धर्माधर्मद्वैतस्याभावे विद्याविद्याद्वयस्यासंभवाद् बन्धमोक्षद्वयवत्। पूर्वविद्योदयादेव विद्याविद्याद्वयं बन्धमोक्षद्वयं च परमार्थतस्तदसंभवात् 'न बन्धोऽस्ति नैव मोक्ष इत्येषा परमार्थता' इति प्रवचनात् प्रतिभासमात्रस्य परब्रह्मण एव तात्त्विकत्वादिति चेन्न। नैरात्म्यस्यापि तात्त्विकत्वापत्तेस्तत्कल्पनाया नैष्फल्याविशेषात् ॥

St. XIV.

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥—Bhartṛhari's Vâkyapadîya I. 124, which the commentator explains as follows: "काचिदेव सा ज्ञानावस्था सविकल्पाख्या.........शब्दानुविद्धेन शब्दशक्त्यनुपातिना ज्ञानेनोपगृह्यमाणो वस्त्वात्मा ज्ञानानुगतो व्यक्तरूपप्रत्ययभासो ज्ञायत इत्यभिधीयेत तादृश एव च स्मृतिविषयो भवति। अनुभवसमानाकारत्वात्तस्याः।......" Cf. Max-Müller's view that there can be no thought without language. Note, however, that Bhartṛhari's dictum is intended to apply to सविकल्पक consciousness (in the sense of 'सविकल्पक' as used in the Yoga-S'āstra) only. Cf. Vyākaraṇa Mahābhâṣya (I. i. 1):—"सिद्धे शब्दार्थसंबन्धे—सिद्धे शब्दे अर्थे संबन्धे च—with Kaiyyaṭa's gloss—त्रयाणामात्यन्तिकाविश्लेषप्रदर्शनाय समाहारनिर्देश इति बोध्यम्।...शब्दार्थयोः संबन्धश्च शक्तिरूपं तादात्म्यमेवेत्यन्यत्र प्रपञ्चितम् ॥

ते च द्रव्यास्तिकनयानुपातिनः etc.—For a full exposition of the नयs, see notes on Stanza XXVIII and the books of reference mentioned therein. The Jaina claims that all the different philosophical systems, except his own, embody *partial* truths, while his system is the only one which presents the *Whole* Truth. Thus, Reality which is the primary synthesis of द्रव्य (substance) and पर्याय (mode) is grasped only fragmentarily

by the other schools, some apprehending and emphasising one aspect and some the other.

ते च द्रव्यास्तिकनयानुपातिनः etc.—For the best exposition of this subject, see the section on नयमीमांसा in Abhayadeva's commentary on Siddhasena Divâkara's Saṃmati-tarka. (Purā-tattva-mandira Edition, Vol. II, pp. 271–310).

ते च द्रव्यास्तिकनयानुपातिनो मीमांसकभेदाः—I was wondering what could be the point of 'भेदाः' in 'मीमांसकभेदाः'—I then remembered the passages which I have quoted above from Kumârila and his commentator. In view of these passages, Kumârila and his commentator certainly deserve to be assimilated with the Syâdvâda school and not classed as mere 'द्रव्यास्तिकनयानुपातिनः'. For a full exposition of द्रव्यास्तिकनय and पर्यायास्तिकनय and the schools which severally fall under them, see Abhayadeva's Commentary on Saṃmatitarka, Chapters on Naya-Mîmâṃsâ.

तथा च पठन्ति—एतासु पञ्चस्ववभासनीषु etc.—I think the title of this work by "Pandita Aśoka" (as the colophon runs)—who is assigned to circa 900 A. D., is really "सामान्यदूषण(सिद्धि)दिक्" and not "सामान्यदूषणदिक्प्रसारिता" as found in M. M. Dr. Haraprasâda S'âstri's edition of "Six Buddhist Nyâya Tracts" published by the A. S. Bengal and accepted in AMP. edition of the Syâdvâda-mañjarî, footnote, 'प्रसारिता' there being only a predicate of '°दिक्' and meaning has been 'set forth'.

The concluding verse which follows this as a summary of the book is as follows: "प्रत्यक्षप्रतिभासि वर्त्म (corrected in the Preface into-धर्मेषु) न पञ्चस्वङ्गुलीषु स्थितं सामान्यं प्रतिभासते न च विकल्पाकारबुद्धौ तथा। ता एवास्फुटमूर्तयोऽत्र हि विभासन्ते न जातिस्ततः सादृश्यभ्रमकारणौ पुनरिमावेकोपलब्धिध्वनी ॥ *i. e.* "Generality is not found residing in the five fingers whose attributes (or states or phenomenal being) we apprehend by perception; nor does it appear in the idea of form which is apprehended by conception. What is perceived is the same fingers distinctly (then in निर्विकल्पक, now in सविकल्पक ज्ञान). Therefore there is no such

thing as Generality (जाति or सामान्य). That several reals produce one idea and are denoted by one word arises from our confounding likeness with unity or sameness." The general line of reasoning is thus indicated in the opening portion of the work: व्यापकं नित्यमेकं च सामान्यं यैः प्रकल्पितम् । मोहगन्थिच्छिदे तेषां तदभावः प्रसाध्यते । कथमिदमवगम्यते । परस्परविलक्षणक्षणेषु प्रत्यक्ष-समीक्ष्यमाणेष्वभिन्नधीध्वनिप्रसवनिबन्धनमनुयायिरूपं सामान्यं न मान्यं मनीषि-णामिति । साधकप्रमाणविरहात् बाधकप्रमाणसंभवाच्चेति ब्रूमः । तथाहि यदिदं सामान्यसाधनमनुमानमभिधीयते परैः । यदनुगताकारं ज्ञानं तदनुगतवस्तुनिबन्धनं यथा बहुषु पुष्पेषु स्रक् स्रगिति ज्ञानम् । अस्ति च परस्परसंपर्कविकलकलासु कार्यादिव्यक्तिष्वनुगताकारं विज्ञानं तदप्यनैकान्तिकतादोषाक्रान्तशरीरत्वान्न तद्भावसाधनायालम् । यतो भवति बहुषु पाचकेषु पाचकः पाचक इति एकाकार परामर्शप्रत्ययः । न च तेष्वनुगतमेकं वस्तु समस्ति । तद्भावे हि प्रागेव तथा-विधप्रत्ययोत्पादप्रसङ्गो दुर्वारप्रचारः ॥

यच्चास्य पौद्गलिकत्वनिषेधाय स्पर्शशून्याश्रयत्वात् अतिनिबिडप्रदेशे प्रवेश-निर्गमयोरप्रतिघातात् पूर्वं पश्चाच्चावयवानुपलब्धेः सूक्ष्ममूर्तद्रव्यान्तराप्रेरकत्वात् गगनगुणत्वाच्चेति पञ्चहेतवो यौगैरुपन्यस्ताः—The word "यौगैः" denotes both the Nyâya and the Vaiśeṣika systems although more often in this work, the Nyâya. But I have not been able to trace to their source these hetus, which look like sûtras either of the Nyâya or the Vaiśeṣika system, but are not found in their existing sûtras. Cf. एवं विभागसंयोगौ तद्भावादन्ययोगवत् । जैनकापिलनिर्दिष्टं शब्दश्रोत्रादिसर्पणम्—S'l. Vârt. VI. 106, where the commentator presents the Jaina doctrine as follows: "जैनैर्हि शब्दस्यागमनं, परिमाणं, स्पर्शः, तेषां चाभिभवः स्पर्शवत्त्वेऽपि च त्वगिन्द्रियाग्राह्यत्वं, सूक्ष्माश्च भागा पुद्गलरूपाः कल्पिताः ॥"

"In Kârikâs 106–122 [of this section of the S'l. Vârt.] we find a refutation against the Jainas, who believe sound to be material and tangible, to travel from its place of origin to our auditory organ, and to consist of component parts (pudgalas). [This is criticised in the following verse.]

शब्दस्यागमनं तावददृष्टं परिकल्पितम् ।
मूर्तिस्पर्शादिमत्त्वं च तेषामभिभवः सताम् ॥
(VI. 107–108).

This belief in the substantiality of sound must have had originally more supporters than the Jainas. In Europe too it has been upheld for a long time and is expressed by Lucretius in his De natura rerum."—"The Vaiśeṣika System" by Dr. Faddegon, p. 189.

In connection with the passage on शब्दार्थसंबन्ध contained in this Stanza and its commentary, consult particularly शब्दनित्यताधिकरण in Kumârila's S'loka Vârtika, the Nyâya Sûtras II. ii, and शब्दार्थतत्संबन्धयोर्मीमांसा in Abhayadeva's commentary on Saṃmatitarka (Gujarat Purā-tattva-mandira edition Vol. II.)

On p. 165 of the Notes with reference to " यौगास्तु—The Vaiśeṣikas would say " please note that the term ' यौगाः ' very often stands for Naiyâyikas, but may apply sometimes to Vaiśeṣikas also. Here, the subject is more in the line of the Vaiśeṣikas than of the Naiyâyikas; and therefore I have said " The Vaiśeṣikas " etc.

विकल्पयोनयः शब्दाः—Quoted in Ratnâkarâvatârikâ I. 9.

सर्वमस्ति स्वरूपेण (p. 91 of the Sanskrit text)—The verse has been quoted by Hemacandra in Pramâṇamîmâṃsâ p. 44. Before him, it was quoted by Siddharṣi in his commentary on the Nyâyâvatâra. (Sîddharṣi, the author of Upamitibhava-Prapañcakathâ, completed it in 906 A.D.).

अभिहाणं अभिहेयाउ etc.—Quoted also by Devabhadra who lived in the second half of the twelfth century, that is about a hundred years before Malliṣeṇa.

Cf. ' शब्दानां न परमार्थतः किंचिद्वाच्यं वस्तुस्वरूपमस्ति । सर्व एव शाब्द-प्रत्ययो भ्रान्तः। भिन्नेष्वर्थेष्वभेदाकाराध्यवसायेन प्रवृत्तेः। यत्र तु पारंपर्येण वस्तु-प्रतिबन्धस्तत्रार्थसंवादो भ्रान्तत्वेऽपि तत्र यत् तदारोपितं विकल्पबुद्ध्यार्थेष्वभिन्नं रूपं तद् अन्यव्यावृत्तपदार्थानुभवबलायातत्वात् स्वयं चान्यव्यावृत्ततया प्रतिभास-नात् भ्रान्तैश्चान्यव्यावृत्तार्थेन सहैक्येनाध्यवसितत्वात् अन्यापोढपदार्थाधिगति-फलत्वाच्च अन्यापोह इत्युच्यते। अतः अपोहः शब्दार्थ इति प्रसिद्धम् ' —Com. on Saṃmatitarka p. 173, Purātattva Edition. अपोह

or the doctrine of negative denotation is a logical necessity of S'ûnyavâda. The doctrine is endorsed by other schools of Buddhism also. Cf. Stcherbatsky's "Conceptions of the Buddhist Nirvâṇa," p. 155 footnote 3; "But the school of Dignâga have a special theory of their own about the meaning of words according to which words express only relations, or mutual negation (अपोह = परस्परपरिहार = अन्यव्यावृत्ति = व्यवच्छेद = परिच्छेद) between point-instants." For an exposition of this subject see Ratnakîrti's "Apoha Vada", one of the "Six Buddhist Tracts" collected and published by Haraprasâda Sâstri (A. S. Bengal Series). Note, however, that the doctrine is not always put forward in the extreme form in which it has been taken by its critics: cf. "नास्माभिरपोहशब्देन विधिरेव केवलोऽभिप्रेतः नाप्यन्यव्यावृत्तिमात्रं, किंत्वन्यापोहविशिष्टो विधिः शब्दानामर्थः ततश्च न प्रत्येकपक्षोपनिपातिदोषावकाशः"—Ratnakîrti's "Aphohasiddhi" p. 3.

The subject of अपोह was hotly discussed by the Buddhists, the Jainas and the Brâhmaṇas in the age of Kumârila, and also in the few centuries before and after him. See Kumârila's S'loka–Vârtika, which contains a special section on the criticism of अपोह. Both the criticism and the original doctrine have been examined at great length in the section on "शब्दार्थ–तत्संबन्धमीमांसा" in Abhayadeva's commentary on Saṃmatitarka pp. 173–270, which refers also to the contributions of Uddyotakara and numerous other logicians to the discussion of this great question. See also S'ântarakṣita's "Tattva-saṁgraha" with Kamalaśîla's "Pañjikâ"; and for a brief discussion, Siddharṣi's commentary on Nyâyâvatâra pp. 4–5. The subject has been also fully discussed from the Naiyâyika (Brâhmaṇa) point of view in the Nyâya-mañjarî of Jayanta. See Vol. I, pp. 290–327.

अपरे सामान्यमात्रमेव etc.—As Kumârila contends: "अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम् । गोत्वं वस्त्वेव तैरुक्तमगोऽपोहगिरा स्फुटम् ॥" Note, however, that in Kumârila's philosophy सामान्य is only the other side of विशेष, both of them being aspects of the same reality.

विधिवादिनस्तु etc.—These are different from the विधिवादिन्s referred to in the com. on Sammatitarka "अत्र विधिवादिनः प्रेरयन्तिetc." whose "विधिरेव शब्दस्यार्थः" means that the denoted object is a positive reality, and not an empty negation (अपोह). The विधिवादिन्s, the नियोगवादिन्s and the प्रैषवादिन्s are different forms of one common doctrine that every proposition (वाक्य) is a positive or negative *mandate*, (आम्नायस्य क्रियार्थत्वात्–Pûrva Mîm. Sûtra) no proposition being, in its ultimate effect, a mere statement of fact. Even sentences with a verb in the indicative mood are understood by them as subordinate to some other sentence which has a verb in the imperative mood. Thus all such texts as तत्त्वमसि, सर्वं खल्विदं ब्रह्म, ऐतदात्म्यमिदं सर्वम् are subordinate to such central texts as तद्विजिज्ञासस्व, सोऽन्वेष्टव्यः विजिज्ञासितव्यः etc. (See the concluding paragraphs of Râmânuja's S'rî-Bhâṣya on 'जिज्ञासाधिकरण' (I. i. 1) and his exposition of 'समन्वयाधिकरण' (I. i. 4). This logical attitude may be compared with that of the present-day Pragmatists in American and European philosophy. The following passage in L. P. Jack's "The Education of the Whole Man." on 'disguised imperatives' will be found interesting: "Then it was that it flashed upon me with the force of a revelation that all philosophies and sciences, without exception —both those I agreed with and those I disagreed with—were *injunctions to live in a particular way and avoid living in other ways*. They all come to their spear-point, so to speak, in some kind of *injunction*. They were all disguised imperatives. Behind the information was the *command*, which took the form, "Live in this way and avoid living in that." Commands disguised as information." On the subject of वाक्यार्थवैविध्य, क्रियावाक्यार्थत्वं, विधि, नियोग etc. see Nyâyamañjarî of Jayanta Vol. I.

St. XV.

एवमन्यासामपि etc.—Cf. पञ्चविपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्। अष्टाविंशति भेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥—S. K. 47. पञ्चविपर्ययभेदाः=अविद्याऽस्मिता-राग-द्वेषा-भिनिवेशाः यथासंख्यं तमो-मोह-महामोह-तामिस्रान्धतामिस्रसंज्ञकाः पञ्चविपर्ययविशेषाः S. T. K. ibid. The latter are the technical terms of Sâṁkhya philosophy for अविद्या etc. of Yoga which are thus defined in Patañjali's Sûtras: (1) अनित्या-शुचि-दुःखा-नात्मसु नित्य-शुचि-सुखा-त्मख्यातिरविद्या (Pat. Yoga sûtras II. 5); (2) दृग्दर्शनशक्त्योरेकात्मतेवास्मिता (II. 6); सुखानुशयी रागः (II. 7); दुःखानुशयी द्वेषः (II. 8); स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः (II. 9). For further light on each of these which are collectively called "क्लेशs" by Patañjali, and "विपर्ययs" by Vyâsa by way of giving a synonym of क्लेश, see Vyâsa-Bhâṣya.

ब्राह्मप्राजापत्य etc.—Cf. "अष्टविकल्पो दैवः तैर्यग्योनश्च पञ्चधा भवति। मानुषश्चैकविधः समासतो भौतिकः सर्गः ॥" (S. K. 53) As regards details cf. Tattva-Kaumudi, Mâṭhara-Vṛtti and Sâṁkhya-Candrikâ give पैत्र or पित्र्य for सौम्य of our text and place it after ऐन्द्र; तैर्यग्योन is the same. The hetu in the note of Vācaspatimiśra on "मानुषश्चैकविधः" will be fonnd interesting: "ब्राह्मणत्वाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात्।"

बाधिर्यकुष्ठता etc.—अशक्ति (Infirmity) which is second on the list after विपर्यय is of twenty-eight kinds, of which eleven are इन्द्रियवधs, and seventeen बुद्धिवधs, nine of the latter being the opposites of nine तुष्टिs (Complacencies) and eight the opposites of eight सिद्धिs (Attainments) (एकादशेन्द्रियवधाः सहबुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदशवधा बुद्धेर्विपर्ययात् तुष्टिसिद्धीनाम्—S. K. 49). S. T. K.:—"बाधिर्यं कुष्ठितान्धत्वं जडताजिघ्रता तथा। मूकता कौण्यपङ्गुत्वे क्लैब्योदावर्तमन्दताः"—thus mentioning मन्दता instead of मत्तता as found in our text.

तुष्टिनवकविपर्ययसिद्ध्यष्टकविपर्यय etc.—The nine तुष्टिs (Complacencies) are thus classified in the S. K. "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभागाख्या बाह्या विषयोपरमात् पञ्च च नव तुष्टयोऽभिमताः" While accepting that आत्मन् is distinct from प्रकृति, if a man stops there and does not strive to realise the distinction by

श्रवण. मनन etc. he suffers from तुष्टि (Complacency) regarding the Self (आध्यात्मिकी). This is of four kinds: (1) प्रकृति (Nature), (2) उपादान (Means), (3) काल (Time) and (4) भाग (Luck).

(1) The first is thus explained in S. T. K. " कस्यचिदुपदेशे विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः तं च प्रकृतिरेव करोतीति कृतं ध्यानाभ्यासेन तस्मादेवमेवास्स्व वत्स इति येयमुपदेष्टव्यस्य शिष्यस्य तुष्टिः प्रकृतौ सा तुष्टिः प्रकृताख्या अम्भ इत्युच्यते "—It is the attitnde of complacently resting in प्रकृति instead of rising to the realisation of the true nature of पुरुष—the result of a kind Natural Fatalism. It is esoterically known as ' अम्भः ' (2) The second: " या तु प्रकृत्यपि विवेकख्यातिर्न सा प्रकृतिमात्राद्भवति, मा भूत् सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात्, प्रव्रज्यायास्तु सा भवति, तस्मात् प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन् इत्युपदेशे या तुष्टिः सोपादानाख्या "—One may accept the view that Natural Fatalism (प्रकृति) is wrong, because Nature is the same for all, and consequently the विवेकख्याति of one who is content with the fatalism of Nature is no good. But if he thinks that Asceticism is all that one. has to add he is mistaken. For without the practice of ध्यान, mere asceticism is useless. (3) The complacency of such a man is complacency in regard to Means (उपादान). This complacency is esoterically known as 'सलिल'. " या तु प्रव्रज्याऽपि सद्यो न निर्वाणमेति सैव कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तप्ततया तव ' इत्युत्पदेशे या तुष्टिः सा कालाख्या—ओघ इत्युच्यते ॥ " To imagine that प्रव्रज्या in the fulness of time with bears its fruits and therefore ध्यान is unnecessary is wrong. This kind of complacency—a pathetic belief in the potency of time—is कालाख्या तुष्टि which is esoterically known as ' ओघ '. (4) "या तु प्रकृतेर्न कालान्नाप्युपादानाद्विवेकख्यातिः अपि तु भाग्यादेव, अत एव मदालसापत्यान्यतिबालानि मातुरुपदेशादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः तस्माद् भाग्यमेव हेतुर्नान्यद् इत्युपदेशे या तुष्टिः सा भागाख्या सा वृष्टिरित्युच्यते ॥ " When the realisation of the distinction between पुरुष and प्रकृति (विवेकख्याति) is regarded as a matter of pure luck (*e. g.* the children of मदालसा who practised neither प्रव्रज्या nor ध्यान before realising the distinction), it is a kind of तुष्टि which is called ' भाग ', and is esoterically known as ' वृष्टि '. Next comes the group of five बाह्यतुष्टिs, which with the

four internal (आध्यात्मिकी) mentioned above make up *nine* in all. (1) The वैराग्य (cessation of attachment to worldly life) is necessary for realising the distinction between प्रकृति and पुरुष, but it is not all. There are some people, however, who imagine that the renunciation of the five विषयs—शब्द, रूप, रस, गन्ध and स्पर्श is enough; or if they renounce objects of comfort and enjoyment (विषयs) for any of the following reasons, it is all that they need do. These reasons are: (1) The trouble and the humiliation involved in earning wealth—अर्जन. The renunciation caused by this motive is esoterically known as 'पार'; (2) The trouble involved in protecting it from the depredations of robbers and from accidental loss. This is renouncing a thing in order to escape the trouble of protecting it (रक्षण),—which in esoterical language is called 'सुपार'. (3) To cease to care for wealth for the reason that after all it will be exhausted is the kind of renunciation arising from the sense of प्रक्षय and is esoterically known as 'पारापार'. The thought that enjoyment of विषयs after all whets the desire of enjoyment all the more may be the reason for renunciation in some cases. This, which arises from reflecting on the nature of भोग is not, however, all that is needed. It is called भोग (दोषदर्शन) तुष्टि, and in esoteric language 'अनुत्तमाम्भः' (5) Lastly, all enjoyments involve हिंसा. Desisting from विषयs with this idea, is तुष्टि from the idea of हिंसा—called esoterically 'उत्तमाम्भः'.

त्रयो दुःखविघाताः etc.—Next, we come to सिद्धिs (Attainments). These are enumerated as follows: "ऊहः शब्दोऽध्ययनं दुखविघातास्त्रयः सुहृत्प्राप्तिः। दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" ॥ (S. K. 51)—S. K. T. adopts its own order for explanation. (1) अध्ययनम्=विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणम्—*i.e.* Study of the letter of the Sâstra under a teacher. This is called 'तारम्' (2) शब्दः—'शब्द इति पदं शब्दजनितमर्थज्ञानमुपलक्षयति—Study of the meaning of the S'âstra, (3) ऊहः=तर्क आगमाविरोधिन्यायेनागमार्थपरीक्षणम्—also called मनन as distingnished from the first two which constitute श्रवण. ऊह = Reasoning in harmony with the Scriptures. It is called 'तारतारम्' in mystic lanuage. (4) सुहृत्प्राप्तिः

—Discussion with friends: = स्वोत्प्रेक्षितं मननममननमेव आसुहृत्संमतम् न्यायेन स्वयंपरीक्षितमप्यर्थं न श्रद्धत्ते, न यावद् गुरुशिष्यसब्रह्मचारिभिः संवाद्यते अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः This is known in mystic lore as 'रम्यक'. (5) दानं = शुद्धिर्विवेकज्ञानस्य (From दैप् शोधने, to purify) One's own ज्ञान has to be confirmed by discussion with friends. This purification takes place when the विवेकख्याति is absolutely freed from संशय and विपर्यास together with their वासना or संस्कार. (अविप्लवः शुद्धिः सा च सवासनसंशय-विपर्यासानां परिहारेण विवेकसाक्षात्कारस्य स्वच्छप्रवाहेऽवस्थापनम् "—This सिद्धि is known in esoteric language as 'सदामुदितम्'. In addition to these five, there are three principal सिद्धिs consisting of the distinction of the three kinds of दुःख viz. आध्यात्मिक, आधिभौतिक and आधिदैविक. These are called प्रमोद, मुदित and मोदमान.

संवरप्रतिसंवर—For this reading of the AMP. edition, one may read संचरप्रतिसंचर—which are used elsewhere for evolution and involution respectively.

For "the whole passage from 'सांख्यमते' to पञ्चविंशतिः is extracted from Guṇaratna's com. p. 97 on Ṣad. D. Samuccaya 34" in the Notes p. 169 read: "The whole passage ......is reproduced in Guṇaratna's com. ......" For the Note on महत्तत्त्व—generally understood as Cosmic Intelligence—consult Keith's "Sâṁkhya System" p. 79 where the earlier view is distinguished from that of the Sâṁkhya Kârikâ where "Stress is laid on the intellect as psychological." On p. 171 of the Notes read "The same are reproduced in Guṇaratna's com." instead of "The same as in......On p. 174 of the Notes, for "The slip was originally Guṇaratna's etc." read "The slip was originally Malliṣeṇa's, which has been repeated by Guṇaratna .... Could it be that in the time of Malliṣeṇa (read this for 'Guṇaratna')" On p. 175 ll. 1–2 for "The whole passage......is reproduced from Guṇaratna's commentary" read "The whole passage is reproduced in Guṇaratna' commentary".

वादमहार्णवोऽप्याह—In the AMP. edition p. 123 footnote 'वादमहार्णव' is said to be 'वेदान्तग्रन्थविशेषः' Evidently this is a

mistake, arising from the figure of बिम्बप्रतिबिम्ब which as a matter of fact is as much a property of Sāṁkhya as of Vedânta. वादमहार्णव seems to be a work of Sāṁkhya, as is clear from the context, where a number of authorities are quoted in support of the Sāṁkhya theory: Patañjali (This should be Vyâsa, the commentator of Patañjali who may well be regarded as an authority on Sāṁkhya which is a sister science of Yoga), Vâcaspati Miśra, Âsuri and Vindhyavâsin. Âbhayadeva Sûri, a Jaina writer, is also said to have composed a work of the same name (see the Praśasti of Prabhâvakacarita, verse 4: शिष्योऽस्याभयदेवसूरिरभवत्......ग्रन्थो वादमहार्णवोऽस्य विदितः."

विन्ध्यवासी त्वेवं भोगमाचष्टे—Vindhyavâsin is well known as a contemporary of Vasubandhu who lived in the third century A. D. As regards his indentification with Iśvarakṛṣṇa, the author of the Sâṁkhya Kārikas, see J. R. A. S. 1905. But this hypothesis is now definitely rejected, and we know that the name of this 'dweller in the Vindhyas' was Rudrila, as we see from a verse cited by Kamalaśîla in his commentary on the Tattva-Saṁgraha of S'ântarakṣita which runs as follows: "यदेव दधि तत्क्षीरं यत्क्षीरं तद्दधीति च। वदता रुद्रिलेनैव ख्यापिता विन्ध्यवासिता"—*i. e.* The Sāṁkhya philosopher—Rudrila—who identifies cause and effect in his सत्कार्यवाद—is indeed a man of the jungle of the Vindhya mountain, who does not know what is milk and what is curds and how one differs from the other.

तथा चासुरिः—आसुरि was a direct pupil of कपिल. For the Sāṁkhya गुरुशिष्यपरम्परा vide—एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ। आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्॥—S. K. 70. Mâṭhara supplies the later names betwen पञ्चशिख and ईश्वरकृष्ण as follows: पञ्चशिखेन तस्मात् भार्गवोलूकवाल्मीकिहारीतदेवलप्रभृतीनागतम्। See also p. 39 of Keith's "Sâṃkhya System."

St. XVI.

द्विष्ठसंबन्धसंवित्तिः etc.—Quoted in Ratnâkarâvatârika (Pariccheda I. p. 4. 2).

एवं योगाभिप्रेतः etc.—Note that this doctrine of the Naiyâyikas which is the opposite of that of the Buddhist logician Dharmakîrti is similarly rejected. This is in order to establish the resulting अनेकान्तवाद of the Jainas. अथवा पूर्वार्धमिदमन्यथा... व्याख्येयम्। सौगताः किलेत्थं प्रमाणयन्ति–सर्वं सत् क्षणिकं etc. cf. यत्सत्तत्क्षणिकं यथा जलधरः सन्तश्च भावा इमे सत्ताशक्तिरिहार्थकर्मणि मिते सिद्धेषु सिद्धा च सा। नाप्येकैवविधान्यदापि परकृत्नैव क्रिया सा भवेत् द्वेधापि क्षणभङ्गसंगतिरतः साध्यैव विश्राम्यति॥ For a statement of क्षणभङ्गवाद see Ratnakîrti's Tract on 'क्षणभङ्गसिद्धि,' and Keith's "Budhist Philosophy" pp. 181–184, also S'ântarakṣita's Tattva-Saṃgraha with Kamalas'îla's Pañjikâ—Section on स्थिरभावपरीक्षा. (G.O.S.Tattva-saṃgraha Vol. I). For its criticism, see Sâṁkara Bhâṣya on Br. Sûtras II, ii, 19–22. The Jaina position is thus argued and summed up by Hemacandra who quotes "अर्थक्रिया न युज्येत नित्यक्षणिकपक्षयोः। क्रमाक्रमाभ्यां भावानां सा लक्षणतया मता॥" cf. also Guṇaratna's com. on क्षणिकाः सर्वसंस्काराः Saḍ. Darśana Sam. verse 7. pp. 30–31. On p. 195 of the Notes, in l. 3 from the bottom read "Br. Sûtras II, ii, 11–17 and in the last line: "Prajnâkara Gupta's date is given in Dr. Vidyâbhûṣana's H. I. L. about 940 A. D." On p. 199 of the Notes—for "if there is" and "we cannot" in ll. 6 and 7, read "if there were" and "we could not" respectively. For "S'ad. Com." read "Ṣaḍ. Com." of Guṇaratna; and the same for "S'ad" on p. 202. To the list of Reference Books add: 6 Abhayadeva's Com. on Saṃmatitarka, 7. Nyâyabindu of Dharmottara with Nyâyabinduṭîkâ of Dharmakîrti 8. S'ântarakṣita's Tattva-Saṃgraha with Kamalaśîla's Pañjika, 9. "Six Buddhist Tracts", 10. Mahâyâna Sûtrâlaṁkâra Mâdhyamikâ Vṛtti, 11. Vijnaptimatratâsiddhi, 12. Account of Buddhist schools in Kern's "Indian Buddhism", 13. Keith's "Buddhist Philosophy", 14. Sogen's "Systems of Buddhist Thought", 15. Suzuki's "Outlines of Mahâyâna Buddhism", 16 and Stcherbatsky's Introduction to his "The Conception of Buddhist Nirvāṇa".

St. XVII.

इह शून्यवादिनामयमभिसन्धिः—For S'ûnyavāda see Madhyamikâvṛtti, Stcherbatsky's "Buddhist Concept of Nirvâṇa" and Keith's "Buddhist Philosophy" Ch. XIII:—" The Negativism of the Madhyamaka ".

For an examination of the doctrine from the Brâhmaṇa point of view see Kumârila's S'lokavârtika, sections on निरालम्बनवाद and शून्यवाद. For the Jaina examination, See Com. on Saṃmatitarka, नयमीमांसा.

सुखादि चेत्यमानं हि—Quoted in Ratnâkarâvatârikâ on P.N.T. VII 55 p. 142. The whole commentary on "प्रमाता प्रत्यक्षादिप्रसिद्ध आत्मा" and "चैतन्यस्वरूपः परिणामी कर्ता साक्षाद्भोक्ता स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्टवांश्चायमिति" (P. N. T. VII. 55,56), both in Ratnâkara and Avatârikâ, contains a good dissertation on the nature of Âtman according to the Jainas. See in this connection, Pravacanasâra. For the Buddhist examination of rival doctrines see "Tattvasaṃgraha" with Pañjikâ Vol. I., section on आत्मपरीक्षा S'l. 171–349 pp. 79–130.

For the interesting question of the nature of Âtman according to other schools, consult Jayanta's Nyâyamañjarî, Râmânuja's Srîbhâṣya etc. On p. 211 of the Notes in ll. 3 & 4 from the bottom " observation " is a wonderful misprint for " obscuration." It puzzled me for a few minutes to find out with what word it could have been confounded. On संवृति *i. e.* 'concealment' or 'obscuration,' see Suzuki's " Outlines of Mahâyâna Buddhism." 'संवृति' corresponds to " व्यावहारिकी सत्ता " which conceals (by the आवरणशक्ति of अविद्या or माया) the " पारमार्थिकी सत्ता " which lies beyond it.

स्वज्ञानावरणवीर्यान्तराय etc.—" पढमं ज्ञाणावरणं, बीयं पुण दंसणस्स आवरणं । त इयं च वेयणियं, तहा चउत्थं च मोहणीयं "—*i. e.* ज्ञानावरण, which is the first of the four obscuring Karmans. वीर्यान्तराय—कर्मविशेषः यस्योदये उत्साहप्रतिघातो भवति *i. e.* the Karman which obstructs the exercise of moral will; moral weakness. See A. M. P.'s edition of Pramâṇamîmâṃsâ pp. 18–19, footnotes.

क्षयोपशम—Wearing out and ultimate cessation of karman. न सन्नसदसन्न......तत्त्वमाध्यात्मिका जगुः—I have no doubt the correct reading is "तत्त्वं माध्यमिका जगुः"—the reference being to the famous Madhyamaka or Mâdhyamika school of Buddhism.

"The relation between mental and material things is a case of causation but of a special kind since it may be said to be simultaneous, in lieu of subsequent. This raises a difficulty as suggesting the Vijñânavâda theory that there is no real externality in things, but a mistaken and illusory attribution of externality to that which is internal, as can be shown from the fact that we always experience an object and its cognition together. The Sautrântikas reject this view; the facts are, they argue, clearly that what we see are objects, as external, not merely internal modifications of consciousness, to which in point of fact we do not in everyday life attend as such. The idealist admission that things appear as if external undermines their whole position, for the conception of externality could not rise without real ground. There is no real difficulty as to simultaneity between the object and the perception of it; we do not, as the objection to this possibility seems to imply, first know the object and then know the perception, but the object by contact with the sense organ impresses its form on the cognition, and then from the form we conclude by inference the existence of an external object which causes it, just as we infer nourishment from a thriving appearance, nationality from language, and love from emotion. The object moulds our knowledge without ceasing to be itself. Cognition cannot explain our objects; in itself it is the same and there would be no differentiation of objects if objects were derived from it. The diversity of cognitions in an observer, himself remaining the same, is explicable only by the operation on him of external things, a fact which gives us the realization of the self as the conscious subject (ālaya-vijñāna) in whom individual cognitions (pravṛtti-vijñāna), caused by external things appear from time to time.

The Vaibhāṣikas, though realists, object to this doctrine of the Sautrāntikas–indeed a fanciful etymology gives them their name because of their habit of styling the doctrine of inferability 'contradictory chatter (viruddha bhāṣā)'. If knowledge is thus reduced to inferability, then there is no object of perception, and, this being so, there is no basis for the observation of the invariable concomitance, which is the essential ground of inference, and we shall have a complete contradiction with all actual experience. Knowledge, in fact, is of two kinds; perception as indeterminate, that is free from the operation of imagination, which is authoritative, and determinate perception which is worked up by imagination and so is not directly authoritative, although what is inferred serves as a basis for action and common acceptance; we can verify by action the truth of inferences, and we can accept statements on authority as resting ultimately on perception."

—Keith's " Buddhist Philosophy " pp. 161–162.

St. XVIII.

Add as an Appendix:—

बौद्धा बुद्धिक्षणपरंपरा etc.—This has a parallel both in language and in thought in the following paragraph of P. N. T. Ratnâkarâvatârikâ Pari. VII, p. 142 :—

बौद्धास्तु बुद्धिक्षणपरंपरामात्रमेवात्मानमाम्नासिषुः, न पुनर्मौक्तिककण-निकरनिरन्तरानुस्यूतैकसूत्रवत् तदन्वयिनमेकम्। ते लोकायतलुण्टाकेभ्योऽपि पापीयांसः। तद्भावेपि तेषां स्मरणप्रत्यभिज्ञानाद्यघटनात्। तथाहि—पूर्वबुद्ध्यानु-भूतेऽर्थे नोत्तरबुद्धीनां स्मृतिः संभवति ततोन्यत्त्वात् संतानान्तरबुद्धिवत्। न ह्यन्य-दृष्टोऽर्थोऽन्येन स्मर्यते। अन्यथैकेन दृष्टोऽर्थः सर्वैः स्मर्येत। स्मरणाभावे च कौतस्कुती प्रत्यभिज्ञाप्रसूतिः। तस्याः स्मरणानुभवोभयसंभवत्वात्। पदार्थप्रेक्षणप्रबुद्ध-प्राक्तनसंस्कारस्य हि प्रमातुः स एवायमित्याकारेणेयमुत्पद्यते। अथ स्यादयं दोषो यद्यविशेषेणान्यदृष्टमन्यः स्मरतीत्युच्यते। किंत्वन्यत्वेपि कार्यकारणभावादेव स्मृतिः। भिन्नसंतानबुद्धीनां तु कार्यकारणभावो नास्ति तेन संतानान्तराणां स्मृतिर्न भवति। न चैकसांतानिकीनामपि बुद्धीनां कार्यकारणभावो नास्ति येन पूर्वबुद्ध्यनुभूतेऽर्थे तदुत्तरबुद्धीनां स्मृतिर्न स्यात्। तदप्यनवदातम्। एवमपि नानात्वस्य तदवस्थत्वात्।

अन्यत्वं हि स्मृत्यसंभवे साधनमुक्तम्। तच्च कार्यकारणभावाभिधानेपि नापगतम्। न हि कार्यकारणभावाभिधाने तस्यासिद्धत्वादीनामन्यतमो दोषः प्रतिपद्यते। नापि स्वपक्षसिद्धिरनेन क्रियते। नहि कार्यकारणभावात् स्मृतिरित्यत्रोभयप्रसिद्धोस्ति दृष्टान्तः। अथ—"यस्मिन्नेव हि संतान आहिता कर्मवासना। फलं तत्रैव संधत्ते कर्पासे रक्तता यथा॥" इति कर्पासरक्ततादृष्टान्तोऽस्तीति चेत् तदसाधीयः। साधनदूषणासंभवात्। अन्वयाद्यसंभवान्न साधनम्। नहि कार्यकारणभावो यत्र तत्र स्मृतिः कर्पासे रक्ततावदिति अन्वयः संभवति। नापि यत्र न स्मृतिस्तत्र न कार्यकारणभाव इति व्यतिरेकोऽस्ति। असिद्धत्वाद्यनुद्भावनाच्च न दूषणम्। नहि ततोऽन्यत्वादित्यस्य हेतोः कर्पासे रक्ततावदित्यनेन कश्चिद्दोषः प्रतिपाद्यते। किं च। यद्यन्यत्वेपि कार्यकारणभावेन स्मृतेरुत्पत्तिरिष्यते तदा शिष्याचार्यादिबुद्धीनामपि कार्यकारणभावसद्भावेन स्मृत्यादि स्यात्। अथ नायं प्रसङ्गः। एकसंतानत्वे सतीति विशेषणादिति चेत् तदयुक्तम्। भेदाभेदपक्षाभ्यां तस्योपक्षीणत्वात्। क्षणपरंपरातस्तस्याभेदे हि क्षणपरंपरैव सा तथा च संतान इति न किंचिदतिरिक्तमुक्तम्। भेदे तु पारमार्थिकोऽपारमार्थिको वासौ स्यात्। अपारमार्थिकत्वे स्वस्य तदेव दूषणम्। पारमार्थिकत्वे स्थिरो वा स्यात् क्षणिको वा क्षणिकत्वे संतानिनिर्विशेष एवायमिति किमनेन स्तेनभीतस्य स्तेनान्तरशरणस्वीकरणकारिणा। स्थिरमथ संतानमभ्युपेयाः प्रथयन्तं परमार्थसत्स्वरूपम्। अमृतं पिब पूतयाऽनयोक्त्या स्थिरवपुषः परलोकिनः प्रसिद्धेः॥"—P. N. T. Ratnâkarâvatârikâ. Ch. VII pp. 142–143.

Cf. a similar line of argument in S'âṃkara Bhâṣya on Br. Sû. II. ii. 25—अनुस्मृतेश्च.

Appendices

1. "In Hindu and Jaina accounts of Buddhist philosophy, we find mention of only four schools, viz. (1) the Mâdhyamikas, or nihilists, (2) the Yogâcâras, or subjective idealists, (3) the Sautrântikas or representationists and (4) Vaibhâshikas or presentationists. The chief tenets of each of these schools are supposed to be summed up in the well-known stanza:—

अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते
प्रत्यक्षो नहि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः॥
योगाचारमतानुगैरभिमता साकारबुद्धिः परा
मन्यन्ते बत मध्यमाः कृतधियः स्वस्थां परां संविदम्॥

These four probably represented the principal classes of Buddhists who flourished in India at a time when militant

Vedântism was hurling the missiles against the moribund faith of Sugata."

—Sogen's "Systems of Buddhist Thought".

